यतिधर्मप्रदीपिका

कृष्णापुराग्रहारस्थ
ब्रह्मश्रीलक्ष्मीनारायणशास्त्रिवर्यैः
विरचिता

परमहंसपरिव्राजक श्रीविद्यागुरु श्रीप्रकाशानन्देन्द्रसरस्वती-
स्वामिभिः प्रकटीकृता
पण्डितराज S. सुब्रह्मण्यशास्त्रिभिः परिशोधिता

मद्रास् तिरुवल्लिकेणी
भारतीविजयमुद्रणालये
मुद्रापिता

[illegible] विजयसेनराम्

[illegible]



श्रीमत्परमहंस परिव्राजकाचार्यवर्य
श्री शृङ्गेरी शारदापीठाधीश जगद्गुरु अभिनवविद्यातीर्थ महास्वामिन्

॥ ॐ ॥

॥ श्रीशृङ्गेरी श्रीजगद्गुरुसंस्थानम् ॥

श्री
विद्या
शङ्कर

श्रीमत्परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रमाणपारावारपारीण - यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाध्यष्टाङ्गयोगानुष्ठान - निष्ठतपश्चक्रवर्त्यनाद्यविच्छिन्नश्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्श- नस्थापनाचार्यव्याख्यानसिंहासनाधीश्वरसकलनिगमागमसारहृदय - साङ्ख्यत्रयप्रतिपादकवैदिकमार्गप्रवर्तकसर्वतन्त्रस्वतन्त्रादिराजधानीविद्या- नगरमहाराजधानी कर्णाटकसिंहासन प्रतिष्ठापनाचार्य श्रीमद्राजाधि- राजगुरुभूमण्डलाचार्य ऋश्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद् विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीचन्द्रशेखरभारतीस्वामिगुरु- करकमलसञ्जात

श्रीजगद्गुरु-
शृङ्गेरीश्रीमदभिनवविद्यातीर्थस्वामिभिः—

अस्मदत्यन्तप्रियशिष्येषु श्रीमधुरापुरवास्तव्येषु परमहंसश्री- प्रकाशानन्देन्द्रसरस्वतीस्वामिषु अत्यन्तब्रह्मैक्यानुसन्धानपूर्वकाशिषः समुल्लसन्तुतराम् ॥

भवद्भिः प्रहितो यतिधर्मप्रदीपिकाख्यो ग्रन्थ आन्तमवलोकितः । प्राचीनानां बहूनां यतिधर्मप्रबोधकानां ग्रन्थानां सङ्ग्रहरूपोऽयं ग्रन्थः विनैव विमर्शपरिश्रमं अनुष्ठेयार्थानां प्रकाशकः सन्यासिलोकानां महान्तमुपकारमातनोति । स्वयं यतिभिरनुष्ठेयाः यतिषु च [illegible]रनुष्ठेयाश्च विषयाः विना विपर्यासं सरलया सरण्या सम्यक् [illegible]निष्पादिताः । अतः सर्वविध्यकानुष्ठानबोधकस्य प्रकाशनमावश्यकमासीत् । भवन्तः [illegible]प्रकाशनं अविरलप्रचारं, ग्रन्थमिमं प्रकाश्य [illegible] उपाकुर्वन्निति दृढमाभप्रेमः ॥

ग्रन्थोऽयं श्रीशारदादयया सर्वत्र प्रसरतात् प्रकाशयितारो भवन्तः प्रत्यगात्मानं साक्षात्कृत्य जीवन्मुक्तिसन्तोषसन्तानमनुभवन्त्विति आशास्महे ॥

विकारिपुष्य[illegible]
दशमी
[illegible]स्थान वेल्लूर

श्रीः

ankurnagpal108@gmail.com

[illegible]

श्रीमज्जगद्गुरू शंकराचार्य परम्परा संवाहक
श्री उमाशक्ति पीठाधीश्वर
स्वामी श्री रामदेवानन्द सरस्वती जी महाराज
श्री उमाशक्ति पीठ, दुर्गापुरम्, पानीघाट,
श्रीधाम वृन्दावन (मथुरा)
सम्पर्क सूत्र : 9412662247, 9456288800



श्रीमत्परमहंस परिव्राजकाचार्यवर्य श्रीकाञ्ची कामकोटिपीठाधिपति
जगद्गुरु श्रीमच्चन्द्रशेखरेन्द्र सरस्वतीमहास्वामिनः ।

॥ श्रीः ॥

श्री
चन्द्र
मौलीश्वर

॥ श्रीचन्द्रमौलीश्वर ॥

स्वस्ति श्रीमदखिलभूमण्डलालङ्कारत्रयस्त्रिंशत्कोटिदेवतासेवित-श्रीकामाक्षीदेवीसनाथ श्रीमदेकाम्रनाथ श्रीमहादेवीसनाथ श्रीहस्ति-गिरिनाथ, साक्षात्कारपरमाधिष्ठानसत्यव्रतनामाङ्कित काञ्चीदिव्यक्षेत्रे शारदामठसुस्थितानाम् अतुलितसुधारसमाधुर्यकमलासनकामिनी-धम्मिल्ल सम्फुल्लमल्लिकामालिकानिष्यन्दमकरन्दझरीसौवस्तिकवाङ्नि-गुम्भविजृम्भणानन्दतुन्दिलितमनीषिमण्डलानाम् अनवरताद्वैतविद्या-विनोदरसिकानाम् निरन्तरालङ्कृतीकृतशान्तिदान्तिभूम्नाम् सकलभुव-नचक्रप्रतिष्ठापकश्रीचक्रप्रतिष्ठाविख्यातयशोऽलङ्कृतानाम् निखिलपा-षण्डषण्डकण्टकोद्घाटनेन विशदीकृतवेदवेदान्तमार्ग षण्मतप्रतिष्ठापका-चार्याणाम् श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीजगद्गुरु श्रीमच्छङ्कर-भगवत्पादाचार्याणाम् अधिष्ठाने सिंहासनाभिषिक्त श्रीमन्महादेवेन्द्र-सरस्वतीसंयमीन्द्राणाम् अन्तेवासिवर्य श्रीमच्चन्द्रशेखरेन्द्रसरस्वती-श्रीपादैः—

[illegible]पयाशय श्रीनित्यप्रकाशानन्द[illegible]सरस्वतीस्वामि-[illegible] नारायणस्मृतिः ॥

भवता समर्पितं यतिधर्मप्रदीपिकाख्यं ग्रन्थं दृष्ट्वा नितरां प्रमुदिताः स्मः । अत्र सन्न्यासाश्रमस्वीकरणप्रकारः, सन्न्यासिनाम् आह्निकक्रमः, वेदान्तश्रवणक्रमश्च विस्तरेण निरूपितः । ब्रह्मीभूतानां सन्न्यासिनामौर्ध्वदैहिककर्म[illegible] ग्रन्थान्तरेष्वनुपलभ्यमाना माहेश्वर-[illegible] अत्र ग्रन्थे असाधारणतया प्रतिपादिताः । इमं ग्रन्थं [illegible] विशेषरूपेण सन्न्यासिनाञ्चोपकाराय [illegible] भवतः साक्षान्मुक्तिसाधनीभूतां ब्रह्मनिष्ठां वितरताद्भगवान् [illegible] ॥

श्रीः

[illegible]
मुम्बा[illegible]

नारायणस्मृतिः

अत्र च यतिधर्मप्रदीपिकाग्रन्थे सन्न्यासग्रहणादारभ्य आराधनान्तं सर्वं विषयास्सम्यङ् निरूपिताः । [illegible]नानुष्ठान, शान्तिपाटक्रम, क्षौर, स्नान, चातुर्मास्यनियम, व्यास-पूजाविधानादयो यतिधर्मास्सप्रमाणमनुवर्णिताः । इत्थं तुरीयाश्रम-सम्बन्धिनां समग्रविषयाणामेकत्र समावेशनमिदं यतिकुलस्य सुतरामुपकरोति अन्ते भवबलिर्नारायणबलिश्च निरूपितः । अद्वैतिनां सिद्धान्ते भवनारायणयोरेकत्वाद्द्वयोरपि प्रामाण्यमभ्युपेयम् । दाक्षिणात्याः प्रायो धर्मसिन्धुशान्तिरत्नाकरादिनिबन्धप्रामाण्येन नारायणबलिमेव [illegible]चरन्ति । यदि कालीपुराणादिषु भवबलिश्चोक्तो तर्हि सोऽपि समादरणीय एव । तथा च बलिद्वयप्रापकप्रमाणानां समबलत्वाद[illegible] समाश्रयणीयः । तथा च व्यास[illegible] यथा विष्णुभक्ता अद्वैतिनः श्रीकृष्णादिपञ्चकं प्राधान्येन पूजयन्ति यथा च शिवभक्ता ईशानादिपञ्चकप्रधानां गुरुपूजामाचरन्ति तथा प्रकृतविषयेऽपि व्यवस्थितविकल्प एव समाश्रयणीयः । हरिहरयोस्ता-रतम्यं मनागप्यमृष्यमाणा अद्वैतिनः प्रागुक्तं पक्षद्वयमप्यङ्गीकरिष्य-न्तीत्येव द्रढीयसी नः प्रतीतिः । कृमिकीटकवलीक्रियमाणानामेता-दृशग्रन्थानां प्रकटीकरणेन न केवलं यतिकुलमेवोपकृतमपि तु गृहस्थादयोऽपि सुतरामुपकृता एव ॥ यतस्तत्कर्तृकमेवेदमाराधनान्त-कर्मजातम् ॥ अन्ते [illegible]पुरुषान्प्रति आस्माकीनां हार्दिकीं कृतज्ञतां [illegible] ॥ नारायणस्मरणम्

मुम्बां,
महादानपुरम्,
पुष्यकृष्णपञ्चम्याम् ।

इत्थं परमहंसकुलसेवाधुरन्धरः
श्रीभाष्यस्वामी ।



श्रीमत्परमहंस परिव्राजक
[illegible]

॥ अथ भूमिका ॥

"कालीपुराणे दूर्वासः प्रोक्तवाक्यप्रमाणतः ।
निबन्धनान्तराण्युपलभ्यागमाश्च [illegible] ॥ १ ॥
परस्परविरुद्धानां वचनानां व्यवस्थया ।
सङ्गृह्य या तु विद्वद्भिः प्रयुक्ता न्यायकोविदैः ॥ २ ॥
स्मृत्यागमपुराणादिधर्मशास्त्रविचक्षणैः ।
श्रौतस्मार्ताचारपरैर्लोकानुग्रहतत्परैः ॥ ३ ॥
कृष्णापुराग्रहारस्थलक्ष्मीनारायणाभिधैः ।
लिखित्वा शास्त्रिवर्यैस्सा यतिधर्मप्रदीपिका ॥ ४ ॥

कालेयाब्दे शुक्लभावे केरलेऽब्दे सुभिक्षके । (कलि ४९७२) कोल्लं (१०४७) [illegible] दश्यां तु समापिता" ॥

इति ग्रन्थसमाप्तौ लिखितं दृश्यते । एतन्निबन्धनन्तु , पुस्तकपेटिकासु प्राचीनतालपत्रलिखितकोशेषु वेदशास्त्रागम पुराणस्मृत्यादिषु मध्येऽत्यन्तं शिथिलीभूय प्रसुप्तमिव स्थितम् । तत्कदाचिदद्यास्मद्दृष्टिपथं प्राप्य करगतं च सम्यगामूलाग्रमवलोकितं परिशोधितञ्चास्माभिः । तत्तु परमहंससन्न्यासिविषयेऽत्यन्तोपकारकम् । तत्र च परमहंसाश्रमस्वीकाराद्याराधनान्तं त्रयोदशाहसाध्यं कर्मजातं समूलप्रमाणमन्यूनानतिरिक्तं व्यवस्थापितम् । तस्मात्तदेतत्सर्वं निष्कल-

[illegible] विद्वांस एव न्यायविदो विदांकुर्वन्तु सम्यगस्मिन्नेव निबन्धने [illegible]नन्तरेषु तु सामान्यतः प्रवृत्तानि वचनानि प्रायशस्सर्वे [illegible] स्मानिभिः ।

[illegible] कालातिपातीनामपि न कैश्चिद [illegible] मत्वा [illegible] कापकालायास्तिकप्रभु [illegible] परिवृ [illegible] शास्त्रार्थेषु सन्यासेषु [illegible] मनु [illegible] सरन्तः केवलं काषायमात्रधारिणः ब्रह्मनिष्ठां अभिनयन्तः तुरीयातीत [illegible] इति [illegible]ऽनियमेनैवाकालेऽपि सर्वान्नभक्षणे [illegible] एव [illegible]न्तोऽविद्वत्पामरजनान्, विद्वन्मानिनो नानाविधो [illegible] अर्थार्जनपरा एव दरीदृश्यन्ते । अहो मोह [illegible] ! एतत्सर्वमप्यनादृत्या [illegible] ब्राह्मणविद्वच्छ्रेष्ठ [illegible] पिकां सम्यक् परामृश्य परमहंसाश्रमधर्मानि [illegible] अवलम्बिताराम् [illegible] भवत । इति [illegible]

[illegible], सन्न्यासेनैव देहत्यागं कुर्यात्, काशीश्वर [illegible] तारकं ब्रह्मापदिशति तस्मादविमुक्त [illegible] इत्यादि श्रुतिभिः, आहिताग्निरसन्न्यासो [illegible] पुनर्जन्म ब्रह्मलोकं वैदेही मुक्तिमर्पयेत् इति दूर्वासो [illegible] शरीरमुक्तौ उपायत्रयमन्तरेण कारणान्तराभावा

अद्यतनानां ब्राह्मणजातीयानां एकाहेन रजस्वलावृषलीविवाहेन निषे-कान्ताद्व्यूहविवाहेन चाहिताग्नित्वस्य मुख्यसाधनभूतविधिवदौपासनाग्नि-रभावादाधानपूर्वकाहिताग्नित्वासंभवादेवाहिताग्नित्वेन मरणं न सम्भ-वत्येव । यद्यपि सम्भवति, तथाऽपि स्वयं तीर्णः परांस्तारयतीति न्याया-दन्त्येष्ट्या आहिताग्निसंस्कर्तॄणां अद्यतनपुत्रादीनां ब्राह्मण्यात्पतितानां विधिवदौपासनाग्न्याद्यभावादनधिकारित्वात्, तत्कृताविधिसंस्कारादिना [illegible] पुण्यलोकप्राप्तिर्नैव संभवेत् । [illegible] पुण्यकर्मणैव परलोक-प्राप्तिर्नान्यथा । अथ [illegible] न यज्ञेन संभवः । आपत्प्-पायान्तरेणैव । ततश्च श्रुत्यादिषु श्रद्धावतां ब्राह्मणजातीयानां सन्न्यासे-नैव देहत्यागः कर्तव्यः । "येन केन प्रकारेण सन्न्यासेन मृतो यदि । ब्रह्मलोकमवाप्यैव ब्राह्मणो मुक्तिमाप्नुयादि"ति दूर्वासोवचनादेव तेषां ब्रह्मलोकप्राप्तेः । अथवा—"तस्मादविमुक्तमाश्रितो भवति" "काश्यां तु मरणान्मुक्ति"रित्यादि वचनाच्चाविमुक्ते वाराणस्यां वा शरीरत्यागः कर्तव्यः इति [illegible] पन्थानौ । तस्मात इमां यतिधर्मप्रदीपिकां [illegible] कृत्या भवत ।

[illegible] श्रीकांचीकामकोटि पीठा- श्रीमत्परमहंसपरि [illegible] श्रीमच्चन्द्रशेखर [illegible] श्रीपादानां श्रीमत्परमहंसपरि-व्राजकाचार्य श्री जगद्गुरु शृङ्गेरि श्री शारदापीठाधीश्वराणां श्रीमद-भिनवविद्यातीर्थस्वामिश्रीपादाना अन्येषां च प्रोत्साहनेन द्रव्य सहायेन च एतद्ग्रन्थमुद्रणादिकार्यं निरन्तरायं समाप्तिमगादिति निवेदयामः ।

अपि च एतद्ग्रन्थलेखकानां कलिडैकुरुचि श्रीयुत शंकर-सुब्रह्मण्य शास्त्रिणां महताप्रयत्नेन एतद्ग्रन्थसंशोधकानां प्रान्तियंकरै पण्डितराज श्रीसुब्रह्मण्यशास्त्रिवर्याणाञ्च सर्वाभीष्टसिध्यै क्रियते—महादेवस्मृतिः

शिवोऽहमस्मि ॥

इति श्रीमत्परमहंसपरिव्राजकश्रीप्रकाशानन्देन्द्रसर-
स्वतीस्वामिनो द्वालास्यक्षेत्रवासिनः ॥
॥ शिवम् ॥

श्रीः

अथ परमशिवांशभूत श्रीविद्योपासकमहर्षिदूर्वाससा ऐदम्पर्येण स्वस्मै महेश्वरेण साक्षादुपदिष्टा यतिकुलधर्मा यतिगृहिकुलक्षेमाय शिष्येभ्यः समुपदिष्टा इति यतिधर्मप्रबोधाभिधग्रन्थादवगम्यते। उक्तञ्च तत्र-

" ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
चत्वार आश्रमा एते पृथगाचारलक्षणाः ॥
एषां चतुर्णां चत्वारो मुनयोऽप्यवतारकाः ।
दधीचो गौतमोऽगस्त्यो दूर्वासाश्च यथाक्रमम् ॥

इत्यादिना "दूर्वाससा मुनीनामप्याश्रमो निर्मितो हरे" इति शिवसूक्त्या च दूर्वाससः तदाश्रमप्रवर्तकत्वात्तदुपदिष्टार्थस्यैव प्रामाण्यमिति निश्चीयते।

अयं च यतिधर्मप्रदीपिकाख्यो ग्रन्थः कुटीचकादिचतुर्विधसन्यासिनां सर्वानपि धर्मविशेषान् श्रीकालीपुराणस्थात्रिपुत्रपरमाप्तसमुपदिष्टवचनकदम्बावष्टम्भेन, तथा सूतसंहितातद्व्याख्यातृश्रीमाधवादिमहापुरुषैर्विचार्य कृतव्यवस्थानुसारेण, तथा यतिधर्मप्रबोधादिग्रन्थप्रतिपादितदिशा च साकल्येन प्रतिपादयति । नान्येन केनापि ग्रन्थेन विचारपूर्वकं साकल्येन यतिधर्मा निरूपिता इत्येतदेतद्ग्रन्थपरिशीलनेन विस्पष्टं ज्ञायेत। किञ्चात्र यतिभिरनुष्ठेयसर्वधर्मवत् तेषां समाध्यूर्ध्वमपि स्वस्वक्षेमाभिवृद्धये पुत्रैश्छात्रैरन्यैर्वाऽनुष्ठेयधर्मविशेषानपि व्यवस्थापूर्वकं प्रतिपादयन्ति सर्वतन्त्रस्वतन्त्राः धर्मशास्त्रसागरधीवराः श्रीलक्ष्मीनारायणशास्त्रिणः। अपि

चात्र कुटीचकादिसन्यासिनां नारायणबलिः, मुख्यसन्यासिनां परमहंसानामेव माहेश्वरबलिसंज्ञकमवादिबलिरिति व्यवस्था कृता । एतादृशव्यवस्थानुसारेण माङ्कुडि, कटयमाघमहारेपु इदानीमपि शिष्टैर्गृहस्थैस्सर्वसंपत्समृद्धये स्वस्वसन्तत्यभिवृद्धये च परमासात्रिपुत्रोपदिष्टमाहेश्वरबलिरेवाऽनुष्ठीयते ।

यद्यपि मुमुक्षूतेनामपि गृहस्थानां पुण्यलोकावाप्तये अशास्त्रीयं पुत्रादिकर्तृकं और्ध्वदैहिकं कर्म प्रतिबन्धकं भवति तथापि न परमहंस विषये ॥ परमहंसानां देहपतनानन्तरं ब्रह्मलोकावाप्तिरेव । पुत्रादिः परमहंसोद्देशेन [illegible]किञ्चिदनुतिष्ठतु । तूष्णीं वा तिष्ठतु । अन्यथा वानुतिष्ठतु । [illegible] परमहंसस्य [illegible]गतस्य ब्रह्मलोकावाप्तेर्न कापि हानिरिति विदांकुर्वन्तु यतिसंरक्षिणो गृहस्थाः ।

तथाऽपि स्वस्वक्षेमाभिवृद्धये परमेश्वरप्रसादेन सर्वसंपत्समृद्धये सर्वमङ्गलावाप्तये च गृहस्थादिभिः सिध्धुत्तरं यतेः संस्कारविशेषः शास्त्राचारमूलकत्वेन अनुष्ठेय एवेति विज्ञायते ।

अपि च करालेऽस्मिन्कालेयकाले वर्णधर्मेष्वाश्रमधर्मेषु च [illegible] सर्वांशेषु [illegible] मुमुक्षूणां क्षेम[illegible] [illegible]मात्रविषय- [illegible] तेन— [illegible] मनुपादिशद्भगवानत्रि[illegible] [illegible] ब्रह्मलोकमवाप्यैव

[illegible] प्रकारेण सन्यासेन [illegible] [illegible] इति च ब्राह्मणो [illegible] । [illegible] आतुरेण [illegible]" इति च अत्र निर्विशेषणब्राह्मणशब्देन पतितादीनामप्यातुरसन्यासेऽधिकार इति विस्पष्टं ज्ञायते ॥

भगवता बोधायनेनाप्यनुगृहीतं करुणया—" यद्यौवने चरति विभ्रमेण सद्वाऽसद्वा यादृशं वा यदा वा । उत्तरे चेद्वयसि साधु चरस्तदेवास्य भवति नेतराणीत्यादिना ॥

अपरोऽयं विशेषः । यस्य कस्यचित् ब्राह्मणस्य सन्यासाश्रमस्वीकारे श्रद्धालोः सन्यासं कारयति यः कश्चिदास्तिको गृहस्थः तस्य गृहस्थस्य ब्रह्मलोकप्राप्तिः । यस्तावत्तस्य विघ्नमाचरति तस्य रौरवादिनरकप्राप्तिः । तथा चोक्तम्—

सन्यासं कारयेद्यस्तु ब्रह्मलोकं स गच्छति ।
सन्यासविघ्नकर्ता तु रौरवं नरकं व्रजेत् ॥ इति ॥

एतादृशा विषयाः, ग्रन्थेस्मिन्सप्रमाणं सत्संप्रदायसंवलितं विचारं निरूपिता इत्यहो महद्भाग्यं भारतीयानामग्रजन्मनां परमहंसानां गृहस्थानाश्चेति । एतादृशग्रन्थरत्नं मुद्रापयित्वा करबदरवत्पुस्तकरूपेण यतिगृहिकुलक्षेमाय प्रकटीकृतवतां श्रीविद्यागुरूणां सोमयाजिनां विद्वत्सन्यासिनां परमहंसानां श्रीश्रीप्रकाशानन्देन्द्रसरस्वतीचरणानां चरणयोस्साष्टाङ्गं सहस्रशोऽभिवन्द्य तेषां शिवस्मरणजन्यानुग्रहपरम्परामाशासे ॥

[illegible]कारिवत्सरीय पुष्य शुक्ल	परमहंसकुलचरणरेणुः,
द्वादश्यामिन्दुवासरे ।	कीलाम्बूर्ग्रामाभिजनः
चेन्नपुर्यन्तर्गत	सुब्रह्मण्यशर्मा—कालटी
मयूरपुरम् ॥	

॥ ओं तत्सत् ॥

ओं श्रीगुरुभ्यो नमः ।

इह खलु चतुर्षु पुरुषार्थेषु मोक्ष एव परमः पुरुषार्थ इति सर्वशास्त्रप्रसिद्धम् । स च जीवब्रह्मणोरैक्यरूपः । स च मोक्षो ज्ञानैकसाध्यः । ज्ञानञ्च संस्कारविशेषैः पापापनोदनद्वारा चित्तशुद्ध्यतिशये सति जायते ।

ब्रह्मज्ञाने तैत्तिरीये याज्ञिक्यामुपनिषदि द्वादश उपाया अभिहिताः । तत्र सत्यवचनादि सन्न्यासान्तमभिधाय "न्यासमेषां तपसामतिरिक्तमाहुरि"त्यन्ते सन्न्यासस्य सर्वोत्कृष्टत्वमभिहितम् । स च सन्न्यासो द्विविधो भवति । यस्मिन्कस्मिन्नाश्रमे वसतः खल्वा- [illegible]मानराहित्यलक्षणः मानसः आश्रमरूपश्चेति । आश्रमरूपः सन्यासश्च कुटीचक, बहूदक, हंस परमहंसभेदेन चतुर्विधः । तेषां परमहंस एव श्रेष्ठ इति सर्वशास्त्रप्रसिद्धम् ।

✓परमहंससन्यासश्च विविदिषासन्यासो विद्वत्सन्यासश्चेति द्विविधः । तत्र ये विद्वत्सन्यासिनः तेषामाश्रमधर्मस्य वैकल्येऽपि न प्रत्यवायः । ये पुनर्विविदिषासन्यासिनः तेषां आश्रमधर्मवैकल्ये प्रत्यवायो जायत एव । यतः उत्तरवेदिप्रोक्षणशेषनिनयनस्थलनिर्णये "इन्द्रो यतीन्सालावृकेभ्यः प्रायच्छत् तान्दक्षिणत उत्तरवेद्या आदन्" इति तथा कारीरीष्टौ, "यतीनामद्यमानानां शीर्षाणि परापतन्

ते खर्जूरा अभवन्" इति च प्रच्छन्नसन्यासिपरम् । श्रीपरिव्राजकाऽऽचार्यवर्यैः श्री विद्यारण्यस्वामिभिः 'असुरा उत्तमाश्रमाश्रयणेन देवान्हन्तुं प्रच्छन्नवेषा आसन् । तान्परमैश्वर्यसम्पन्न इन्द्रनामकः महापुरुषः सालावृकेभ्यः प्रायच्छदिति विस्पष्टतया भाष्यं कृतम् । तेषामेवासुरयतीनां सालावृकैर्भक्ष्यमाणानां शिरांसि खर्जूरा अभवन्निति च । अतो ये विविदिषासन्यासिनस्ते नित्यकर्मानुष्ठानपूर्वकं श्रवणमनननिदिध्यासनादिकं दिने दिने कुर्युः । सन्यासिनां धर्माः परिज्ञातुं शास्त्रसंप्रदायमन्तरेण न शक्यन्ते । घोरेऽस्मिन्कलिकाले पूर्वाश्रमाणां धर्मा एव लुप्ताः किमुत सन्यासिनाम् । तथा सामान्यधर्मेषु तन्निमानमापन्नेषु यतिधर्मप्रकाशनं वैदिकमार्गानुयायिनां नाल्पस्य प्रमोदस्य स्थानम् ॥

विशिष्य एतद्ग्रन्थप्रकाशयितारः इमे श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीप्रकाशानन्देन्द्रसरस्वतीस्वामिचरणाः, पूर्वाश्रमे साङ्गाध्ययनं कृत्वा "त्रिंशतं वा वर्षाणि" इति श्रुतिरीत्या अग्निहोत्रादीनि वैतानिकानि कर्माण्यनुष्ठाय ऋणत्रयञ्चापाकृत्य, क्रमेण परमहंसाश्रमं स्वीकृतवन्तः । अहो भाग्यं भारतीयानाम् ।

किञ्च एते विद्वत्सन्यासिनः । ज्ञानविज्ञाननिष्णाताः । लोकानुग्रहार्थं स्वयं देहाभिमानं त्यक्त्वा अन्वहमात्मानुसन्धानं कुर्वन्ति ।

श्रीसूतसंहिताव्याख्यायां माधवाचार्यैः कर्मज्ञानयोः क्रमसमुच्चयो योऽभिहितः तस्य निदर्शनभूता इमे । एतैः प्रकाश्यमाना

यतिधर्मप्रदीपिका मया यथामति दृष्टा । "धर्मस्य तत्त्वं निहितं गुहायां," इतीदानीमेव सम्यग्ज्ञायते ॥

एतैश्चतुर्विधसन्यासिनां नित्यकर्मानुष्ठानादि पूरणान्तं कर्मजातं सम्यग्निरूप्य प्रमाणपूर्वकं मुद्रापितम् । सेयं श्रीस्वामिचरणानां "यतिधर्मप्रदीपिका" अतिप्रशस्तेति विनिवेद्य [illegible] विरमते ॥

नेल्लूरु, आन्ध्रप्रदेशः | अ. सी. विश्वनाथश्रौती,
श्रौतविद्याविभूषणः ।

YATI DHARMA PRADIPIKA

Of the four Asramas ordained in the Vedas, Sanyasa or Renunciation is the greatest. It is otherwise called Mokshasrama—asrama leading to Final Release. The Advaitins consider Sanyasa as the essential factor among the means of Moksha. Replying to the question as to why the asrama of the house-holder is not so great Sri Sankarabhagavatpada points out that house-holders are impure as they have at times to utter falsehood, to assume ignorance about facts known to them, and even to deceive others while Sanyasins are far away from these evils. Sanyasa is of two kinds namely, Vivat Sanyasa and Vividisha Sanyasa. The former is taken by those who have realised Brahman like Yāgnavalkya and the latter by ordinary people in search of Moksha.

Vividhisha Sanyasa in turn is divided into four stages, namely Kutichaka, Bahudaka, Hamsa and Paramahamsa. In the first three stages the adept holds three staffs of bamboo tied together, repeats the holy Gayatri mantra, and continues to wear his former symbols of Sikha and Yegnopavita. Paramahamsa on the other hand holds only one staff and leaves all rituals and symbols.

Both these Sanyasas have to be assumed only according to the procedure ordained in the Srutis. The person desirous of assuming this asrama must purify himself with Viraja homas, he has to satisfy his forefathers through the

eight Sraddhas, he has to take over into his self the sacred fires he was worshipping and to pass the Gayatri he was repeating, into Pranava, the one syllable he must henceforth concentrate upon.

This work explains all these rituals and proceeds to narrate the daily rites of the Sanyasin, his Vyasapuja and his Chaturmasya.

Above all the last rites of the Sanyasin, and their procedure are herein demonstrated in clear terms. The unique feature of this work is that it explains Mahesvarabali performed in some quarters as against the common Narayanbali while other works on the subject are silent in this respect. The authenticity of this work is vouchsafed by the Srimukhas of both the Heads of the great Mutts of the South, the Sringeri Mutt and the Kumbakonam Mutt.

Panditaraja S. SUBRAHMANYA SASTRI

॥ श्री गुरुचरणे शरणम् ॥

॥ कृतज्ञतानिवेदनम् ॥

यतिधर्मप्रदीपिकाख्योऽयं ग्रन्थः परमहंसैरस्मद्गुरुतातपादैर्वेदान्तविशारदश्रीशङ्करशास्त्र्यादिपण्डितद्वारा श्रीतालपत्राल्लेखयित्वा पण्डितराजपण्डितप्रवरप्रान्तियंकरैग्रामाभिजनश्रीसुब्रह्मण्यशास्त्रिवर्यमुखेन शोधयित्वा श्रीभारतीविजयमुद्रणयन्त्रालये मुद्रापयित्वा यतिगृहिलोकोपकाराय प्रकटीकृतः ।

एतद्ग्रन्थलेखनशोधनादिकार्यकरणद्वारा महान्तं सहायं कृतवतां श्रीकल्लिडैकुरुच्चिग्रामाभिजनानां श्रीयुतशंकरशास्त्रिणां परमशान्तानां सर्वतन्त्रसारज्ञानां पण्डितराजश्रीसुब्रह्मण्यशास्त्रिणाञ्च विनयान्वितां कृतज्ञतां निवेदयामि ।

एतद्ग्रन्थसज्जीकरणाय नानाविधसामग्रीसंप्रदानद्वारा प्रोत्साहनं कृतवतां इभ्यानां वैदिकमहाजनसभाध्यक्षाणां टि. एस्. रामस्वाम्यार्यमहोदयानां तथा पूर्वोक्तसभाकार्यदर्शिनां सदाचारसम्पन्नानां श्रीयुतलक्ष्मीनारायणदीक्षितचरणानाञ्च सप्रश्रयं कृतज्ञतां निवेदयामि ।

एतद्ग्रन्थप्रकाशनविषये ये ये महापुरुषा उपकारमकुर्वन् उपाकारयंश्च तेषाञ्च कृतज्ञतां निवेदयामि ।

अपि च श्रीमुखपदानेन लोकोपकारमेव कृतवतां श्री शारदा-पीठाधिपानां तथा श्री कामकोटिपीठाधिपानां तथा महादानपुटभेदनस्थ-श्रीभाष्यस्वामिनाश्च आत्मानमेव निवेदयामि। एतद्ग्रन्थमुद्रणे सर्वांशेषु बहूपकृतवतः श्रीरामार्यस्य उत्तरोत्तरं श्रेयो वितरतात् भगवानु-मावानिरिति सर्वं शिवम्।

इति एतद्ग्रन्थप्रकाशयितॄणां श्रीमत्परमहंस श्रीविद्यागुरु श्रीप्रकाशानन्देन्द्रसरस्वतीश्रीपादानां प्रथमशिष्यः (पूर्वाश्रमपुत्रः) श्रीविद्योपासकः सांगवेदाध्यायी—

तात्कालिकवासस्थानं चेन्नपुरान्तर्गत मयूरपुरम् ॥ } श्री रङ्गस्वामिदीक्षितः ॥
कृष्णापुरग्रामाभिजनः ॥

॥ श्रीरस्तु ॥

॥ विषयानुक्रमणिका ॥

विषयाः | पृष्ठं

विषयाः | पृष्ठं



॥ श्रीरस्तु ॥

॥ यतिधर्मप्रदीपिका ॥

॥ सन्न्यासाश्रमस्वीकारविधिः ॥

॥ तत्प्रमाणवचनानि ॥

ईशानविषयं ज्ञानं वेदान्तश्रवणादिना ।
जायते परहंसस्य यतेर्मुख्याधिकारिणः ॥ १ ॥

नाश्रमान्तरनिष्ठस्य क्रमात्तस्यापि जायते ।
ब्रह्मलोकमवाप्नोति वनस्थो नैष्ठिकोऽपि च ॥ २ ॥

गृहस्थः पितृलोकञ्च शिवज्ञानन्तु भिक्षुकः ।
तथाऽपि प्रथमो भिक्षुर्ज्ञानेच्छोदयमाप्नुयात् ॥ ३ ॥

महापापादयत्नेन मुच्यते मुनिपुङ्गवाः ।
द्वितीयश्शान्तिदान्त्यादिज्ञानाङ्गेच्छामवाप्नुयात् ॥ ४ ॥

तृतीयोऽखिलवेदान्तश्रवणेच्छामवाप्नुयात् ।
चतुर्थो ज्ञानमाप्नोति वेदान्तश्रवणेन तु ॥ ५ ॥

स एव कर्मसन्न्यासी परहंससमाह्वयः ।
अन्ये काम्यपरित्यागाद्भिक्षुका इति कीर्तिताः ॥ ६ ॥

परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकम् ।
बुद्धिपूर्वकृतंपापं कृत्स्नं दहति वह्निवत् ॥ ७ ॥

शाब्दं ब्रह्मात्मविज्ञानमपरोक्षं महत्तरम् ।
संसारकारणाज्ञानतमसश्चण्डभानुवत् ॥ ८ ॥

अतो विज्ञानलाभाय परहंसो भवेद्द्विजाः ।
कुटीचकाश्च हंसाश्च तथाऽन्ये च बहूदकाः ॥ ९ ॥

ये भविष्यन्ति ते कुर्युः प्राजापत्येष्टिसंज्ञिकाम् ।
आग्नेयेष्टिं द्विजाःकुर्युः परहंसाभिलाषिणः ॥ १० ॥

पश्चात्त्रैधातवीं कुर्युस्सर्वे संयतमानसाः ।
येऽनाहिताग्नयो विप्रास्तेषां नेष्टिर्विधीयते ॥ ११ ॥

स्वस्मिन्नग्नौ तु होमं ते कुर्युः श्रद्धापुरस्सरम् ।
विरजाख्यैर्महामन्त्रैराज्येन चरुणाऽपि च ॥ १२ ॥

पौरुषेण च सूक्तेन स्वस्वशाखागतेन च ।
हुत्वा च हुतशेषन्तु प्राश्याचम्य च सर्पिषा ॥ १३ ॥

पूर्णाहुतिं ततः कुर्युः प्रणवेनाग्निजायया ।
सहाग्निं पुनराजिघ्रेद् "अयंते योनिर्ऋत्वियः" ॥ १४ ॥

इति मन्त्रेण कुर्युस्ते प्रैषोच्चारणमादरात् ।
सन्न्यासाध्वर्युणा दत्तं दण्डं काषायमेव च ॥ १५ ॥

परिगृह्य गुरोः पादौ प्रणम्य श्रद्धया सह ।
वेदान्तश्रवणं कुर्युर्ज्ञानार्थं भिक्षुकोत्तमाः ॥ १६ ॥

॥ इत्यादिप्रमाणानुरोधेन परमहंससन्न्यासाश्रमस्वीकारविधिर्लिख्यते सङ्कल्पादि प्रायश्चित्तान्तम् ॥

॥ अथ क्रमसन्न्यासविधिः ॥

॥ प्रयोगश्च ॥

आदौ शुद्धपादपाणिराचम्य, परमहंसाश्रमं स्वीकरिष्यमाणोऽनाश्रमी चतुरः प्राजापत्यकृच्छ्रानाश्रमी चेत्तप्तकृच्छ्रमेकं वा देशकालशक्त्याद्यनुरोधेन सर्वप्रायश्चित्तं, कर्मविपाकाद्युक्तपरिषद्विधायकप्रायश्चित्तविधिप्रकारेण कुर्यात् । तत्स्वरूपतोऽनुष्ठानाशक्तौ तत्प्रत्याम्नायत्वेन विहितसमुद्रगानदीस्नानानश्वद्वेदपारायणगायत्र्यष्टोत्तरसहस्रतिलहोम, गोदान, तन्मूल्यहिरण्यादिदान, द्वादशब्राह्मणमिष्टान्नभोजन, तत्पर्याप्तद्रव्यादिदानानामन्यतमेन वा, आहिताग्निश्चेत् स्वरूपतोऽनुष्ठानाशक्तौ, "ऐन्द्राग्नेन मृगारेष्ट्या कदाचिन्मित्रविन्दया । पवित्रेष्ट्या, विशुध्यन्ति सर्वे घोराः प्रतिग्रहाः" ॥

वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च ।
ऋतावृतौ प्रयुञ्जानः सर्वपापैः प्रमुच्यते ॥

इत्याद्युक्तचान्द्रायणादिकृच्छ्रप्रत्याम्नायत्वेन विहितमृगारेष्टि; अतिपवित्रेष्टि, पवित्रेष्टि, मित्रविन्देष्टि, वैश्वानरेष्टि, पवमानेष्टीनामन्यतमया वा पापतारतम्येनेष्ट्वा, श्वोभूते कृतमाध्याह्निकक्रियः, ब्राह्मणाननुज्ञाप्य, सङ्कल्प्य, सच्चिदानन्दप्रत्यगभिन्नाखण्डब्रह्मात्मावस्थानरूपनित्यापरोक्षमोक्षसाम्राज्यसिद्ध्यर्थं परमहंसाश्रमस्वीकारं कर्तुमित्यनुज्ञा। करिष्य इति सङ्कल्पः । स्वीकरिष्यमाण आदौ तदङ्गत्वेन देवर्षि दिव्य मनुष्य भूत पितृ मात्रात्मनां सत्यवसुसंज्ञकविश्वेषां देवानां चाक्षय्यतृप्त्यर्थं अष्ट श्राद्धानि पार्वणसङ्कल्पान्नामहिरण्यान्यतमरूपेण, यथा देशकाल विभव शक्त्याद्यनुसारेण करिष्य इति सङ्कल्प्य, वृद्धिश्राद्धवत् सर्वमुपवीतिना कुर्यात् ॥ युग्मश एकैकशो वा वैश्वदेवान्ते वक्ष्यमाणदेवता अक्षतोदकैरुपवीती जले प्रत्येकं द्विर्द्विरञ्जलिना, देवतीर्थेन तर्पयित्वाऽष्टसु दिनेषु पृथक् पृथक्, एकस्मिन् दिने वा समानतन्त्रेण कुर्यात् ॥

॥ श्राद्धदेवताः ॥

आदौ सत्यवसुसंज्ञकविश्वेदेवाः । दिनशः प्रतिवर्गं द्वौ द्वौ विप्रौ । एकैकं वा । एकस्मिन् दिने चेत् सर्वेषां वर्गाणामादावेव द्वावेकं वा यथासंभवं वृणुयात् ॥

देवश्राद्धे—ब्रह्मविष्णुमहेश्वराः । वसुरुद्रादित्या इत्येके ॥

ऋषिश्राद्धे—देवब्रह्मक्षत्रर्षयः ॥ मरीच्यत्र्यङ्गिरः पुलस्त्य पुलहक्रतु प्रचेतो वसिष्ठ भृगु नारदा इत्येके ॥

दिव्यश्राद्धे—अष्टौ वसवः एकादशरुद्रा द्वादशादित्याः । हिरण्यगर्भविराट्प्रजापतय इत्येके ॥

मनुष्यश्राद्धे—सनकसनन्दनसनत्कुमाराः । सनकसनन्दनसनातनकपिलासुरिवोढृ पञ्चशिखा इत्येके ॥

भूतश्राद्धे—पृथिव्यप्तेजोवाय्वाकाशरूपभूतपञ्चकम् । चक्षुरादीन्द्रियगणः । चतुर्विधभूतग्रामाश्च । आकाशादिभूतपञ्चकमित्येके ॥

पितृश्राद्धे — पितृपितामहप्रपितामहाः ॥ कव्यवाडनल सोमार्यमाग्निष्वात्तबर्हिषत्सोमपा इत्येके ॥

मातृश्राद्धे — मातृपितामहीप्रपितामह्यः ॥ गौरी पद्मा शचीमेधा गायत्री विजया जया देवसेना स्वधा स्वाहा इत्येके ॥ मातामह मातुः पितामह मातुः प्रपितामहाः सपत्नीका इत्यपि पक्षान्तरम् ॥

आत्मश्राद्धे—आत्मान्तरात्मपरमात्मानः । परमात्मैवेत्येके ॥ एवंरूपान् ब्राह्मणान् यथाशक्त्युपचारैस्सन्तोष्य स्वस्ति वाचयित्वा, प्रदक्षिणनमस्कारान् कृत्वा, प्रार्थयेत् ॥ "सन्न्यासार्थं मया श्राद्धं

कृतमेतद्द्विजोत्तमाः । अनुज्ञां प्राप्य युष्माकं सिद्धिं यास्यामि शाश्वतीम् " इति प्रार्थ्य, ताम्बूलदक्षिणाद्युपचारैस्सन्तोष्य विसृजेत् ॥ अथापरेद्युः प्रातः प्रातःकृत्यं निर्वर्त्य ब्राह्मणाननुज्ञाप्य परमहंसाश्रमं स्वीकरिष्ये इति सङ्कल्प्य पुण्याहं वाचयित्वा, पञ्च सप्तवाकेशान् अवशेष्य केशश्मश्रुलोमनखानि वापयित्वा, (कक्षोपस्थवर्जमित्येके) (कण्ठादुपरीत्यन्ये) यथाविधि वापयित्वा स्नात्वा वाससी परिधाय, धृतभस्मोद्धूलन तिर्यक् त्रिपुण्ड्ररुद्राक्षः, पञ्चगव्यपुण्याहादिशुद्धः उपकल्पयते दण्डादीनि । पुत्रादिभ्यो दायादीनि दत्वा स्वांशं दक्षिणाद्यर्थं होमाद्यर्थं चावशिष्यान्यत्सर्वं ब्राह्मणेभ्यो दद्यात् ॥ दण्डकटिसूत्रकौपीनकन्थाशिक्यादीनि येन चान्येनार्थी भवति, तान्यप्युपकरणानि सक्तु पयोदधिघृत दर्भपवित्र दर्भमुष्टि होमद्रव्य पात्राणि यज्ञपात्राणि च यथासम्भवमुपकल्पयते । ग्रामसीमान्ते, अग्न्यगारे, देवालये पुण्यक्षेत्रादिषु वा । आहिताग्निश्चेदग्न्यगार एव स्थित्वा, द्विदर्भपवित्रेण सह ब्रह्माञ्जलिं विधाय, " ओं ब्रह्मणे नमः । ओमिन्द्राय नमः, ओं सूर्याय नमः । ओं सोमाय नमः । ओमात्मने नमः । ओमन्तरात्मने नमः । ओं ज्ञानात्मने नमः । ओं सत्यात्मने नमः ओंपरमात्मने नमः ।" इत्युच्चैर्जपेत् । ओं ब्रह्मणे नमः । ओमिन्द्राय नमः । ओमात्मने नमः । ओमन्तरात्मने नमः । ओं परमात्मने नमः । इति मनसा जपेत् ॥ (इत्येके) ॥ अपउपस्पृश्य । द्विदर्भपवित्रपाणिर्ब्रह्माञ्जलिं विधाय, " ओं नमो ब्रह्मणे, नमो अस्त्वग्नये, नमः पृथिव्यै, नम ओषधीभ्यः, नमो

वाचे, नमो वाचस्पतये, नमो विष्णवे, बृहते करोमि ।" "इषेत्वोर्जेत्वा वायवस्थोपायवस्थ देवोवस्सविता, प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मावस्तेन ईशत माघश ँसो रुद्रस्यहेतिः परिवो वृणक्तु ध्रुवा अस्मिन् गौपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि " ॥ अग्निमीळे + मम् ॥ अग्न आयाहि + बर्हिषि ॥ शन्नो + नः ॥ इति स्वस्ववेदादि पूर्वं जपित्वा ओमिति सक्तुमुष्टिं प्राश्याचम्य, नाभिदेशमभिमृशेत् । आत्मनेस्वाहा । अन्तरात्मने स्वाहा । परमात्मने स्वाहा । (प्रणवेनेत्येके) ॥ आज्यं दधिपयः, ओमिति प्रत्येकं त्रिस्त्रिः प्राश्नीयात् । त्रीन् संसृज्य त्रिः । त्रिवृदसि । प्रवृदसि । संवृदसि । इति वा प्रत्येकं त्रिस्त्रिः, संसृज्य त्रिः प्राश्याचम्य । ओं भूस्सावित्रीं प्रवेशयामि । तत्सवितुर्वरेण्यम् । ओं भुवः सावित्रीं प्रवेशयामि । भर्गो देवस्य धीमहि । ओं ँसुवः सावित्रीं प्रवेशयामि । धियोयोनः प्रचोदयात् । ओं भूर्भुवस्सुवः । सावित्रीं प्रवेशयामि । तत्सवितुः + यात् ॥ इति वा त्रिस्संसृज्य त्रिः । इति वा प्राश्नीयात् । आज्याद्यलाभे ' आपः पुनन्तु + प्रतिग्रह ँ स्वाहा " इत्यपो वा प्राश्याचामेत् ॥ अनन्तरं विरजापुरुषसूक्तहोमार्थं स्वंस्वमौपासनाग्निम् अनग्निश्चेच्छ्रोत्रियागाराहृतलौकिकाग्निं प्रतिष्ठापनविधिना प्रतिष्ठाप्य, चतुष्पात्रप्रयोगेणाज्यं संस्कृत्योत्पूय स्रुचि चतुर्गृहीतं . गृहीत्वा, "ओं भूर्भुवस्सुवस्स्वाहा " इति हुत्वा, पुनस्स्वस्ववेदादिना तत्तद्या-

हृत्वा वा हुत्वा होमशेषं समाप्याज्यशेषकणिकाः आत्मने नमः अन्तरात्मने नमः परमात्मने नमः इति क्रमेण प्राश्याचामेत् ॥ एवमन्तं सर्वत्र समानम् ॥

आहिताग्निश्चेदनन्तरमस्तमयात्पूर्वमेव अपरेण गार्हपत्यम् दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति। परमहंसाश्रमं स्वीकरिष्यमाण आग्नेय्यावैश्वानर्येष्ट्या यक्ष्ये, तेन परमेश्वरं प्रीणयानि। कुटीचकादित्रयाणां प्राजापत्येष्टिः। विद्युदसि + मि ॥ अध्वर्य्वादिऋत्विजो वृत्वाग्नीन्विहृत्यान्वादधाति। अन्वाधानादि पौर्णमासतन्त्रं बर्हिराहृत्य, पयस्वतीरिति भोजनादि व्रत प्रवेशः। वेदं कृत्वोपवेषः। समूह्यालङ्कृत्य। गार्हपत्य आज्यं विलाप्य, स्रुचि चतुर्गृहीतं गृहीत्वाऽऽहवनीये, "ओं॰ स्वाहा" इति पूर्णाहुतिं जुहोति। एतद्ब्रह्मान्वाधानमित्याचक्षते ॥ एतदन्तं कृत्वा अनन्तरं मरणेऽपि सन्न्याससिद्धिः ॥ अथ सायंसन्ध्यान्ते सायमग्निहोत्रमौपासनञ्च हुत्वाऽग्नीन् परिस्तीर्याहवनीयस्य दक्षिणतो ब्रह्मायतने कृष्णाजिन उदङ्मुख उपविशति। अनाहिताग्निस्त्वौपासनस्य। दक्षिणतः पूर्ववदुपविश्य, सन्मार्गेण रात्रौ जागरणं कुर्यात् ॥ ब्राह्मे मुहूर्ते उत्थाय शौचादिकृत्वा स्नात्वा शुद्धवस्त्र भस्मोद्धूलन तिर्यक् त्रिपुण्ड्र रुद्राक्षमालाधरः। पुरुषसूक्तविरजाहोमकर्म करिष्य इति सङ्कल्प्य, चरुं श्रपयित्वाऽभिघार्योत्तरतउद्वास्याभिघार्याग्निरूपसमाधानाद्याज्यभागान्ते स्वस्वशाखोक्तपुरुषसूक्तेन प्रत्यृच

विरजामन्त्रैश्च चरुणाऽवदानधर्मेण मेक्षणेन हस्तेन वोपघातं जुहोति। पुरुषसूक्तं प्रत्यृचमष्टादशभिष्षोडशभी ऋग्भिर्वा (१८, १६) आहुतयः। विरजामन्त्रास्तु द्राविडपाठ एकादश, आन्ध्रपाठे तु विंशतिः। यथा।

प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजाविपाप्मा भूयास॰ स्वाहा ॥ १ ॥ वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूति स्सङ्कल्पा मे शुध्यन्तां + स्वाहा ॥ २ ॥ शिरः पाणिपाद पार्श्व पृष्ठोदर जङ्घा शिश्नोपस्थ पायवो मे शुध्यान्तां + स्वाहा ॥ ३ ॥ त्वक्चर्म मा॰ सरुधिरमेदोऽस्थि मज्जा मे शुध्यन्तां + स्वाहा ॥ ४ ॥ शब्दस्पर्श रूपरस गन्धामे शुध्यन्तां + स्वाहा ॥ ५ ॥ पृथिव्यप्तेजो वाय्वाकाशा मे शुध्यन्तां + स्वाहा ॥ ६ ॥ अन्नमय प्राणमय मनोमय विज्ञानमयानन्दमया मे शुध्यन्तां + स्वाहा ॥ ७ ॥ विविट्टि स्वाहा ॥ ८ ॥ घषोत्काय स्वाहा ॥ ९ ॥ उत्तिष्ठ पुरुष हरित लोहित पिङ्गलाक्षि देहिदेहिददापयितामे शुध्यन्तां + स्वाहा ॥ १० ॥ ओं गूँ स्वाहा ॥ ११ ॥

॥ इति द्राविडपाठ एकादश ॥

आन्ध्र पाठेतु—प्राणापान व्यानोदान समानामे शुध्यन्तां ज्योतिरहं विरजाविपाप्मा भूयास॰ स्वाहा ॥ १ ॥ वाङ्मनश्चक्षुश्श्रोत्र जिह्वाघ्राणरेतोबुद्ध्याकूतिस्सङ्कल्पा मे शुध्यान्तां + स्वाहा ॥ १ ॥ त्वक् चर्ममा॰स रुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां + स्वाहा

॥ ३ ॥ शिरः पाणिपाद पार्श्व पृष्ठोरूदर जङ्घाशिश्नोपस्थपायवो
शुध्यन्तां + स्वाहा ॥ ४ ॥ उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्षि
देहिदेहि ददापयिता मे शुध्यन्तां + स्वाहा ॥ ५ ॥ पृथिव्यापस्तेजो
वायुराकाशा मे शुध्यन्तां + स्वाहा ॥ ६ ॥ शब्दस्पर्शरूपरस
गन्धा मे शुध्यन्तां + स्वाहा ॥ ७ ॥ मनोवाकायकर्माणि मे
शुध्यन्तां +स्वाहा ॥ ८ ॥ अव्यक्तभावै रहङ्कारै ज्योतिरहं विरजा
+ स्वाहा ॥ ९ ॥ आत्मा मे शुध्यन्तां ज्योतिरहं + स्वाहा ॥ १० ॥
अन्तरात्मा मे + स्वाहा ॥ ११ ॥ परमात्मा मे + स्वाहा ॥ १२ ॥
क्षुधे स्वाहा ॥ १३ ॥ क्षुत्पिपासाय स्वाहा ॥ १४ ॥ विविट्यै
स्वाहा ॥ १५ ॥ ऋग्विधानाय स्वाहा ॥ १६ ॥ कषोत्काय स्वाहा
॥ १७ ॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम् ॥ अभूतिमसमृद्धिं
च सर्वां निर्णुद मे पाप्मानꣳ स्वाहा ॥ १८ ॥ अन्नमय प्राणमय
मनोमय विज्ञानमयमानन्द मयमात्मा मे शुध्यन्तां + स्वाहा ॥ १९ ॥
ओꣳ स्वाहा ॥ २० ॥ इत्यान्ध्रपाठे मन्त्राः ॥ एवं चरुणा-
ज्येन च हुत्वा स्विष्टकृदादि होमशेषं समाप्य चरुशेषं प्राश्याचम्य
ब्राह्मणे सदक्षिण वासस्स्वर्णपात्रं धेनुंच दत्वोद्वास्य "ओं भूर्भुवस्सु-
वस्स्वाहे"ति पूर्णाहुतिं हुत्वा सम्मासिञ्चन्तु मरुतस्समिन्द्रस्संबृहस्पतिः
सम्मायमग्निस्सिञ्चत्वायुषा च बलेन चायुष्मन्तं करोतु माम् इत्युपस्थाय,
"याते अग्ने + एहि" इति हस्तं प्रताप्य मुखायाहरते । "अयं
ते योनिः + रयिमिति चावजिघ्रत्यौपासनम् । लौकिकश्चेन्न समारोपः।

आहिताग्निश्चेत् गार्हपत्यसमारोपणानन्तरमेव सम्मासिञ्चन्त्वित्युपस्था-
नान्तं कृत्वा, प्रातस्सन्ध्यामुपस्थाय, प्रातरग्निहोत्रमौपासनञ्च
हुत्वा, उदित आदित्य इत्यादि निर्वापणकालेऽग्निर्वैश्वानरो देवता
द्वादशकपालानि अग्नये वैश्वानराय जुष्टं निर्वपामीत्यादिकपालोपधान -
काले युग्मानामुपवृत्तिः । न पार्वणहोमो नारिष्ठान् हुत्वा विरुज्य
प्राशित्रं । चतुर्धाकरणकाले स्वांशसर्वस्वदक्षिणां दत्वा यज्ञो बभूव
यज्ञसमवर्ज्यं सिद्धमिष्टिस्सन्तिष्ठते । आहवनीयं परित्यज्य त्रैधातवी-
येष्ट्या यक्ष्ये । सर्वेषां । विद्युदसि । ऋत्विग्वरणान्वाधानादि
त्रैधातवीयगꣳ हविः । आमावास्यं तन्त्रं पयस्वतीः । सप्तदश
सामिधेन्यः । वेदं कृत्वा वेदिः । द्वादश कपालानि । निर्वा-
पणकाले इन्द्राविष्णुभ्यां जुष्टं निर्वपामि व्रीहीन् । इन्द्राविष्णु-
भ्यां जुष्टं निर्वपामि यवान् । इन्द्राविष्णुभ्यां जुष्टं निर्वपामि व्रीहीन् ।
यवमध्यमं निरुप्य नानाबीजधर्मेण व्रीहीनवहत्य यवानवहन्ति
व्रीहीन् पिष्ट्वा यवान् पिनष्टि । कपालोपधानकाले अष्टावुपधाय
तूष्णीं चत्वारि व्रीहिपिष्टान्येकस्यां पात्र्यामन्यस्यां यवमयानि संवपति ।
व्रीहिप्रथमोत्तमं यवमध्यममधिश्रयति । उपर्युपरि पृथुर्भवेत् । ऊर्ध्वा-
धस्सुषिरं कीचकनालमृदुमथनेन । ऊर्ध्वस्यायिहविश्लितयं यथा भवति
तथा लौकिकोपायः कर्तव्यः । यो नः कनीयः । अपतमिन्द्राविष्णू
भुवनान्नुदेतां + य । ममाग्ने पञ्चहोता । सप्तदश सामिधेन्यः ।
उष्णिहः ककुभौ धाय्ये । प्रसो अग्ने इत्यादिहोत्रे यथासमाम्नातं ।

हिरण्यं तार्क्ष्यं धेनुं च ददाति । अग्नये हिरण्यमित्यादि हिरण्यम्
सोमाय वासः मास्त्वाकृन्तन्निति च तार्क्ष्यं रुद्राय गामिति धेनुम्
इति प्रतिग्रहः । पुरोडाशत्रयस्याप्यवदानधर्मेण सहावदा-
मन्यत्सर्वं यथासम्भवं प्रकृतिवत् । अथ प्रासंगिकी । एवमिष्टीन
स्वरूपतोऽनुष्ठानासम्भवे इष्टिद्वयस्य स्थाने पृथक् पृथगाहवनीयं प्रणी
द्वादशगृहीतेन स्रुचं पूरयित्वा तत्तत्पुरोनुवाक्यामनूच्य याज्यय
जुहोति । पूर्णा वा । एवमन्त्येष्टिं समाप्याहवनीये दारुपात्राणि । पुत्रादि
तैजसादिलोहमयाश्ममयानि । जले मृन्मयानि च प्रक्षिपेत् । अरणी
गार्हपत्ये च एवमपि कर्तुमशक्तस्स्वे स्वेऽग्नौ व्याहृत्या पूर्णाहुतिं हुत्वा
"सम्मासिञ्चन्तु" इत्युपस्थाय याते अग्ने इत्यग्निमाजिघ्रेत । आत्मनि
समारोप्य प्रैषमन्त्रानुच्चरेत् । आतुरश्चेदौपसनानन्तरं व्याहृतिभि-
श्चतसृभिस्स्वे स्वेऽग्नौ हुत्वा, पुनरोगँ स्वाहेति च हुत्वा, सम्मेत्युप-
स्थाय यात इत्यग्निनाजिघ्रेत् । इति ॥ आहिताग्निरिष्टिद्वयस्थाने पूर्णा-
हुतिमाहवनीये हुत्वा, पूर्ववत् सम्मेत्युपस्थायाजिघ्रेत गार्हपत्यमौपास-
नञ्च । उत्सृष्टानुगताग्नीनां विधुरब्रह्मचारिणां च लौकिकाग्नि-
होममात्रमेव । नात्मसमारोपः । यथोक्तहोमानुपपत्तावत्यातुरस्य सर्वत्र
पूर्णाहुत्यैव समाधानम् ।

अग्न्यलाभेऽनुसन्धानानवकाशे वा जलेन प्रतिविधेयं
श्रौतमन्त्रतः । तत्प्रकारस्तु—किञ्चित्स्थालीगतं जलं दक्षहस्तेन
गृहीत्वा भूमिस्थान्यपात्रस्थे जले "एषवा अग्नेर्योनिर्यः प्राणः

प्राणं गच्छ स्वां योनिं गच्छ स्वाहा । आपो वै सर्वदेवता-
सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा । इत्याहुतिद्वयं हुत्वा,
स्थालीजलशेषेण पुत्रैषणा वित्तैषणा दारैषणा मयात्यक्ता स्वाहा इति
सर्वं हुत्वा, पात्रस्थं हुतजलं सर्वं अभयं सर्वभूतेभ्यो मत्तस्स्वाहा
इति प्राश्नीयात् । एतेनैवातुरस्य सर्वाङ्गपरिसमाप्तिः ॥

इति प्रासङ्गिकीं व्यवहृतिं परिसमाप्य प्रकृतमनुसरति ॥

क्रमसन्न्यासे—आहिताग्निरिष्टिद्वयानन्तरं पूर्णाहुतिद्वयानन्तरं
वा, अनाहिताग्नीनां विरजाहोमादिपूर्णाहुत्यनन्तरं वाऽग्निसमारोपः ।
आहिताग्नेस्तु — गार्हपत्यसमारोपणानन्तरमेवौपासनाग्निसमारोपः ।
अनन्तरं सर्वेषां समानं नद्यादौ कटिदघ्नजले स्थित्वा असम्भवे स्थले वा
स्थित्वाऽऽसीनो वा व्यस्तसमस्तव्याहृतिषु सावित्रीप्रवेशं कुर्यात् ।
ओं भूः व्याहृतौ सावित्रीं प्रवेशयामि । तत्सवितुर्वरेण्यम् । ओं
भुवः व्याहृतौ सावित्रीं प्रवेशयामि । भर्गो देवस्य धीमहि । ओं
सुवः व्याहृतौ सावित्रीं प्रवेशयामि । धियो योनः प्रचोदयात् ।
ओं भूर्भुवस्सुवः व्याहृतौ सावित्रीं प्रवेशयामि । "तत्सवितुर्व-
रेण्यं, भर्गोदेवस्य धीमहि, धियो योनः प्रचोदयात्" इत्युक्त्वा व्याहृतीः
प्रणवाङ्गेषु विलापयेत् । अं प्रणवे व्याहृतिं प्रवेशयामि । भूः । उं
प्रणवे व्याहृतिं प्रवेशयामि । भुवः । मं प्रणवे व्याहृतिं प्रवेशयामि ।
सुवः । ओं प्रणवे व्याहृतिं प्रवेशयामि । भूर्भुवस्सुवः । इत्युक्त्वा
पुनस्सावित्रीं व्याहृतिषु प्रविष्टां तामेव प्रणवाकारां सर्वशब्दप्रकृतिरूपां

यावन् जपेत् । यश्छन्दसां + य ॥ अहं वृक्षस्य + वचनम ॥ आशु
शिशवान: + तु ॥ इत्येतैर्मन्त्रैः प्रार्थयित्वा ब्राह्मणाननुज्ञाप्य नद्यादौ
नाभिदघ्ने जले सूर्याभिमुखः स्थित्वोर्ध्वबाहुः प्रैषमन्त्रान् वक्ष्यमाण
प्रकारेण मन्द्रमध्यतारस्वरेण त्रिवारं स्वयमेव ब्रूयात् । तेनैव
परमहंसो भवति । कुटीचकादित्रयस्य तु शिखायज्ञोपवीतगायत्र्यादि
कर्मशेषसत्वान्न प्रैषमन्त्रोच्चारणम् एषणात्रयत्यागमन्तरेण ॥ तत्प्रकारस्तु
ओं भूः सन्न्यस्तं मया । ओं भुवः सन्न्यस्तं मया । ओं सुवः
सन्न्यस्तं मया । ओं भूर्भुवस्सुवः सन्न्यस्तं मया । इति च त्रिः ।
एवमुत्तमोच्चारे तु यावच्छत्तचुर्थैर्ब्रूयात । पूर्वोक्तः प्रणवे व्याहृतिं
विलापयेत । अं प्रणवे व्याहृतिं प्रविलापयामि । ओं भूः । उं प्रणवे
व्याहृतिं प्रविलापयमि । ओंभुवः । मं प्रणवे व्यहृतिं प्रविलाप-
यामि । ओं सुवः । ओं प्रणवे व्याहृतिं प्रविलापयामि । ओं
भूर्भुवस्सुवः ओं ॥ इत्युक्त्वा पुत्रैषणा वित्तैषणा दारैषणा मया
त्यक्ता स्वाहा । अभयं सर्वभूतेभ्यो मत्तस्स्वाहा इति च जलाञ्जलिं
पीत्वा प्रणवेन यज्ञोपवीतमुन्मुच्य "बहिर्विसेर्न त्वमन्तः प्रविश्य मध्ये
यज्ञं परमं पवित्रं । अथो बलं ज्ञानवैराग्यमेधास्सत्वस्य शुद्धिं
सन्तत्यं मे प्रयच्छ" इति छित्वा जले प्रक्षिप्य, प्रणवेन शिखामु-
त्पाट्य कटिसुत्रं च च्छित्वा वस्त्रादीनि च प्रणवेन जले त्यक्त्वा,
जातरूपधर उत्तराभिमुखश्चरेत् प्रणवार्थमनुसन्दधानो, विद्वानहं
ब्रह्मास्मीति । अनधिकार्यपि ब्राह्मण अत्यातुरश्चेत् कर्मणा मनसा वाचा
वा प्रैषमन्त्रोच्चारणमात्रेणैव सन्न्यासिद्धिरिति सर्वशास्त्राभिप्रायः ॥

अथ विद्वांश्चेल्लोकोपसङ्ग्रहार्थं शिष्यादिभिर्दत्तकौपीन
काषायाच्छादनादिकं गृहीत्वा विचरेत ॥ विविदिषुश्चेत् काषाया-
दिकं वैराग्याद्यानुगुण्येन च भूत्वाऽचार्यमुपसङ्गम्य काषायकौपी-
नाच्छादनदण्डकमण्डल्वादीनि चाचार्यमुखात् स्वीकृत्य "अधीहि
भगवो ब्रह्मे"—त्याचार्यपादयोस्साष्टाङ्गं प्रणमेत् । तत आचार्य-
स्सोपस्करं तं शिष्यत्वेन परिगृह्य देवालये नदीतीरे शुचौ देशे वा
गोमयेनोपलेपिते रङ्गवल्याद्यलङ्कृते दिक्षु पूर्णकुम्भधूपदीपादिभि
विराजिते पुण्याहादिपवित्रिते उपनिषदादिवेदघोषसमन्विते स्वस्वगुरुक
सम्प्रदायक्रमेण मण्डलादि कल्पयित्वा तत्र शिष्यमुदङ्मुखमुपवेश्य
पुरतश्शङ्खं सजलं साधारं प्रतिष्ठाप्य प्रणवेन पञ्चोपचारैस्संपूज्याष्टोत्त-
रशतं प्रणवं जपित्वा, श्रीरुद्र नमक चमक पुरुषसूक्त पञ्चब्रह्म मन्त्रानुप
निषदश्च ब्राह्मणैर्जापयित्वा तेन शङ्खोदकेन प्रणवेनावृतेन शिष्य-
शिरस्यभिषिच्य कौपीन काषायादीनि प्रणवेन धारयित्वा पादौ
प्रक्षाल्याचान्तं शिष्यं अग्निरित्यादिभिस्सप्तभिर्मन्त्रैस्सहंसमगवपञ्चा-
क्षरेण (हंसोन्नमश्शिवायेति पञ्चाक्षरमंत्रः) च शुद्धसितभस्मना शिष्यस्य
सर्वाङ्गोद्धूलनं सजलेन भस्मना शिरोललाटवक्षस्स्कन्धादिषु विशेष
त्रिपुण्ड्रं धारयित्वा ऋषिच्छन्दोदेवताध्यानादिपूर्वकं प्रणवमहा-
वाक्यानि च सार्थप्रपञ्चमुपदिशेत ॥

॥ अथोपदेशः ॥

अस्य श्रीप्रणवमहामन्त्रस्य—अन्तर्यामी भगवानृषिः । देवी
गायत्री च्छन्दः । परमात्मा देवता । ज्ञानमयगोत्रोत्पन्नः । ज्ञानाभि-

र्मुखम् । तेजोवर्णः । उदात्तस्स्वरः । अकारस्याग्निर्ऋषिः । गायत्री-च्छन्दः । ब्रह्मादेवता । उकारस्य वायूऋषिः । उष्णिक् च्छन्दः । महाविष्णुर्देवता । मकारस्य सूर्य ऋषिः । अनुष्टुप्च्छन्दः । महेश्वरो देवता । अर्धमात्राया वरुणऋषिः । विराट्च्छन्दः । पुरुषो देवता । ध्वनेर्ब्रह्मा ऋषिः । अव्यक्तगायत्री च्छन्दः । परमात्मा देवता । अं बीजम् । उं शक्तिः । मं कीलकम् । मोक्षार्थे विनियोगः ।

"ऋषिच्छन्दो देवताश्च गोत्रवर्णस्वरान्मुखम् । बीजं शक्ति कीलकं च विनियोगं च कीर्तयेत् ॥" इत्युक्तप्रकारेण ऋष्याद्य-नन्तरं करषडङ्गानि न्यसेत् ।

भूरग्न्यात्मने तुषारवर्णायाङ्गुष्ठाभ्यां नमः । हृदयायनमः ॥१॥ [illegible] प्रजापत्यात्मने स्फटिकवर्णाय तर्जनीभ्यां नमः । शिरसेस्वाहा [illegible] ॥ भुवः सूर्यात्मने श्यामवर्णाय मध्यमाभ्यां नमः । शिखायै [illegible] ॥ ३ ॥ महो ब्रह्मात्मने नीलवर्णायानामिकाभ्यां नमः । [illegible]य हुम् ॥ ४ ॥ जनो ज्ञानात्मने कृष्णवर्णाय कनिष्ठिकाभ्यां [illegible] नेत्रत्रयाय वौषट् ॥ ५ ॥ तपस्सत्यात्मने श्वेतवर्णाय करतल-[illegible]पृष्ठाभ्यां नमः । अस्त्राय फट् ॥ ६ ॥ [illegible]सुवरोमिति दिग्बन्धः ॥ अथ ध्यानम्

"स्फुरत्तारकसङ्काशं विद्युत्पुञ्जसमप्रभम् ।
हृदिस्थं प्रणवं ध्यायेदोमिति ज्योतिरूपकम् ॥ २ ॥

विष्णुं भास्वात्किरीटाङ्गदवलयगलाकल्पहारोदराङ्घ्रिश्रेणीभूषासुवक्षो-मणिमकुटमहाकुण्डलामण्डिताङ्गम् । हस्तोद्यच्छङ्खचक्राम्बुजगदममलं पीतकौशेयमाशाविद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥ १ ॥

लं पृथिव्यात्मने गन्धं कल्पयामि ॥ कनिष्ठिकाभ्यां नमः ॥ २ ॥
हं आकाशात्मने पुष्पाणि कल्पयामि । अङ्गुष्ठाभ्यां नमः ॥ ३ ॥
यं वाय्वात्मने धूपं कल्पयामि । तर्जनीभ्यां नमः ॥ ४ ॥
रं वह्न्यात्मने दीपं कल्पयामि । मध्यमाभ्यां नमः ॥ ५ ॥
वं अमृतात्मने अमृतं निवेदनं कल्पयामि । अनामिकाभ्यां नमः ॥६॥
सं सर्वात्मने सर्वोपचारान् कल्पयामि । अञ्जलिं दद्यात् ॥ ७ ॥
इति ॥ पञ्चोपचाराः ॥

मूलम् ॥ ओम् ॥ षडङ्गाद्युपचारान्तं पूर्ववत् ॥

॥ अथ महावाक्यम् ॥

अस्य श्रीमहावाक्यमहामन्त्रस्य हंस । ऋषिः । अव्यक्तगायत्री च्छन्दः । परमहंसो देवता ।

हं बीजम् । सः शक्तिः । सोऽहं कीलकम् । मोक्षार्थे विनियोगः ॥

ओं सत्यं ज्ञानमनन्तं ब्रह्म अङ्गुष्ठाभ्यांनमः । हृदयाय नमः ॥१॥
ओं नित्यानन्दो ब्रह्म तर्जनीभ्यां नमः ॥ ओं शिरसे स्वाहा ॥ २ ॥
ओं नित्यानन्दमयं ब्रह्म मध्यमाभ्यां नमः । शिखायै वषट् ॥ ३ ॥
ओं यो वै भूमा अनामिकाभ्यां नमः । कवचायहुम् ॥ ४ ॥

ओं यो वै भूमाऽधिपतिः कनिष्ठिकाभ्यां नमः। नेत्रत्रयाय वौषट् ॥५॥
ओं एकमेवाद्वितीयं ब्रह्म करतलकरपृष्ठाभ्यां नमः । अस्त्रायफट् ॥६॥
र्भुवस्सुवरोमिति दिग्बन्धः ॥

॥ ध्यानम् ॥

नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं । विश्वातीतं गगनस
॥ तत्त्वमस्यादिलक्ष्यम् ॥ एकं नित्यं विमलमचलं सर्वधीसाक्षि-
म् । भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ १ ॥ अखण्डैक-
शान्तं सच्चिदानन्दलक्षणम् । निर्द्वन्द्वं परमं ब्रह्म स्वात्माभिन्न
न्तये ॥ २ ॥ लमित्यादि पञ्चपूजा ॥

मूलम्—"ओं अहं ब्रह्मास्मि ॥ प्रज्ञानं ब्रह्म ॥ तत्त्वमसि ॥
आत्मा ब्रह्म ॥ इति ॥ स्वस्वशाखावाक्यं पूर्वमुपदेष्टव्यं ॥
ाद्युपचारान्तं पूर्ववत् ॥ इत्युपदिश्य । सम्प्रदायानुसा-
विद्यारण्यविद्यानन्दतीर्थभारतीन्द्रसरस्वतीत्यादीनामन्यतमनाम
॥ तदेतद्योगपट्टमित्याचक्षते ॥ अथ शिष्योऽपि स्वपूर्णतां
श्रीगुरोरात्मनश्चाभेदभावनया चिरं तिष्ठेत ॥ गुरुरपि
शिष्यमात्मत्वेन मनसा नमस्कुर्यात् ॥ अनन्तरं शिष्योऽपि
गुरुं साष्टाङ्गं नमस्कुर्यात् ॥ अथ "सखा मे गोपाये"ति
सम्प्रदायेनपरशुमुद्रादिलक्षितं ग्राहयित्वा प्रणवेन कमण्डलुं
मित्यादि च मुद्रादि दत्वा, ग्राहयित्वा, सम्प्रदायानुसारेणा-
दिशेत् ॥ इत्युपदेशविधिः ॥

॥ अथ नित्यानुष्ठानविधिः ॥

"ब्राह्मे मुहूर्ते उत्थाये"त्यादि शौचाचमनस्नानादिशुद्धः, सितभस्मोद्धूलनतिर्यक्त्रिपुण्ड्ररुद्राक्षधारणान्तं विधिवत्कृत्वा, जला-नुष्ठानंकुर्यात् ॥ प्रणवेन त्रिः चतुर्वाऽप आचम्य, चक्षुर्नासिका-श्रोत्र हृदय शिरांस्यङ्गुलीभिः स्पृशेत् । प्रणवेन त्रिः प्राणानायम्य । प्रातस्सन्ध्यानुष्ठानं करिष्ये इति सङ्कल्प्य, गुर्वादिवन्दनं कुर्यात् ॥

ओं गुरुभ्यो नमः । ओं परमगुरुभ्यो नमः । ओं परमेष्ठि-गुरुभ्यो नमः । ओं परापरगुरुभ्यो नमः । शिवादिपरम्परा गुरुभ्यो नमः । व्यासाचार्येभ्यो नमः । श्री शुकाचार्येभ्यो नमः । श्रीमच्छङ्करभगवत्पादाचार्येभ्यो नमः । ब्रह्मविद्यासम्प्रदायपरम्परा-चार्येभ्यो नमः । इति दण्डवन्दनं कृत्वा प्रणवस्य ऋष्याद्युपचारान् कृत्वा जले प्रणवं विलिख्य जलाध्यक्षं विष्णुं, "विष्णुंभास्वत्..." ध्यात्वा, ओमिति द्वादशवारमभिमन्त्र्य, द्वादशवारं तर्पयित्वा, आत्मानं तथा प्रोक्ष्य, तथापश्च, प्राश्य, आत्मानं तर्पयामि । अन्त-रात्मानं तर्पयामि । ज्ञानात्मानं तर्पयामि । जीवात्मानं तर्पयामि । परमात्मानं तर्पयामि । अहं ब्रह्मास्मि तर्पयामि इति तर्पयित्वा, ओमित्यष्टोत्तरशतं तर्पयित्वा ॥

॥ अथ दण्डानुष्ठानम् ॥

"सखा मे गोपायोजस्सखायोसीन्द्रस्य वज्रोऽसि वार्त्रघ्नश्शर्म मे भव यत्पापं तन्निवारय ॥ यत इन्द्रस्य वज्रोसि हृद्धाकायाघनाशक,

सखा मे हितकृद्भूया ब्रह्ममुद्रे नमोऽस्तुते ॥ मातापितृसमो दण्डो भ्राता च गुरवस्तथा । परबोधकहेतुश्च ब्रह्ममुद्रे नमोऽस्तु ते" ॥ इति दण्डं गृहीत्वा । एवमेव सर्वत्र दण्डग्रहणमन्त्रः ॥ दण्ड मूलेन जले ओं विलिख्य, द्वादशवारं तर्पयित्वा, सर्वत्र प्रणवो मन्त्रः, तथाग्रेण द्वादशवारं प्रतिपर्व षड्वारमवान्तरं त्रिः प्रोक्ष्य ब्रह्ममुद्रायां श्रीरुद्रचमकपुरुषसूक्तपञ्चब्रह्ममन्त्रैः प्रणवेन च प्रोक्ष्य, दण्डमूलेन प्रणवं विलिख्य, पादयोः प्रोक्ष्य, अग्रेण, शिरसि, मूलेन पितृभ्यस्स्वधाऽस्तु पितृतीर्थेन सकृत् दण्डमूलेन तर्पणम् । देवेभ्यो नमः अग्रेण देवतीर्थेन तर्पणम् ।

"ये केचास्मत्कुले जाता नाम गोत्रविवर्जिताः ।"
"ते सर्वे तृप्तिमायान्तु दण्डसम्बन्धवारिणा ॥" इति

दण्डमूलेन पितृतीर्थेन तर्पयित्वा, ओं पूर्ववत् त्रिराचम्य [illegible] उत्थाय, "श्रीगुरुभ्यो नमः" इत्यादि पूर्ववन्नमस्कृत्य [illegible]न्द्राय नमः,' इत्यादि 'ह्रीं विष्णवे नमः" इत्यन्तं, [illegible]क्षिण्येन दश दिक्पालवन्दनं च कृत्वाऽथ स्थलानुष्ठानं कुर्यात् ॥
[illegible] प्रकारान्तरेण सम्प्रदायभेदेन जलानुष्ठानम्—

"अन्तर्हृदि नियन्तारं बहिश्च गुरुरूपिणम् ।
उभयत्राऽपि शर्वाख्यं तं वन्दे पार्वतीपतिम् ॥

ओं गुं गुरुभ्यो नमः । सर्वत्रादौ ओम् इत्यनुषज्यते । ओं गं गणपतये नमः । लम् इन्द्राय नमः । + ह्रीं विष्णवे नमः । श्रुति-

स्मृतिपुराणानामालयं करुणालयम् । नमामि भगवत्पादशङ्करं लोकशङ्करम् । शङ्करं शङ्कराचार्यं केशवं बादरायणम् । सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ ओं मण्डूकाय नमः । कालाग्निरुद्राय नमः । आधारशक्त्यै नमः । मूलप्रकृत्यै नमः । आदि कूर्माय नमः । अनन्ताय नमः । वराहाय नमः । पृथिव्यै नमः । गुं गुरुभ्यो नमः । गं गणपतये नमः । दुं दुर्गायै नमः । क्षं क्षेत्रपालाय नमः । वं वटुक भैरवाय नमः । सं सरस्वत्यै नमः । पं परमात्मने नमः । इति जलं स्पृष्ट्वा मूलमष्टोत्तरशतं जपित्वा, जले पद्मं प्रणवयन्त्रं विलिख्य, ओमिति प्रणवेनावेष्ट्य, ऋष्यादिकं विन्यस्यां मण्डले "विष्णुं भास्वदि"ति विष्णुं ध्यात्वा, तत्र प्रणवेन "आगच्छ देवदेवेश शूलभृद्वृषवाहन । गृहाण मत्कृतां पूजां जलेऽस्मिन् सन्निधिं कुरु" इति साम्बपरमेश्वरमावाह्य पञ्च पूजां कुर्यात् ॥ यथा लंपृथिव्यात्म परमात्मने गन्धतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय गन्धं कल्पयामि ॥ कनिष्ठिकाभ्यां नमः ॥ १ ॥ हमाकाशात्मपरमात्मने शब्दतन्मात्र प्रकृत्यानन्दात्मने परमेश्वराय पुष्पं कल्पयामि ॥ अङ्गुष्ठाभ्यां नमः ॥ २ ॥ यं वाय्वात्मपरमात्मने स्पर्शतन्मात्रप्रकृत्यानन्दा-त्मने परमेश्वराय धूपं कल्पयामि । तर्जनीभ्यां नमः ॥ ३ ॥ रमग्न्यात्मपरमात्मने रूपतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय दीपं कल्पयामि । मध्यमाभ्यां नमः ॥ ४ ॥ वममृतात्मपरमात्मने रसतन्मात्रप्रकृत्यानन्दात्मने परमेश्वरायामृतं कल्पयामि । अना-

मिकाभ्यां नमः ॥ ५ ॥ सं सर्वभूतात्मपरमात्मने सर्वतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय सर्वोपचारान् परिकल्पयामि ॥ अञ्जलिं दद्यात् ॥ ६ ॥ इति जपित्वा तज्जलं प्रणवेनालोड्याष्टोत्तरशतवारं तर्पयित्वा, अन्तर्यामिणं भगवन्तमृषिं तर्पयामि, गायत्रीच्छन्दसम् । परमात्मदेवताम् । हृदयदेवम् । शिरोदेवम् । शिखादेवम् । कवचदेवम् । नेत्रदेवम् । अस्त्रदेवम् तर्पयामि । आत्मैवेदं सर्वं तर्पयामि । ब्रह्मैवेदं सर्वं तर्पयामि । सर्वं खल्विदं ब्रह्म तर्पयामि । इति तर्पयित्वा, लमित्यादि पूर्ववत् पञ्चपूजां कृत्वा । "उत्तिष्ठ देवदेवेश शूलभृद्वृषवाहन । प्रसीद परमानन्द प्रविश्य हृदयं मम" इत्युपस्थायोद्वास्य, "भूरग्न्यात्मन" इत्यादि उक्त षडङ्गानि विन्यस्य ... भिमन्त्रितजलं शिरस्यभ्युक्ष्य, तथैव प्राश्याचम्य, त्रिः प्राणानायम्य, "सत्या मे ... ब्रह्ममुद्रे नमोऽस्तु ते" इति ... गृहीत्वा, दण्डमूलाग्रमध्येषु द्वादशवारं, प्रतिपर्व त्रिवारं, ... द्विवारं च प्रणवेन सन्तर्प्य ब्रह्ममुद्रायां श्रीरुद्रचमक पुरुषसूक्तपञ्चब्रह्ममन्त्रैः प्रणवेन च प्रोक्ष्य, दण्डमूलेन ... णं जलमालोड्य, पादावभ्युक्ष्याग्रेण त्रिरालोड्य शिरस्य... ... उत्थाय पूर्ववदेव गुर्वादिवन्दनं च कुर्यादिति जलानुष्ठानम् ॥

॥ अथ स्थलानुष्ठानम् ॥

"अन्तर्हृदि नियन्तारं बहिश्च गुरुरूपिणं ।
उभयत्रापि शर्वाख्यं तं वन्दे पार्वतीपतिम् ॥"

ओं गुरुभ्यो नमः । ओं परमगुरुभ्यो नमः ओं परमेष्ठिगुरुभ्यो नमः । ओं परापरगुरुभ्यो नमः । ओं गं गणपतये नमः । व्यासाचार्येभ्यो नमः । शुकाचार्येभ्यो नमः । श्रीमच्छङ्करभगवत्पादाचार्येभ्यो नमः । "श्रुतिस्मृतिपुराणानामालयं करुणालयम् । नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥ शङ्करं शङ्कराचार्यं केशवं बादरायणम् । सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः" ॥ इति गुर्वादिवन्दनं पूर्ववत् कृत्वा, ओं मण्डूकाय नमः । कालाग्निरुद्राय नमः । आधारशक्त्यै नमः । मूलप्रकृत्यै नमः । आदिकूर्माय नमः । अनन्ताय नमः । वराहाय नमः । पृथिव्यै नमः । इति पीठं विन्यस्य, "अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया" इति भूतानुत्सार्य—

आसनमहामन्त्रस्य—पृथिव्या मेरुपृष्ठ ऋषिः । सुतलं छन्दः । कूर्मो देवता ।

"पृथ्वि त्वया धृता लोकाः देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥" इति

प्रार्थ्य, आधारशक्तिकमलासनाय नमः इत्यासन उपविश्य, स्वस्तिश्रीमत्परमशिवानन्दनाथपादाद्यशेषगुरुपारम्पर्यक्रमेण स्वगुरुनाथपादाम्बुजं यावत्तावत्प्रणौमि । इति स्वशिरसि, बद्धाञ्जलिः । ... गुरुभ्यो नमः । गं गणपतये नमः । दुं दुर्गायै नमः । क्षें क्षेत्रपालाय नमः । वं वटुकभैरवायनमः । सं सरस्वत्यै नमः । पं परमात्मने

नमः । ओं श्रीं पशु हुंफट् । सहस्रारहुंफट् । इति वा भूतोत्सारणं कृत्वा । यथासम्प्रदायं सङ्ग्रहेण भूतशुद्धिं कुर्यात् । ओमिति प्राणानायम्य मूलशृङ्गाटकात् सुषुम्नापथेन जीवं परमशिवपदेयोजयामि नमस्स्वाहा । जीवं परमशिवेनैकीभूतं विभाव्य— यं सूक्ष्मशरीरं शोषय शोषय स्वाहा । पापशरीरं शुष्कं विभाव्य, रं दहदह पच पच स्वाहा । दग्धं भस्मीकृतं विभाव्य, वं परशिवामृतं वर्षय वर्षय स्वाहा । सर्वं पुष्टं विभाव्य, लं शाम्भवशरीरमुत्पादयोत्पादय स्वाहा । शुद्धशाम्भवशरीरं स्वदेहं भावयन् हंसश्शिवस्सोऽहम् अवतरावतर स्वाहा । जीव सुषुम्नापथेनमूलशृङ्गाटविमि[illegible]ोल्लस, प्रज्वल प्रज्वल, हंसश्शिवस्सोऽहं हंसस्स्वाहा । इति [illegible]श्रीगुरुरूपपरशिवाभिन्नमात्मानं प्रत्यगभिन्नं भावयेत् । इति भूतशुद्धिं कृत्वा ।

प्रणवस्यान्तर्यामी भगवानृषिः ।

[illegible]देवीगायत्रीच्छन्दः । परमात्मा देवता । अं बीजं । उं शक्तिः । मं कीलकम् । समष्टिव्यष्टीनां "ऋषिच्छन्दोदेवताश्च गोत्रवर्णस्वरा-[illegible], बीजं शक्तिं कीलकं च विनियोगं च कीर्तयेत्" इति वचनात् ।

ऋषिच्छन्दोदेवतादीन् विन्यसेत, कात्यगोत्रोत्पन्नः । [illegible]नामिर्मलम् ।

तेजोवर्णः । उदात्तस्वरः । अं बीजं । उं शक्तिः । मं कीलकम् । मोक्षार्थे विनियोगः ॥

॥ अकारादीनां ऋष्यादिः प्रणवजपः ॥

अकारस्याग्निर्ऋषिः । गायत्रीच्छन्दः । ब्रह्मा देवता । क्लींबीजम् । क्रिया शक्तिः । पीतवर्णः । जाग्रदवस्था । भूस्स्थानम् । उदात्तस्वरः । ऋग्वेदः । गार्हपत्योऽग्निः । रजो गुणः । प्रातस्सवनम् । विश्व आत्मा । पृथिवी तत्वम् । सृष्ट्यर्थक्रियाव्याप्त्युत्कर्षार्थे विनियोगः ॥ उकारस्य वायुर्ऋषिः । उष्णिक्छन्दः । विष्णुर्देवता । श्रीं बीजं । ज्ञानशक्तिः । विद्युद्वर्णः । स्वप्नावस्था । भुवस्स्थानम् । अनुदात्तस्वरः । यजुर्वेदः । दक्षिणाग्निः । सत्वगुणः । माध्यन्दिनं सवनम् । तैजस आत्मा । अन्तरिक्षं तत्वम् । स्थित्यर्थक्रियाव्याप्त्युत्कर्षार्थे विनियोगः ॥ मकारस्य सूर्य ऋषिः । अनुष्टुप् छन्दः । महेश्वरो देवता । ह्रीं बीजम् । इच्छा शक्तिः । श्वेतवर्णः । सुषुप्त्यवस्था । स्वस्स्थानम् । स्वरितस्स्वरः । सामवेदः । आहवनीयोऽग्निः । तमो गुणः । सायं सवनम् । प्राज्ञ आत्मा । द्यौस्तत्वम् । संहार[illegible] लयक्रियाव्याप्त्युत्कर्षार्थे जपे विनियोगः ॥

अर्धमात्रायाः वरुण ऋषिः । विराट्च्छन्दः । पुरुषो देवता । क्रौं बीजम् । क्रियाज्ञानेच्छाश्शक्तयः । सर्वे वर्णाः । तुरीयावस्था । भूर्भुवस्सुवस्स्थानानि । उदात्तानुदात्तस्वरितास्स्वराः । अथर्वणवेदः । नाकें वा । संवर्तकोऽग्निः । सर्वे आत्मानः । पृथिव्यन्तरिक्षं व्योम-त्वानि । सृष्टिस्थितिलयक्रियाव्याप्त्युत्कर्षार्थे जपे विनियोगः । ध्वनेः ब्रह्मा ऋषिः । अव्यक्तगायत्रीच्छन्दः । परमहंसो देवता ।

हंसो बीजम् । चिच्छक्तिः । नादस्स्वरूपम् । स्वं स्थानम् । प[illegible]
ब्रह्मात्मा । मोक्षार्थे विनियोगः ।

इति ऋषिच्छन्दोदेवतादिन्यासं कृत्वा । प्रणवस्य पूर्वोक्त-
प्रकारेण भूरग्न्यात्मन इत्यादिकरषडङ्गादिदिग्बन्धनान्तं कृत्वा,
स्फुरत्तारकमित्याद्युपचारान्तं च कृत्वा, उभयकराग्रं ब्रह्मरन्ध्रे
विन्यस्य, द्वादशप्लुतं प्रणवं जपित्वाऽनन्तरं सहस्रमधिकं वा मात्राभिः
पदानि संयोज्य, जपित्वा पूर्ववद्धृदयादिपञ्चोपचारान्तं कुर्यात् ।
तीर्थगुरुज्येष्ठानां च वन्दनं कुर्यात् । एवं मध्याह्नसायंसन्ध्यासु
चानुष्ठेयम् । अथ भेदज्ञानापनोदनार्थंतदुच्यते । "स्वशाखोपनिष-
[illegible]तां नामसाहस्रकं ततः । श्रीरुद्रं चमकं चैव पौरुषं सूक्तमेव च ॥
[illegible]सिकञ्च शारीरब्रह्मसूत्रं विशेषतः । पञ्चीकरणमप्यत्र
[illegible]र्यवार्तिकम् ॥ शारीरकं महावाक्यं तद्भाष्यं शाङ्करं
[illegible] शान्तिं पठेन्नित्यमेतदेवमावर्तयेद्यतिः । इति वचनात् ॥
[illegible]देवं नियमः परमहंससन्न्यासिनः ।

अथ महावाक्यस्य ऋष्यादि पूर्ववदुक्तम्, यथाशक्ति जपं
[illegible]

अथ शुकरहस्योक्तप्रकारेण तत्पुरुष हंस ऋषिः । अव्यक्त-
[illegible]छन्दः । परमहंसो देवता । हं बीजम् । सः शक्तिः ।
सोऽहं कीलकम् । मोक्षार्थे विनियोगः । तत्पुरुषाय विद्महे महादेवाय

धीमहि । तन्नो रुद्रः प्रचोदयात् । अङ्गुष्ठाभ्यां नमः । हृदयाय नमः
॥ १ ॥ ईशानस्सर्वविद्यानां ईश्वरस्सर्वभूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽ-
धिपतिः ब्रह्मा शिवोमे अस्तु सदाशिवोम् ॥ तर्जनीभ्यां नमः । शिरसे-
स्वाहा ॥ २ ॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्य-
स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः । मध्यमाभ्यां नमः । शिखायै
वषट् ॥ ३ ॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्र-
मथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः । अनामिकाभ्यां
नमः । कवचाय हुम् ॥ ४ ॥ सद्योजातं प्रपद्यामि सद्यो जाताय वै
नमो नमः । भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः ।
कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् ॥ ५ ॥ तत्पु[illegible]
नाघोरवामदेवं सद्योजातं........भवोद्भवाय नमः । करतल[illegible]
नमः । अस्त्राय फट् ॥ ६ ॥ इति करषडङ्गम् । भूर्भुव[illegible]
दिग्बन्धः ॥ ध्यानम् ॥ ज्ञानं ज्ञेयं ज्ञानगम्यादतीतं शुद्धं [illegible]
मप्यव्ययं च । सत्यं ज्ञानं सच्चिदानन्दरूपं ध्यायेदेवं [illegible]
मानम् ॥ ७ ॥ त्वंपदस्य विष्णुः ऋषिः । गायत्रीच्छन्दः । परमा[illegible]
देवता । ऐं बीजम् । क्लींशक्तिः । सौः कीलकम् । मोक्षार्थे [illegible]
विनियोगः । वासुदेवायाङ्गुष्ठाभ्यां नमः । हृदयाय नमः । संकर्षणाय
तर्जनीभ्यां नमः । शिरसे स्वाहा । प्रद्युम्नाय मध्यमाभ्यां नमः ।
शिखायै वषट् । अनिरुद्धायानामिकाभ्यां नमः । कवचाय हुम् ।
वासुदेवाय कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् । [illegible]मात्रेभ्यः

संकर्षणप्रद्युम्नानिरुद्धेभ्यः करतलकरपृष्ठाभ्यां नमः । अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः । अथ ध्यानम् ॥ जीवनं सर्वभूतानामखण्डानन्दविग्रहम् । चित्ताहङ्कारयन्तारं जीवाख्यं त्वंपदं भजे ॥ १ ॥ असिपदस्य नारद ऋषिः । गायत्रीच्छन्दः । अर्धनारीश्वरो देवता ॥ अव्यक्तादि बीजम् । नृसिंहश्शक्तिः । ईश्वरः कीलकम् । मोक्षार्थे जपे विनियोगः । पृथिवीद्व्यणुकायाङ्गुष्ठाभ्यां नमः । हृदयाय नमः । अब्व्यणुकाय तर्जनीभ्यां नमः । शिरसे स्वाहा । तेजोद्व्यणुकाय मध्यमाभ्यां नमः । शिखायै वषट् । वायुद्व्यणुकायानामिकाभ्यां नमः कवचाय हुम् । आकाशद्व्यणुकाय कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् । पृथिव्यप्तेजोवाय्वाकाशद्व्यणुकेभ्यो (नमः) करतलकरपृष्ठाभ्यां नमः (फट्) । अस्त्राय फट् ॥ अथ ध्यानम् ॥ [illegible] त्वमसीति वाक्यार्थे यावदस्ति मनस्थितिः । एकत्वं तल्लये-[illegible]सिपदं तथा ॥"

[illegible] वाक्यार्थः ।

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादू विजानाति तत्प्रज्ञानमुदीरितम् ॥
[illegible] चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥ २ ॥
प्रज्ञानं ब्रह्म ॥ २ ॥

" परिपूर्णः परात्माऽस्मिन्देहे विद्याधिकारिणि ।
बुद्धेस्साक्षितया स्थित्वा स्फुरन्नहमुदीर्यते ॥ १ ॥
स्वतः पूर्णः परात्माऽत्र ब्रह्मशब्देन वर्णितः । (वर्ण्यते)
अस्मीत्यैक्यपरामर्शो तेन ब्रह्म भवाम्यहम् ॥ २ ॥

अहं ब्रह्मास्मि ।

एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ।
सृष्टेः पुराऽधुनाऽप्यस्य तादृक्त्वं तदितीर्यते ॥ १ ॥
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् ।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् ॥२॥ तत्त्वमसि ॥३॥
स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् ।
अहङ्कारादिदेहान्तात् प्रत्यगात्मेति गीयते ॥ १ ॥
दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥ २ ॥
अयमात्मा ब्रह्म ॥ ४ ॥

इत्यर्थानुसन्धानपूर्वकं यथाशक्ति जपित्वा ।
अथ पञ्चीकरणं सुरेश्वराचार्यविरचिततद्वार्तिकं च पठेत् ॥

पञ्चीकरणं तावत् ॥ परमहंसपरिव्राजकानां समाधिविधिं व्याख्यास्यामः ॥ [illegible]च्छब्दवाच्यमविद्याशबलं ब्रह्म । ब्रह्मणोऽव्यक्तम् अव्यक्तान्महन्महतोऽहङ्कारोऽहङ्कारात्पञ्चतन्मात्राणि पञ्चतन्मात्रेभ्यः

पञ्चमहाभूतानि, पञ्चमहाभूतेभ्योऽखिलं जगत पञ्चानां भूतानां प्रत्येकं द्विधा विभज्य प्रत्येकमर्धं चतुर्धा विभज्य स्वार्धभागं विहायेतरेषु संयोजनं पञ्चीकरणम् । मायारूपनिदर्शनं तस्यैव निराकरणमध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ।। ओं अं ओं पञ्चीकृत पञ्चमहाभूतानि तत्कार्यञ्च सर्वं विराडित्युच्यते । एतत स्थूलशरीरमात्मनः इन्द्रियैरर्थोपलब्धिर्जागरितम् । तदुभयाभिमान्यात्मा विश्वः । एतत्त्रयमकारः । ओं उं ओं अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं सर्वं भौतिकं सप्तदशकं लिङ्गं हिरण्यगर्भ इत्युच्यते । एतत्सूक्ष्म शरीरमात्मनः । करणेषूपसंहृतेषु जागरितसंस्कारजप्रत्ययविषयस्स्वप्नः [illegible]भयाभिमान्यात्मा-तैजसः । एतत्त्रयमुकारः ।। ओं मं [illegible]कारणमात्माज्ञानं साभासमव्याकृतमित्युच्यते । एतत्कारण[illegible]नः । तच्च न सन्नासन्नापि सदसन्न भिन्नं नाभिन्नं ना[illegible] निरवयवं नसावयवं नाप्युभयं, किन्तु ब्रह्मात्मैकत्वज्ञाना[illegible]प्रकारकज्ञानानां उपसंहारे बुद्धेः कारणात्मनाऽवस्थ[illegible]भयाभिमान्यात्मा प्राज्ञः । एतत्त्रयं मकारः । अक[illegible]र[illegible] मकारे मकार ओङ्कारे । ओङ्कारोऽहमेव अहमात्मा सा[illegible]क्षी [illegible]चिन्मात्रस्वरूपो नाज्ञानतत्कार्ये । किन्तु नित्य[illegible]द्ध [illegible]पूर्णानन्दाद्वयप्रत्यग्भूतब्रह्मैवाहमस्मि । अहं [illegible] [illegible]ध्यानं समाधिः । अयमात्मा ब्रह्मेत्यादिश्रुति[illegible] । स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः । स य एवंवित् [illegible] अहं

[illegible]स्मि । प्रज्ञानं ब्रह्म । तत्त्वमसि । अयमात्मा ब्रह्म । ओं तत्सत् । अन्यदेव तद्विदितादथो अविदितादधि । एष त आत्माऽन्तर्याम्यमृतः । ब्रह्मैवाहमस्मि । "चिन्तयेत्प्रणवान्तस्थमात्मज्योतिरिस्थितं शिवं । चैतन्यमात्रममृतं सोहमस्मीति भावयेत् ॥

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥

[illegible]ाहमस्मि । ओं तत्सत् ॥

॥ इति पञ्चीकरणम् ॥

॥ अथ तद्वार्तिकम् ॥

ओङ्कारस्सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते ॥ १ ॥

आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम् ॥ २ ॥

तस्मादाकाश उत्पन्नश्शब्दतन्मात्ररूपकः ।
स्पर्शात्मकस्ततो वायुस्तेजोरूपात्मकं ततः ॥ ३ ॥

आपो [illegible]स्ताभ्यो गन्धात्मिका मही ।
शब्दैकगुण आकाशश्शब्दस्पर्शगुणो मरुत् ॥ ४ ॥

शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते ।
शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः ॥ ५ ॥

शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही ।
तेभ्यस्समभवत्सूत्रं लिङ्गं सर्वात्मकं महत् ॥ ६ ॥

ततःस्थूलानि भूतानि पञ्च तेभ्यो विराडभूत् ।
पञ्चीकृतानि भूतानि स्थूलानीत्युच्यते बुधैः ॥ ७ ॥

पृथिव्यादीनि भूतानि प्रत्येकं विभजेद् द्विधा ।
एकैकभागमादाय चतुर्धा विभजेत्पुनः ॥ ८ ॥

एकैकभागमेकस्मिन् भूते संवेशयेत्क्रमात् ।
ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि ॥ ९ ॥

वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत् ।
पञ्चीकरणमेतत्स्यादित्याहुस्तत्त्ववेदिनः ॥ १० ॥

पञ्चीकृतानि भूतानि तत्कार्यश्च विराडभूत् ।
स्थूलं शरीरमेतत्स्यादशरीरस्य चात्मनः ॥ ११ ॥

अधिदैवतमध्यात्ममधिभूतमिति त्रिधा ।
एकं ब्रह्म विभागेन भ्रमाद्भाति न तत्त्वतः ॥ १२ ॥

इन्द्रियैरर्थविज्ञानं देवतानुग्रहान्वितैः ।
शब्दादिविषयं ज्ञानं तज्जागरितमुच्यते ॥ १३ ॥

श्रोत्रमध्यात्ममित्युक्तं श्रोतव्यं शब्दलक्षणम् ।
अधिभूतं तदित्युक्तं दिशस्तत्राधिदैवतम् ॥ १४ ॥

त्वगध्यात्ममिति प्रोक्तं स्प्रष्टव्यं स्पर्शलक्षणम् ।
अधिभूतं तदित्युक्तं वायुस्तत्राधिदैवतम् ॥ १५ ॥

चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं रूपलक्षणम् ।
अधिभूतं तदित्युक्तमादित्योऽत्राधिदैवतम् ॥ १६ ॥

जिह्वाऽध्यात्मं तयाऽऽस्वाद्यमधिभूतं रसात्मकम् ।
वरुणो देवता तत्र जिह्वायामधिदैवतम् ॥ १७ ॥

घ्राणमध्यात्ममित्युक्तं घ्रातव्यं गन्धलक्षणम् ।
अधिभूतं तदित्युक्तं पृथिव्यत्राधिदैवतम् ॥ १८ ॥

वागध्यात्ममिति प्रोक्तं वक्तव्यं शब्दलक्षणम् ।
अधिभूतं तदित्युक्तमग्निस्तत्राधिदैवतम् ॥ १९ ॥

हस्तावध्यात्ममित्युक्तमादातव्यं च यद्भवेत् ।
अधिभूतं तदित्युक्तमिन्द्रस्तत्राधिदैवतम् ॥ २० ॥

पादावध्यात्ममित्युक्तं गन्तव्यं तत्र यद्भवेत् ।
अधिभूतं तदित्युक्तं विष्णुस्तत्राधिदैवतम् ॥ २१ ॥

पायुरिन्द्रियमध्यात्मं विसर्गस्तत्र यो भवेत् ।
अधिभूतं तदित्युक्तं मृत्युस्तत्राधिदैवतम् ॥ २२ ॥

उपस्थेन्द्रियमध्यात्मं स्त्र्याद्यानन्दकारणम् ।
अधिभूतं तदित्युक्तमधिदैवं प्रजापतिः ॥ २३ ॥

मनोऽध्यात्ममिति प्रोक्तं मन्तव्यं तत्र यद्भवेत् ।
अधिभूतं तदित्युक्तं चन्द्रस्तत्राधिदैवतम् ॥ २४ ॥

बुद्धिरध्यात्ममित्युक्तं बोद्धव्यं तत्र यद्भवेत् ।
अधिभूतं तदित्युक्तमधिदैवं बृहस्पतिः ॥ २५ ॥

अहङ्कारस्तथाऽध्यात्ममहङ्कर्तव्यमेव च ।
अधिभूतं तदित्युक्तं रुद्रस्तत्राधिदैवतम् ॥ २६ ॥

चित्तमध्यात्ममित्युक्तं चेतव्यं तत्र यद्भवेत् ।
अधिभूतं तदित्युक्तं क्षेत्रज्ञोऽत्राधिदैवतम् ॥ २७ ॥

तमोऽध्यात्ममिति प्रोक्तं विकारस्तत्र यो भवेत् ।
अधिभूतं तदित्युक्तं रुद्रस्तत्राधिदैवतम् ॥ २८ ॥

बाह्यान्तःकरणैरेवं देवताऽनुग्रहान्वितैः ।
स्वं स्वं च विषयज्ञानं तज्जागरितमुच्यते ॥ २९ ॥

सेयं जागरितावस्था शरीरं करणाश्रयम् ।
यस्तयोरभिमानी स्याद्विश्व इत्यभिधीयते ॥ ३० ॥

विश्वं वैराजरूपेण पश्येद्भेदनिवृत्तये ।
ज्ञानेन्द्रियाणि पञ्चैव पञ्चकर्मेन्द्रियाणि च ॥ ३१ ॥

श्रोत्रत्वङ्नयनघ्राणजिह्वाधीन्द्रियपञ्चकम् ।
वाक्पाणिपादपायूपस्थकर्मेन्द्रियपञ्चकम् ॥ ३२ ॥

मनो बुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम् ।
सङ्कल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी ॥ ३२ ॥

अभिमानात्मकस्तद्वदहङ्कारः प्रकीर्तितः ।
अनुसन्धानरूपं च चित्तमित्यभिधीयते ॥ ३४ ॥

प्राणापानौ तथा व्यान उदानाख्यस्तथैव च ।
समानश्चेति पञ्चैव कीर्तिताः प्राणवृत्तयः ॥ ३५ ॥

खंवाय्वग्न्यम्बुक्षितयो भूतसूक्ष्माणि पञ्च च ।
अविद्याकामकर्माणि लिङ्गं पुर्यष्टकं विदुः ॥ ३६ ॥

सूक्ष्मं शरीरमेतत्स्यान्मायिकं प्रत्यगात्मनः ।
करणोपरमे जाग्रत्संस्कारोत्थप्रबोधवत ॥ ३७ ॥

ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न उच्यते ।
अभिमानी तयोर्यस्तु तैजसः परिकीर्तितः ॥ ३८ ॥

हिरण्यगर्भरूपेण तैजसं चिन्तयेद्बुधः ।
चैतन्याभिमुखं चित्तं शरीरद्वयकारणम् ॥ ३९ ॥

आत्माज्ञानं तदव्यक्तमव्याकृतमितीर्यते ।
न सन्नासन्न सदसन्न भिन्नं नोभयात्मकम् ॥ ४० ॥

न सभासं न निर्भासं न चाप्युभयरूपकम् ।
ब्रह्मात्मैकत्वविज्ञानहेयं मिथ्यात्वकारणात् ॥ ४१ ॥

ज्ञानानामुपसंहारे बुद्धेः कारणतःस्थितिः ।
वटबीजे वटस्येव सुषुप्तिरभिधीयते ॥ ४२ ॥

अभिमानी तयोर्यस्तु प्राज्ञ इत्यभिधीयते ।
जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत् ॥ ४३ ॥

विश्वतैजससौपुप्तविराट्सूत्राक्षरात्मभिः ।
विभिन्नमिव सम्मोहादेकं तत्त्वं चिदात्मकम् ॥ ४४ ॥

विश्वादिकत्रयं यस्माद्वैराजादित्रयात्मकम् ।
एकत्वेनैव संपश्येदन्याभावप्रसिद्धये ॥ ४५ ॥

ओङ्कारमात्रमखिलं विश्वप्राज्ञादिलक्षणम् ।
वाच्यवाचकताऽभेदाद्भेदेनानुपलब्धितः ॥ ४६ ॥

अकारमात्रो विश्वस्स्यादुकारस्तैजसस्स्मृतः ।
प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु ॥ ४७ ॥

समाधिकालात्प्रागेवं विचिन्त्यातिप्रयत्नतः ।
स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत् ॥ ४८ ॥

अकारं पुरुषं विश्वमुकारे प्रविलापयेत् ।
उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् ॥ ४९ ॥

मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत् ।
चिदात्माऽहं नित्यशुद्धबुद्धो मुक्तोऽहमव्ययः ॥ ५० ॥

परमानन्दसन्दोह वासुदेवोऽहमोमिति ।
ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विलापयेत् ॥ ५१ ॥

चिदात्मनि विलीनं चेत्तच्चित्तं नैव चालयेत् ।
पूर्णबोधात्मनासीत पूर्णाचलसमुद्रवत् ॥ ५२ ॥

एवं समाहितो योगी श्रद्धाभक्तिसमन्वितः ।
जितेन्द्रियो जितक्रोधः पश्येदात्मानमद्वयम् ॥ ५३ ॥

आदिमध्यावसानेषु दुःखं सर्वमिदं यतः ।
तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा ॥ ५४ ॥

यः पश्येत्सर्वगं शान्तमानन्दात्मानमव्ययम् ।
न तेन किञ्चिदाप्तव्यं ज्ञातव्यं वाऽवशिष्यते ॥ ५५ ॥

कृतकृत्यो भवेद्विद्वान् जीवन्मुक्तो भवेत्सदा ।
आत्मन्यारूढभावस्तु जगदेतन्न वीक्षते ॥ ५६ ॥

कदाचिद् व्यवहारे तु द्वैतं यद्यपि पश्यति ।
बोधात्मव्यतिरेकेण न पश्यति चिदन्वयात् ॥ ५७ ॥

किन्तु पश्यति मिथ्यैव दिङ्मोहेन्दुविभागवत् ।
प्रतिभासःशरीरस्य तदाऽऽप्रारब्धसंक्षयात् ॥ ५८ ॥

तस्य तावदेव चिरमित्यादिश्रुतिरब्रवीत् ।
प्रारब्धस्यानुवृत्तिस्तु मुक्तस्याभासमात्रतः ॥ ५९ ॥

सर्वदा मुक्त एव स्याज्ज्ञाततत्त्वः पुमानसौ ।
प्रारब्धभोगशेषस्य संक्षये तदनन्तरम् ॥ ६० ॥

अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ।
आनन्तममलं शुद्धं मनोवाचामगोचरम् ॥ ६१ ॥

वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ।
प्रज्ञानघनमानन्दमद्वयं पदमश्नुते ॥ ६२ ॥

इदं प्रकरणं यत्नात् ज्ञातव्यं भगवत्तमैः ।
अमानित्वादिनियमैर्गुरुभक्तिप्रसादतः ॥ ६३ ॥

इमां विद्यां प्रयत्नेन योगी सन्ध्यासु सर्वदा ।
समभ्यसेदिहामुत्र भोगानासक्तधीस्सुधीः ॥ ६४ ॥

रागद्वेषादिरहितस्स्वात्मानं चिन्तयेत्सदा ।
समाप्तं वार्तिकं श्रीमत्सुरेशाचार्यनिर्मितम् ॥ ६५ ॥

ओं तत् सत् ॥

नित्यं सन्ध्यानुष्ठानं कृत्वा पञ्चीकरणं सवार्तिकं च पठित्वा प्रणवं महावाक्यं च यथाशक्ति जपित्वोक्तन्यासं च कृत्वा सम्प्रदायानुसारेण शान्तिपाठपुरस्सरं उपनिषच्छारीरकब्रह्मसूत्रभगवद्गीतानां

श्रीमच्छङ्करभगवत्पादीयप्रस्थानत्रयभाष्यं च गुर्वादिमुखाच्छृणुयाच्छ्रावयेद्वा शिष्यादीन् । अथ सत्यं ज्ञानमनन्तं ब्रह्म हृदयाय नमः । इत्यादि पञ्चोपचारान्तं पूर्ववत्कृत्वा ब्रह्मार्पणं कुर्यात् ॥ " आसुप्तेरामृतेः कालन्नयेद्वेदान्तचिन्तया " इति वचनात् । भगवद्गीतायाः ऋष्यादीन् विन्यस्य ध्यात्वा पठेत् ॥

अस्य श्रीभगवद्गीतामालामहामन्त्रस्य—श्रीवेदव्यासो भगवान् ऋषिः । अनुष्टुप्छन्दः । श्रीकृष्णः परमात्मा देवता । " अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे " इति बीजम् । " सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजे "ति शक्तिः । " अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः " इति कीलकम् । मोक्षार्थे विनियोगः । " नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः " इतिअङ्गुष्ठाभ्यां नमः । हृदयाय नमः ॥ " नचैनं क्लेदयन्त्यापो न शोषयति मारुतः " इति तर्जनीभ्यां नमः । शिरसे स्वाहा ॥ " अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च " इति मध्यमाभ्यां नमः । शिखायै वषट् ॥ " नित्यस्सर्वगतस्स्थाणुरचलोऽयं सनातनः " इति अनामिकाभ्यां नमः । कवचाय हुम् ॥ " पश्य मे पार्थ रूपाणि शतशोथ सहस्रशः " इति कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् ॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि च " इति करतलकरपृष्ठाभ्यां नमः । अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः " ॥ ध्यानम्—

ओं पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी-
मम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥ १ ॥

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ २ ॥

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥ ३ ॥

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सस्सुधीर्भोक्ता दुग्धं गीताऽमृतं महत् ॥ ४ ॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ ५ ॥

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला
शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ।
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः ॥ ६ ॥

पाराशर्यवचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासद्बोधनाबोधितम् ।

लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नश्श्रेयसे ॥ ७ ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥ ८ ॥

यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैस्स्तवैः
वेदैस्साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुस्सुरासुरगणा देवाय तस्मै नमः ॥ ९ ॥

॥ लमित्यादि पञ्चपूजा ॥

गीताभाष्यमिति । "दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् । गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेत्" (दिने दिने तु वेदान्तमहावाक्यार्थचिन्तनात्) स्वशाखोपनिषद्गीता नामपाठ[illegible]सकं ततः । श्रीरुद्रं चमकं चैव पौरुषं सूक्तमेवच ॥ सम्प्रदायानुसारेण शान्तिपाठपुरस्सरम् । प्रस्थानत्रयभाष्यन्तु शाङ्करं नित्य[illegible]मभ्यसेत् ॥ सन्न्यासिनो यतेरेवं नित्याचार उदाहृतः" । इति वचनात् नित्यं श्रवणं कुर्याद्वेदान्तानामिति ॥

॥ अथ शान्तिपाठः ॥

वस्त्रेण शरीरावकुण्ठनं कृत्वा,

ओं शिवनामनि मावितेऽन्तरङ्गे महति ज्योतिषि मानिनीमयार्धे ।
दुरितान्यपयान्ति दूरदूरे मुहुरायान्ति महान्ति मङ्गलानि ॥ १ ॥

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥ २ ॥

अङ्गुष्ठतर्जनीयोगमुद्राव्याजेन देहिनाम् ।
श्रुत्यर्थं ब्रह्मजीवैक्यं दर्शयन्नोऽवताच्छिवः ॥ ३ ॥

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्यादयः
प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता गौरवम् ।
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालङ्कृतं
चिन्मुद्राङ्कितभद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥ ४ ॥

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्
तं तोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥६॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥ ७ ॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ ८ ॥

वेदार्थपरमाद्वैतकैवल्यश्रीस्वरूपतः ।
यच्चकास्ति परं ब्रह्म चिन्मात्रमहमस्मि तत् ॥ ९ ॥

वेदान्तार्थविभासकाय गुरवे शान्ताय सन्न्यासिने
नानावादिनगेन्द्रसङ्घपवये योगीन्द्रवन्द्याय च ।
मोहध्वान्तदिवाकराय भगवत्पादाभिधां बिभ्रते
तस्मै भाष्यकृते नमोऽस्तु सततं पूर्णाय बोधात्मने ॥१०॥

नमः श्रुतिशिरः पद्मषण्डमार्तण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥ ११ ॥

ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥ १२ ॥

॥ अथ दक्षिणामूर्त्तिपद्यवन्दनम् ॥

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १ ॥

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २ ॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।

मायावीव विजृम्भयत्यपि महायोगीव यस्स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जग-
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥

देहंप्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ ७ ॥

चित्रं वटतरोर्मूले वृद्धाश्शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥ ८ ॥

चिद्घनाय महेशाय वटमूलनिवासिने ।
ओंकारवाच्यरूपाय दक्षिणामूर्तये नमः ॥ ९ ॥

इति पूर्वशान्तौ दक्षिणामूर्तिपद्यनवकेन वन्दनं कृत्वाऽथ शान्तिं पठेत् ॥

ओं शन्नोमित्रश्शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । [त्व]मेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिश्शान्तिश्शान्तिः ॥ १ ॥ ओं सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ॥ २ ॥

ओं यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव । समेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । ओं शान्तिश्शान्तिश्शान्तिः ॥ ३ ॥ ओं आवहन्ती वितन्वाना । कुर्वाणा चीरमात्मनः । वासांसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिस्सह स्वाहा । आ मा यन्तु ब्रह्मचारिणस्स्वाहा । यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि

मायावीव विजृम्भयत्यपि महायोगीव यस्स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जग-
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥

देहंप्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ ७ ॥

चित्रं वटतरोर्मूले वृद्धाश्शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्नसंशयाः ॥ ८ ॥

चिद्घनाय महेशाय वटमूलनिवासिने ।
ओंकारवाच्यरूपाय दक्षिणामूर्तये नमः ॥ ९ ॥

इति पूर्वशान्तौ दक्षिणामूर्तिपद्यनवकेन वन्दनं कृत्वाऽथ शान्तिं पठेत् ॥

ओं शन्नोमित्रश्शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । [त्व]मेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिश्शान्तिश्शान्तिः ॥ १ ॥ ओं सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ओं शान्तिश्शान्तिश्शान्तिः ॥ २ ॥

ओं यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्सं बभूव । समेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । ओं शान्तिश्शान्तिश्शान्तिः ॥ ३ ॥ ओं आवहन्ती वितन्वाना । कुर्वाणा चीरमात्मनः । वासांसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिस्सहस्वाहा । आ मा यन्तु ब्रह्मचारिणस्स्वाहा । यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि

स्वाहा । तन्त्वा भग प्रविशानि स्वाहा । स मा भग प्रविशस्वाहा । तस्मिन्त्सहस्रशाखे । निभगाहन्त्वयि मृजे स्वाहा । यथापः प्रवता यन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतस्स्वाहा । प्रतिवेशोऽसि प्रमाभाहि प्रमापद्यस्व ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ ४ ॥ ओं अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणँ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ ५ ॥ ओं पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ ६ ॥ ओं आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुश्श्रोत्रमथोबलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मे अस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ ७ ॥ ओं वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः । अनेनाधीतेन । अहोरात्रान्त्सन्दधामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारमवतु वक्तारम् ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ ८ ॥ ओं भद्रं नो अपि वातय मनः । ओं शान्तिश्शान्तिश्शान्तिः ॥ ९ ॥

ओं भद्रं कर्णेभिश्शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ १० ॥

ओं यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाꣳश्च प्रहिणोति तस्मै । तँ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ ११ ॥

ओं नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं, कर्णयोश्श्रुतं माच्योढ्वं ममामुष्य ओं ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ २२ ॥

ओं ऋचो अक्षरे परमे व्योमन् । यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्नवेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासते ॥ ओं शान्तिश्शान्तिश्शान्तिः ॥ १३ ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो महद्भ्यो नमो गुरुभ्यः । ओं सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमास्मि । ओं तत् सत् । अधीहि भगवो ब्रह्मेति शान्तिं पठित्वा, पूर्वोक्तक्रमेण वेदान्तप्रस्थानत्रयशाङ्करभाष्यादीन् श्रुणुयात् पठेत् पाठयेच्छ्रावयेच्छिष्यान् । यथाऽवकाशं श्रुत्वोत्तरशान्तिं पठेत् ॥ ओं शन्नो मित्रः + वादिषम् + आवीद्वक्तारम् ॥

ओं शान्तिः (३) सहनाववतु ॥ पूर्णमदः ॥ आप्यायन्तु ॥ वाङ्मे मनसि ॥ भद्रंनो ॥ भद्रंकर्णेभिः ॥ योब्रह्माणं ॥ ओं नमो ब्रह्मणे धारणं मे अस्तु ॥ ऋचो अक्षरे परमे व्योमन् ॥ ओं नमो ब्रह्मादिभ्यः ॥ सर्वोपप्लवरहितः ॥

॥ दक्षिणामूर्त्तिपद्यशेषाणि ॥

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्, सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७ ॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तःस्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८ ॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९ ॥

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान् ।
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।

नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १० ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः-
स्सिध्येत्तत्पुनरष्टधापरिणतं चैश्वर्यमव्याहतम् ॥ ११ ॥

वटविटपिसमीपे + नमामि ॥ चित्रंवटतरोर्मूले + च्छिन्नसंशयाः ॥ चिद्घनाय + नमः ॥ ओं तत्सत् ॥ ब्रह्मैवाहमस्मि ॥ इत्युत्तरशान्तिः ॥ पर्वद्वयप्रतिपदष्टमीचतुर्दशीद्वयान्यनध्ययानि वर्जयित्वा त्रयोदश्यां सम्प्रदायगुरून् सम्पूज्य दध्यादि निवेद्य मङ्गलपाठं कुर्यात् ॥ वस्त्रेण शरीरमवकुण्ठ्य,

अशुभानि निराचष्टे तनोति शुभसन्ततिम् ।
स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं परम् ॥

अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात् ।
स्मर्तॄणां वरदत्त्वाच्च ब्रह्म तन्मङ्गलं विदुः ॥ २ ॥

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥ ३ ॥

ओमथ, ओमथ, ओमथ, इति त्रिरुच्चैर्मन्द्रमध्यतारैरुच्चार्य
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमा-

त्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ इति मङ्गलपाठं समापयेत्
एवं द्वितीयादित्रयोदश्यन्तं प्रतिदिनं शान्तिपाठपूर्वकं वेदान्तश्रवण
मामध्याह्नं कृत्वा माध्याह्निकानुष्ठानानन्तरं भिक्षाटनं कुर्यात् । द
कमण्डलुं भिक्षावस्त्रं चादाय—

"आहरिष्यामि भगवन् स्वादु माधुकरं शुचि ।
नैवेद्यार्थं महादेव भुक्तिमुक्तिफलप्रद ॥ १ ॥
सर्वान्तरात्मन्भो भर्ग[1] त्वन्नियोगाच्चलन्ति मे ।
भिक्षार्थमिन्द्रियाण्यद्य पर्यटामि प्रसीद मे ॥ २ ॥
न स्वतो धीन्द्रियवचः प्राणापानादिकं क्वचित् ।
प्रवर्ततेऽतो भगवन् नाहं त्वत्तोऽस्मि भेदभाक् ॥ ३ ॥
अग्नीषोमात्मकं सर्वं जगत्कृत्स्नं चराचरम् ।
भोज्यभोक्तृस्वरूपेण निहितं परमेष्ठिना ॥ ४ ॥
अग्निस्तत्र भवेद्भोक्ता सोमस्तत्रैव भुज्यते ।
यत्सोमममृतं ब्रह्म तदन्नमिति विश्रुतम् ॥ ५ ॥
अद्यते तेन सर्वत्र सोम एवाग्निनाऽखिलम् ।
एवं ध्यात्वा यतिर्भुङ्क्ते त्वन्नदोषो न विद्यते ॥ ६ ॥
कवले कवले नित्यं महादेवमनुस्मरन् ।
यो भुङ्क्ते तस्य वै पापं तत्क्षणादेव नश्यति" ॥ ७ ॥

१ (भो भर्ग इतिपाठान्तरं)

इत्यादिवचनात् । माधुकरवृत्त्या भिक्षामाहृत्य भोजनस्थले
प्रोक्ष्य निधाय लिङ्गादावधिकारिभेदेन शिवमाराध्य भिक्षान्नन्निवेद्यान्न-
महमस्मीति भावयन् यथाविधि अमत्रादौ भुञ्जीत ॥ भिक्षादाता तु
पूर्वं यतिहस्ते जलं दत्त्वा शिक्ये भिक्षान्नं त्रिरावृत्त्या दत्त्वा पुनर्हस्ते
जलं दद्यात् । भिक्षाकाले आपोऽशनं दत्त्वा "ये देवा दिव्येकादशस्थ
पृथिव्यामध्येकादशस्थाप्सुषदो महिनैकादशस्थ ते देवा यज्ञमिमं
जुषध्वम्" ॥ अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः । ईशस्सर्वस्य
जगतः प्रभु प्रीणाति विश्वभुक् ॥ ओं नमः पार्वतीपतये । हरहर-
महादेवेति सर्वे ब्रूयुः ॥ अथौषधवत् मितं योगानुगुणं भुक्त्वा आचम्य
अनन्तरम्—"अहमेव परं ब्रह्म शिवमव्ययमद्वयम् ।
अनन्यपूरुषं दिव्यं इति भुक्त्वा विचिन्तयेत् ॥ अशेषशायी
सदा माधवोऽहं विरिञ्चेन्द्रदेवैरुपास्योऽखिलोहम्"
इति सञ्चिन्तयन्नित्यं विलाप्याखिलमद्वये ।
सच्चिदानन्दमात्रस्सन् शयीत पृथिवीतले" ॥ इति शयन-
मन्त्रः ॥

पश्चादार्द्राङ्गः पीठसंस्थो गुरुज्येष्ठाद्यनुज्ञया ।
निवेद्येशाय पर्युक्ष्य प्राश्य प्राणाहुतीश्चरेत् ॥
भिक्षान्नमुक्तं पर्याप्तमन्तरङ्गे महेश्वरम् ।
ध्यात्वा समुच्चरन्वाऽपि महादेवेति भक्षयेत् ॥ इत्यादिवचनाच्च ॥

॥ इतिभिक्षाहारादिविधिः ॥

॥ अथ क्षौरविधिः ॥

प्रातरनुष्ठानानन्तरं गुरुवन्दनादि कृत्वा स्नानार्थं मृद्गोमयपञ्च
व्यादीनि नद्यादितीरे विशुद्धदेशे संस्थाप्य संक्षालितकराङ्घ्रिमुख
क्षालितक्षुरक्षौरसाधनसुस्नातनापितश्च कण्ठादुपरि यथासम्प्रदायं वप
कुर्यात्। यतिर्वाग्यतो भूमावमत्रादि निक्षिप्य तत्र वपनकाले पतित
केशलोमादीनि भूमावेव निखनेत्। ततस्स्नानात्पूर्वमेव हस्तपादव
स्त्रादि संशोध्य त्रयोदशवारं निमज्य पुनस्स्नात्वा ततो नाभिदघ्नजले
स्थित्वा मृत्तिकागोशकृत्पञ्चगव्यादिभिः पृथक् पृथक् वक्ष्यमाण
प्रकारेण स्नानमाचरेत्। यथा शिरोहृदयबाहुद्वयपृष्ठपञ्चाङ्गेषु मृत्तिका
पिण्डैरालिप्यालिप्य द्वादशधा त्रयोदशधा वा त्रिवारं पञ्चवारं वा
निमज्ज्य तथाकट्यूरुपादाख्यपञ्चस्थानेषु चालिप्यालिप्य पूर्ववत्स्नात्वा
गोशकृता पञ्चगव्येन च पूर्ववदालिप्य स्नात्वोत्तीर्य वस्त्रं शुष्कं सप्तवा
ताहतं वा भस्मत्रिपुण्ड्रं च धृत्वा षोडशप्राणायामांश्च कृत्वा नित्यविधाने
नापि सदण्डस्नानं कुर्यात् ॥ यथा—पूर्वं ब्राह्मेण तीर्थेन त्रिरावृत्ततारेण
चुलुकमात्रोदकेन शुद्धेन तीर्थेन प्रणवेन त्रिराचम्य हस्तौ प्रक्षाल्य पादौ
प्रोक्ष्य ओष्ठावुपस्पृश्य तर्जनीमध्यमानामिकाङ्गुलीभिः शिरश्चक्षुर्नासिका
श्रोत्रहृदयमिति, श्रुत्युक्ताष्टाङ्गानिस्पृशेत्। इति त्रिराचम्य त्रिः प्राणाना-
यम्य, क्षौराङ्गं पुनःस्नानं अहं करिष्ये इति सङ्कल्प्य, वस्त्राञ्चलेन कमण्डलुं
निबद्ध्य, दण्डं वामाग्रं हस्तद्वयसन्धौ निधाय द्विकराङ्गुलिभिः श्रोत्र-
नेत्रनासापुटान्याच्छाद्य तीर्थं नारायणं तदन्तर्यामिणं परमेश्वरं

चिन्त्य त्रिर्निमज्य—मूर्ध्नां स्नायात् ॥ अत्र केचित्तु प्रत्यहं दण्डधृ-
नायादिति मन्यन्ते। परेतु वपनाद्यशुद्धिनिमित्तकेष्वेवेति। गङ्गा-
सर्वतीर्थदेवतास्मरणपूर्वकं त्रिर्निमज्य, त्रिराचम्यात्मैवेदं सर्वं तर्प-
मि इति तर्पयित्वा ब्रह्मैवेदं सर्वं तर्पयामि सर्वं खल्विदं ब्रह्म तर्पया-
मि इति च तर्पयित्वा "यत इन्द्रस्य + ते" दण्डं गृहीत्वा दण्डमूला-
मध्येषु पृथक् पृथक् द्वादशप्रणवैस्त्रिवारं मध्ये प्रतिपर्वं त्रिवारं
पर्यवान्तरं द्विवारं च सन्तर्पयेत्। इति दण्डस्नानविधिः।

"आषाढ्यां पौर्णमास्यां तु वपनं कारयेद्यतिः ॥
चातुर्मास्याधिमासाभ्यामन्यत्र वपनं यतेः।
ऋतुसन्धौ पूर्णिमायां सङ्गवस्पृशि वापयेत ॥

त्रिमुहूर्त्ताधिकं ग्राह्यं पर्वणः क्षौरकर्मणि।
अयं तु मुख्यः कल्पस्स्यात द्विमुहूर्त्तस्तु मध्यमः।
ततो न्यूनं न सङ्ग्राह्यं यतिभिस्तु कदाचन ॥

वेधस्तु त्रिमुहूर्त्तस्स्याद्द्विमुहूर्तोऽथवा मतः।
तिथिक्षये विद्धमपि पर्व ग्राह्यं मनीषिभिः ॥

मुहूर्तद्वितयं नोचेत्क्षौरादौ तु परेऽहनि।
दीक्षितो यदि सन्न्यासी वपेत्पर्वणि पर्वणि ॥

क्षौरार्थमभ्यनुज्ञातो गुरुपादौ प्रणम्य च।
कारयित्वा ततः क्षौरं कण्ठादुपरि वाग्यतः ॥

कौपीनं चाङ्गवस्त्रादि तीरे संस्थाप्य मृत्तिकाम् ।
केशलोमनखं भूमौ निपतिष्यति नो यथा ॥
तथैव वापयेत पात्रमास्तीर्याधस्ततस्सुधीः ।
भूमौ तन्निखनेत्पश्चात्स्नातुं गच्छेज्जलाशयम् ॥
हस्ताङ्घ्रिमुखवस्त्रादि शोधयेच्च मृदम्भसा ।
नाभिदघ्ने जले स्थित्वा मृत्तिकास्नानमाचरेत ॥
आदित्याभिमुखो भूत्वा प्रवाहाभिमुखोऽपि वा ।
त्रिराचम्याथ मृत्पिण्डैश्शिरो द्वादशधा पृथक् ॥
शोधयेत्तत्रचैकैकं पिण्डं दक्षिणपाणिना ।
स्नायाद् द्वादशवारं च मृदमालिप्य लिप्य तु ॥
प्राणायामास्षोडशकाः कर्तव्याः क्षौरशुद्धये ।
ततो नित्यविधानेन शुद्धस्नानं समाचरेत् ॥
स्नात्वा धृत्वाऽथ कौपीनं वस्त्राद्यादाय भस्मभृत् ।
गुरुज्येष्ठादिवपनकर्मसाद्गुण्यमाचरेत् ।
कालदेशद्रव्यमन्त्रलोपे तत्तत्प्रशान्तये ॥
प्राणायामान्यथाशक्ति प्रणवं वा जपेत्सुधीः ।
ऋष्यादि वाचिके कुर्यादीश्वरध्यानपूर्वकम् ॥
अष्टोत्तरसहस्रं वा मुच्यते भवबन्धनात् ॥
ऋषिर्ब्रह्मास्य मन्त्रस्य छन्दो गायत्रमुच्यते ।
देवता स शिवस्साक्षात्सत्यज्ञानसुखाद्वयः ॥

एवं न्यासविधानेन ध्यात्वा साम्बं त्र्यम्बकम् ।
जपेत्तारं यथा शक्ति नियतेन्द्रियमानसः ॥ "

अथाषाढ्यां पौर्णमास्यां चातुर्मास्याङ्गमहागुर्वादिपूजाविधिः ॥

अथाषाढ्यां पौर्णमास्यां चातुर्मास्यव्रतारम्भविधिश्च ॥

तत्र कण्ठादुपरि वपनं कारयित्वा विधिवत्स्नात्वा वस्त्रादि-भस्मरुद्राक्षधारणं च कृत्वा पूजां कुर्यात् ।

" आषाढ्यां पौर्णमास्यां तु स्वात्मज्ञानप्रसिद्धये ।
कुर्याद्यतीन्द्रो विधिना गुरुपूजामनुत्तमाम् ॥ १ ॥

नगरग्रामराष्ट्राणां शिवप्राप्त्यै शिवाश्रयाः ।
कारयेयुश्च तां पूजां स्वस्ववित्तानुसारतः ॥ २ ॥

प्रणम्य दक्षिणामूर्तिं ज्ञानमुद्राधरं हरम् ।
नारायणं पद्मभुवं वसिष्ठं शक्तिमेव च ॥ ३ ॥

पराशरमुनिं बादरायणं तत्सुतं शुकम् ।
गौडपादं च गोविन्दयोगीन्द्रं शङ्करं तथा ॥ ४ ॥

एवमन्यान्गुरून्विद्यासम्प्रदायविदः पुरा ।
नत्वा संप्रार्थयेत्तत्र गृहस्थैः प्रार्थितो यतिः ॥ ५ ॥

यतिज्येष्ठैस्समागम्य कनिष्ठैस्सह शास्त्रवित् ।
पूजोपकरणं यत्र प्राङ्मुखस्तूपसंविशेत् ॥ ६ ॥

पीठोपरि नवं वस्त्रमास्तीर्यापरि संयमी ।
क्षालितान् तण्डुलान् शुद्धान् वस्त्रोपरि विकीर्य च ॥ ७ ॥
अवशिष्टं तण्डुलानां भागमादाय मुष्टिना ।
मध्ये पीठाकृतिं व्यूह्याभ्यर्चयेद्देशिकोत्तमान् ॥ ८ ॥
हंसमन्त्रेण पूजां तु सतारेण शिवेन च ।
कुर्याद्यतिर्महापूजां भक्तिभावेन यत्नतः ॥ ९ ॥
हंसोऽन्नमश्शिवायेति पूजयेत्सर्वदेवताः ।
तत्तन्नाम्ना चतुर्थ्यन्तनमोन्तेनैव पूजयेत ॥ १० ॥

हंसमहामन्त्रस्य — आत्मा ऋषिः । अव्यक्तगायत्री च्छन्दः । परमहंसो देवता । हं बीजम् । सः शक्तिः । सोऽहं कीलकम् । मोक्षार्थे विनियोगः । — “हं सोऽन्नम — ”

॥ अथ प्रयोगः ॥

गोमयेनोपलिप्तरङ्गवल्ल्याद्यलङ्कृतशुद्धदेशे चतुरश्रपीठोपरि शुद्धवस्त्रमास्तीर्य तदुपरि क्षालितशुद्धशालितण्डुलान्द्रोणद्वयपरिमितान्विकीर्य, मध्ये चतुरङ्गुलोत्सेधं चतुरश्रं मध्ये स्थण्डिलपञ्चपञ्चकं पूर्वदक्षिणोत्तरपश्चिमासु दिक्षु क्रमेण कृत्वा, तद्बहिराग्नेयनैर्ऋतवायव्यैशान्यान्तरालकोणदिक्षु च स्थण्डिलचतुष्टयं तद्बहिरष्टदिक्षु स्थण्डिलाष्टकं तद्बहिर्दशदिक्षु स्थण्डिलदशकं च, एवं सप्तचत्वारिंशत् स्थण्डिलानि क्रमेण कृत्वा तत्तत्स्थण्डिले तत्तद्देवतापूजार्थं नालिकेर-

नारङ्गबीजापूरजम्बीराद्यन्यतमफलानि निक्षिप्य वक्ष्यमाणविधिना पूजयेत् । आदौ ग्रामवासिनो गृहस्था यतिसाधनोपहारपुरस्सरमुपसङ्गम्य सन्न्यासिनं यतिवर्यं प्रार्थयेयुः ॥

“ आचरन्तां यतिश्रेष्ठाः, चातुर्मास्यव्रतं शुभम् ।
भवन्तोऽत्र वयं यावच्छक्यं परिचरामहे ॥ १ ॥

इति संप्रार्थ्य सर्वेऽपि संकल्पेयुरभीप्सितम् इति ॥

अथ सङ्कल्पः । एतद्देशराष्ट्रनगरग्रामग्रामवासिनां सपुत्रकलत्रमित्रबान्धवानामस्माकं द्विपदां चतुष्पदां च नीरोगदृढगात्रतादीर्घायुष्याद्यभिवृद्ध्यर्थं वापीकूपतटाकनदनद्यादिषु महावर्षाभिवृद्धिद्वाराऽशोष्यजलपूर्णप्रवाहतासिद्ध्यर्थं क्षामक्षोभेतिबाधादिनिवृत्तिद्वारा सर्वसस्याद्यभिवृद्ध्यर्थं सर्वदेशसुभिक्षतासिद्ध्यर्थं च धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थसिद्ध्यर्थं सर्वेषां च सर्वाभीष्टसिद्ध्यर्थं चाषाढ्यां पौर्णमास्यां चातुर्मास्यव्रताचरणाङ्गत्वेन यतिवर्यसन्न्यासिभिर्महागुरुपूजां यथाविभवं कारयिष्यामः । इति सङ्कल्प्य पूजां कारयेयुः ॥

अथ यतिः, — आदौ गुर्वादिवन्दनं कृत्वा, गणपतिमाग्नेयान्तरालस्थण्डिले संपूज्य सङ्कल्पं करोति । सन्न्यासप्रभृतिएतत्क्षणपर्यन्तं ममाऽऽश्रमधर्मानुष्ठानवैकल्यनिवृत्तिद्वारा प्रकृतचातुर्मास्यव्रतनियमपौष्कल्यसिद्ध्यर्थं महागुर्वादीनां ब्रह्मविद्यासम्प्रदायपरम्परागुरूणाञ्च प्रसादात् ब्रह्मात्मैक्यसाक्षात्कारसिद्ध्यर्थं,

यथासम्भवोपचारैर्महागुर्वादिपूजां करिष्ये ।" इति संकल्प्य, वक्ष्यमाणप्रकारेण पूजां कुर्यात् । मध्यपूर्वदक्षिणोत्तरपश्चिमस्थण्डिलेषु पञ्च पञ्चकेषु यथा क्रमम् । तत्र मध्ये पञ्चके । मध्ये "ईशानस्सर्वविद्यानां "सदाशिवोम् ॥" ओं ह्रीं हंसः" इतीशानरूपदक्षिणामूर्तिमहागुरुं आवाह्य प्राणप्रतिष्ठां कृत्वा । सद्योजातविधिना चतुर्थ्यन्ततत्तन्नामभिर्वा नमोऽन्तैरासनादिषोडशोपचारान् पुष्पादिभिः कुर्यात् यथा क्रमम् ॥

एवं मध्यस्थण्डिलपञ्चकमध्यस्थण्डिले सम्पूज्य एवं वक्ष्यमाणक्रमेण मन्त्रेणान्येष्वपि पूजयेत् ॥ १ ॥ अथ मध्यपञ्चकपूर्वस्थण्डिले "तत्पुरुषाय विद्महे + प्रचोदयात्" इति तत्पुरुषम् ॥ २ ॥ दक्षिणे "अघोरेभ्यो + रुद्ररूपेभ्यः" इत्यघोरम् ॥ ३ ॥ उत्तरे "वामदेवाय नमो + मनोन्मनाय नमः" इति वामदेवम् ॥ ४ ॥ पश्चिमे "सद्योजातं प्रपद्यामि + भवोद्भवाय नमः" इति सद्योजातम् ॥ ५ ॥ इतीशानादिमहागुरून् तत्तन्मन्त्रेण सम्पूज्य, अथ पूर्वस्थण्डिले मध्ये शङ्करभगवत्पादाचार्यम् ॥ १ ॥ पूर्वे पद्मपादाचार्यम् ॥ २ ॥ दक्षिणे सुरेश्वराचार्यम् ॥ ३ ॥ उत्तरे तोटकाचार्यम् ॥ ४ ॥ पश्चिमे हस्तामलकाचार्यम् ॥ ५ ॥ अथ दक्षिणे मध्ये श्रीगुरून् ॥ १ ॥ पूर्वे श्रीपरमगुरून् ॥ २ ॥ दक्षिणे श्रीपरमेष्ठिगुरून् ॥ ३ ॥ उत्तरे परापरगुरून् ॥ ४ ॥ पश्चिमे ब्रह्मविद्यासम्प्रदायगुरून् ॥ ५ ॥ अथोत्तरे मध्ये—व्यासाचार्यम् ॥ १ ॥ पूर्वे ऋभुम् ॥ २ ॥ दक्षिणे

निदाघम् ॥ ३ ॥ उत्तरे दूर्वाससम् ॥ ४ ॥ पश्चिमे दत्तात्रेयम् ॥५॥ अथ पश्चिमे मध्ये सनकम् ॥ १ ॥ पूर्वे सनन्दनम् ॥ २ ॥ दक्षिणे सनातनम् ॥ ३ ॥ उत्तरे सनत्कुमारम् ॥४॥ पश्चिमे ब्रह्मर्षीन् ॥५॥ अथ पञ्च पञ्चकाद्बहिः पूर्वाद्यष्टदिक्षु यथाक्रमम् । पूर्वस्यामनन्तेशम् ॥ १ ॥ आग्नेय्यां सूक्ष्मेशम् ॥ २ ॥ दक्षिणायां शिवोत्तमेशम् ॥ ३ ॥ निर्ऋत्यामेकनेत्रेशम् ॥४॥ पश्चिमायामेकरुद्रेशम् ॥५॥ वायव्यां त्रिमूर्तीशम् ॥ ६ ॥ उत्तरस्यां श्रीकण्ठेशम् ॥ ७ ॥ ऐशान्यां शिखण्डीशम् ॥ ८ ॥

अथ पञ्च पञ्चकान्तरालकोणेषु आग्नेयादिषु क्रमेण आदौ सङ्कल्पात्पूर्वमाग्नेयकोणे महागणपतिम् ॥ १ ॥ नैर्ऋते दुर्गाम् ॥ २ ॥ वायव्ये महालक्ष्मीं ॥ ३ ॥ ऐशान्यां भैरवम् ॥ ४ ॥ अथ सर्वस्माद्बहिर्दशदिक्षु पूर्वस्यामिन्द्रम् ॥ १ ॥ आग्नेय्यामग्निम् ॥ २ ॥ दक्षिणस्यां यमम् ॥ ३ ॥ निर्ऋत्यां निर्ऋतिम् ॥ ४ ॥ पश्चिमायां वरुणम् ॥ ५ ॥ वायव्यां वायुम् ॥ ६ ॥ उत्तरस्यां कुबेरम् ॥ ७ ॥ ऐशान्यामीशानम् ॥ ८ ॥ इन्द्रेशानयोर्मध्ये ब्रह्माणम् ॥ ९ ॥ निर्ऋतिवरुणयोर्मध्ये विष्णुं च । एवं क्रमेण सर्वान् प्रत्येकंषोडशोपचारैस्संपूज्य समष्ट्या महानैवेद्यादिमहादीपाराधनान्तानुपचारान् कृत्वा दक्षिणामूर्त्यष्टकपद्यैश्च नमस्कृत्य कैवल्याथर्वशिरःशिखादिभिरुपनिषद्भिश्च स्तुत्वा "यो ह वै रुद्रः स भगवानित्यादिभिश्चतुस्त्रिंशत्पर्यायैश्चोर्ध्वबाहुःस्तुन्वीत । तत्प्रकारः ॥

ओं हरों यो ह वैरुद्रस्स भगवान् यश्च ब्रह्मा भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ १ ॥ हरों योहवै रुद्रस्स-भगवान् यश्च विष्णुर्भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ २ ॥ हरों योहवैरुद्रस्स भगवान् यश्च महेश्वरो भूर्भुवस्सुवस्तस्मै वै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ ३ ॥ हरों यो हवै-रुद्रस्स भगवान् याचोमा भूर्भुवस्सुवस्तस्मै वै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ ४ ॥ हरों योहवैरुद्रस्स भगवान् यश्च विनायको भूर्भुवस्सुवस्तस्मै वै नमो नम श्शीर्षंजनदों विश्वरूपोऽसि ॥ ५ ॥ हरों योह-वैरुद्रस्स भगवान् यश्चस्कन्दो भूर्भुवस्सुवस्तस्मै वै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ ६ ॥ हरों योहवै रुद्रस्सभगवान् यश्चेन्द्रो भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ ७ ॥ हरों योहवैरुद्रस्सभगवान् यश्चाग्निर्भूर्भुवस्सुवस्तस्मैवै नमो नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ ८ ॥ हरों योहवैरुद्रस्सभगवान् या च भूर्भूर्भुवस्सु-वस्तस्मै वै नमो नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ ९ ॥ हरों योह-वै रुद्रस्सभगवान् यश्चभुवो भूर्भुवस्सुवस्तस्मैवै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ १० ॥

हरों योहवै रुद्रस्सभगवान् यश्च सुवो भूर्भुवस्सुवस्तस्मै वै नमो-नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ ११ ॥ हरोंयो हवैरुद्रस्सभगवान् यश्च महो भूर्भुवस्सुवस्तस्मैवै नमो नमश्शीर्षंजनदोंविश्वरू-पोऽसि ॥ १२ ॥ हरों योहवैरुद्रस्स भगवान् यश्च जनो भूर्भुवस्सुव

स्तस्मैवै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ १३ ॥ हरों योहवै रुद्रस्सभगवान् यश्च तपो भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ १४ ॥ हरों योहवै रुद्रस्सभगवान् यश्च सत्यं भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षंजनदों विश्वरूपोऽसि ॥ १५ ॥ हरों योहवै रुद्रस्स भगवान् या च पृथिवी भूर्भुवस्सुवस्तस्मैवै नमो-नम श्शीर्षंजनदों विश्वरूपोऽसि ॥ १६ ॥ हरों योहवैरुद्रस्स भग-वान् याश्चापो भूर्भुवस्सुवस्तस्मै वै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ १७ ॥ हरों योहवैरुद्रस्स भगवान् यश्च तेजो भूर्भुवस्सुवस्तस्मै वैनमो-नमश्शीर्षंजनदों, विश्वरूपोऽसि ॥ १८ ॥ हरों योहवैरुद्रस्सभगवान्, यश्चवायुर्भूर्भुवस्सुवस्तस्मै वै नमोनमश्शीर्षंजनदों, विश्वरूपोऽसि ॥१९॥ हरों योहवै रुद्रस्सभगवान् यश्चाकाशं भूर्भुवस्सुवस्तस्मैवै नमोनम-श्शीर्षंजनदों विश्वरूपोऽसि ॥ २० ॥

हरों योहवैरुद्रस्सभगवान् यश्चसूर्यो भूर्भुवस्सुवस्तस्मै वै नमोनम श्शीर्षंजनदों विश्वरूपोऽसि ॥ २१ ॥ हरों योहवैरुद्रस्सभगवान् यश्च सोमो भूर्भुवस्सुवस्तस्मै वै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ २२ ॥ हरों योहवै रुद्रस्सभगवान्, यानिच नक्षत्राणि, भूर्भुवस्सु-वस्तस्मै वै नमोनमश्शीर्षंजनदों विश्वरूपोऽसि ॥ २३ ॥ हरों योहवै रुद्रस्सभगवान् ये, चाष्टौ ग्रहा भूर्भुवस्सुवस्तस्मै वै नमो नमश्शीर्षं जनदों विश्वरूपोऽसि ॥ २४ ॥ हरों योहवै रुद्रस्सभगवान् यश्च प्राणो भूर्भुवस्सुवस्तस्मै वै नमोनम श्शीर्षंजनदों विश्वरूपोऽसि ॥ २५ ॥

हरों योहवै रुद्रस्सभगवान् यश्च कालो भूर्भुवस्सुवस्तस्मै वै नमोनम इशीर्षंजनदों विश्वरूपोऽसि ॥ २६ ॥ हरों योहवै रुद्रस्सभगवान् यश्च यमो भूर्भुवस्सुवस्तस्मै वै नमो नम इशीर्षंजनदों विश्वरूपोऽसि ॥ २७ ॥ हरों योहवै रुद्रस्स भगवान् यश्च मृत्युर्भूर्भुवस्सुवस्तस्मै वै नमोनम इशीर्षंजनदों विश्वरूपोऽसि ॥ २८ ॥ हरों योहवै रुद्रस्सभगवान् यश्चामृतं भूर्भुवस्सुवस्तस्मै वै नमोनमइशीर्षंजनदों विश्वरूपोऽसि ॥ २९ ॥ हरों योहवै रुद्रस्सभगवान् यच्च भूतंभव्यं भविष्यत् भूर्भुवस्सुवस्तस्मै वै नमोनमइशीर्षंजनदों विश्वरूपोऽसि ॥ ३० ॥

हरों योहवै रुद्रस्सभगवान् यच्च विश्वं भूर्भुवस्सुवस्तस्मै वै नमोनमइशीर्षंजनदों, विश्वरूपोऽसि ॥ ३१ ॥ हरों योहवै रुद्रस्सभगवान् यच्च कृत्स्नं भूर्भुवस्सुवस्तस्मै वै नमोनम इशीर्षंजनदों विश्वरूपोऽसि ॥३२॥ हरों योहवै रुद्रस्स भगवान् यच्च सर्वं भूर्भुवस्सुवस्तस्मै वै नमोनमइशीर्षंजनदों विश्वरूपोऽसि ॥ ३३ ॥ हरों योहवै रुद्रस्सभगवान् यच्च सत्यं भूर्भुवस्सुवस्तस्मै वै नमोनम इशीर्षंजनदों विश्वरूपोऽसि ॥ ३४ ॥ यो ब्रह्माणं विदधाति + प्रपद्ये इत्यादि स्तुत्वा तीर्थपुष्पादीन् स्वीकृत्य सर्वेषां च दत्त्वा--

अथ ग्राममहाजनगृहस्थान् प्रति यतीश्वरवचनम् ॥

"प्रायशः प्रावृषि प्राणिसङ्कुलं दृश्यते स्थलम् ।
अतस्तेषामहिंसार्थं, मासान्वै चतुरस्त्विह ॥

[अतस्तेषामहिंसार्थं पक्षा वै श्रुतिचोदनात् ।
स्यास्यामश्चतुरोमासानत्रैवासति बाधके ॥]
निवसामोऽत्र भवतामानुकूल्येन सर्वथा ।
जीवाङ्कुराणां जीवानामहिंसाहेतवेऽपि च ॥ २ ॥

अथ गृहस्थप्रार्थना ॥

निवसन्तु महान्तोऽत्र यावच्छक्ति मुदा वयम् ।
यावत्कार्तिकमासान्तं परिचर्यामहे वयम् ॥
दीनानस्मान् भवन्तोऽत्र स्थित्वा रक्षन्त्वपाङ्गतः ॥
भवतामर्चनं भूतिकामानां शिवमेव नः ॥

इति प्रतिवचनं दत्त्वा ॥

इति संप्रार्थ्य गृहिभिर्निधाय यतिसाधनम् ।
कौपीनदोरवासांसि भस्मभस्त्रिं तथाऽऽविकम् ॥ ३ ॥
मृद्दण्डकुण्डिकादन्तकाष्ठाद्यद्यथार्हतः ।
सन्निधाय पुरोनित्यं भिक्षार्धः परिरक्षयेत् ॥ ४ ॥ इत्युक्तेन प्रकारेण वयं कुर्मो यथाविधि । एवं वस्त्रादिकं पूर्वं समर्प्य प्रार्थयेयतिम् ॥ ५ ॥ इति ॥

—अथ भिक्षाटनम्—

"सर्वान्तरात्मन् भो भर्ग त्वन्नियोगाच्चलन्ति मे । भिक्षार्थमिन्द्रियाण्यद्य पर्यटामि प्रसीद मे ॥" अथ प्रथमदिनादिभिक्षावरणफलम् ॥

प्रथमेऽहनि यो भिक्षां वृणुयात्स महाभगी ।
द्वितीयां च तृतीयां च तथा पुत्रार्थकामिनौ ॥ १ ॥

इति वचनात्क्रमात् प्रथमभिक्षावरणे महाभाग्यवान् , द्वितीये पुत्रवान् , तृतीयादिषु सर्वार्थवांश्च क्रमाद्भवतीत्यर्थः ॥ प्रसङ्गाद्यति-सन्न्यासिविषये किञ्चिद् विज्ञाप्यते ।—

" अङ्गुष्ठमात्रयेदेवामन्त्राभ्यां तु विशेषतः ।
यतिसन्न्यासिनं भिक्षुं भिक्षान्नं भोजयेत्तु यः ॥ १ ॥

स सत्रयागकृन्नित्यं सार्वदैवत्यलिङ्गतः ।
त्रयस्त्रिंशत्कोटिदेवबृन्दानाञ्चैव तृप्तिकृत् ॥ २ ॥

तस्माच्च चित्तनैर्मल्याच्छुश्रूषाकरणादपि ।
सम्यग्ज्ञानमवाप्येह जीवन्मुक्तो भवेद्ध्रुवम् ॥ ३ ॥

प्रारब्धक्षयपर्यन्तं सुखेन विचरन् भुवि ।
प्रारब्धान्ते देहनाशात् पूर्णो भवति सर्वदा ॥ ४ ॥

सन्न्यासं कारयेद्यस्तु ब्रह्मलोकं स गच्छति ।
सन्न्यासविघ्नकर्ता तु रौरवं नरकं व्रजेत् ॥ ५ ॥

महापापहतो वाऽपि महारोगगतोऽपि वा ।
प्रैषमात्रेण सन्न्यासी ब्रह्मलोकं स गच्छति ॥ ६ ॥

येनकेन प्रकारेण सन्न्यासेन मृतो यदि ।
ब्रह्मलोकमवाप्यैव ब्राह्मणो मुक्तिमाप्नुयात् ॥ ७ ॥

यतिसन्न्यासिदेवादिसन्निधौ तु विशेषतः ।
कृतं यद्वृद्धिकादि प्रायश्चित्तशुभादिकम् ॥ ८ ॥

वेदपारायणं तद्वत् पुरश्चर्याजपादिकम् ।
तत्सर्वं सिद्धिदं सद्यः प्रतिबन्धविवर्जितम् ॥ ९ ॥

तस्मात्सर्वप्रयत्नेन यतिशुश्रूषणे रतः ।
तत्सन्निधौ प्रकुर्वीतापीश्वरश्च प्रसीदति ॥ १० ॥

✓औदासीन्याद्भवेन्मृत्युरवमानात्पतेदधः ।
काषायदण्डमात्रेण यतिः पूज्यो भवत्यलम् ॥ ११ ॥

तदाश्रितान्विशेषेण परिचर्यादिकारिणः ।
अवमानं प्रमादेन द्वेषतोऽपि करोति यः ॥ १२ ॥

महापापमवाप्नोति क्षीणायूरोगपीडितः ।
दरिद्रश्च भवेन्नूनं तस्य वंशोऽपि नश्यति ॥ १३ ॥

तस्मात्सर्वप्रकारेण साधून् सन्तोषयेत्सुधीः ।
तेनैव सर्वसौभाग्यं सर्वश्रेयश्च विन्दति ॥ १४ ॥

इत्यादिकालीपुराणे दूर्वासःप्रोक्तप्रमाणवचनानि यतिविषयतया द्रष्टव्यानि ॥

दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् ।
गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत् ॥

दिनेदिने तु वेदान्तमहावाक्यार्थचिन्तनात् ।
सूत्राणां पठनाच्चापि कृच्छ्राशीतिफलं लभेत् ॥

इत्यादि। प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति। पूजाकाले श्रीरुद्र नमकपुरुषसूक्तपञ्चब्रह्मोपनिषदादिमहामन्त्राणि च ब्राह्मणैः पाठयेत् ॥

॥ अथ यतिवन्दनम् ॥

तारेण पञ्चाक्षर्या वा नमस्कुर्याद्यतीश्वरम् ।
महेशबुद्ध्या बहुशो नानयोर्विद्यते भिदा ॥

एवं पूजां समाप्य रात्रावपि सङ्ग्रहेण पूजां कृत्वा पूर्ववत् प्रदक्षिणनमस्कारान् कृत्वाऽभीष्टं प्रार्थ्यावाहिता देवता हृदुद्वास्य सर्वेषां अक्षतादिप्रसादञ्च दद्यात् ॥

इति महागुर्वादिपूजाविधिः ॥

अथ चातुर्मास्यान्ते कार्तिकपौर्णमास्यां दीक्षाविसर्जनम् कण्ठादुपरि वपनं सम्प्रदायानुसारेण कृत्वा पूर्ववद्यथाविधि स्नानादि कृत्वा शिष्यादिभिः पादपूजादिभिक्षान्तं कारिते विश्वरूपयात्रां कुर्वन् ग्रामान्तरादीन् गच्छेत् ॥

इति चातुर्मास्यव्रतानुष्ठानविधिः ॥

एवं प्रतिसंवत्सरं कुर्यात्। एवं यतिसन्न्यासिनां नियम इति सम्प्रदायः ॥

॥ अथ यतिसंस्कारविधिः ॥

अविमुक्तेऽपि वाऽन्यत्र क्षेत्रे यतिवरं मृतम् ।
यतयो वाऽथ पुत्राद्याः स्नाप्य वस्त्रेण वेष्ट्य च ॥ १ ॥

भस्मनाऽऽलिप्य सर्वाङ्गं त्रिपुण्ड्रं धारयेत्ततः ।
योगपट्टेन चाबद्ध्य पूजयेद्रुद्रमन्त्रतः ॥ २ ॥

भस्मरुद्राक्षभूषाढ्याश्शम्भुभक्ता महत्तराः ।
रथशिक्यं समारोप्य बिभृयुर्भूतिकाङ्क्षिणः ॥ ३ ॥

नानावाद्यैस्स्वस्तिपाठैर्लाजपुष्पौघवृष्टिभिः ।
ग्रामं प्रदक्षिणीकृत्य यास्यन्ति सलिलाशयम् ॥ ४ ॥

सन्न्यासी शिवलिङ्गं हि तेन तस्यार्हणं भवेत् ।
नमोऽन्तशिवमन्त्रेण नमस्कुर्युश्शिवेप्सवः ॥ ५ ॥

तीरेऽवरोप्य माल्राश्वत्थमूले शुचिस्थले ।
दण्डप्रमाणगर्ते त्रिर्व्याहृतिभिरवोक्ष्य च ॥ ६ ॥

प्रणवव्याहृतिभिश्च पञ्चब्रह्मैश्च वेदिकाम् ।
दर्भैरास्तीर्य परितश्चैलाजिनकुशोत्तरे ॥ ७ ॥

योगासनस्थं तं श्वभ्रे निधाय प्रणवेन च ।
वामदक्षिणपार्श्वे च दद्याद्दण्डकमण्डलू ॥ ८ ॥

"प्रजापते नत्वदि"ति मन्त्रयेद्धृदयं यतेः ।
भ्रूमध्ये "ब्रह्मजज्ञानं" "ऋतंसत्य"मिति द्वयम ॥ ९ ॥

"मानोमहान्तमि"त्यादिचतुर्भिर्मस्तकस्थलम् ।
"अग्निर्मूर्द्धे"ति मूर्धानमिति स्पृष्ट्वा समुच्चरन् ॥ १० ॥

लवणैरिसकताभिश्चास्याकण्ठं पूरयेद्यतेः ।
नालिकेरेण निर्भिन्द्यात् प्रणवेनोचितेन वा ॥ ११ ॥

वैदिकेनोचितेनेति वचनादेव नान्यतः ।
"शतंचे"ति स्मरन्मन्त्रं प्रणवेनैव भेदयेत् ।
रन्ध्रे निक्षिप्य भसितं पूजयेत्प्रणवेन च ॥ १२ ॥

"यो देवानामि"ति मनुं परमेश्वरवाचकम् ।
"यो वेदादावि"ति तथा मन्त्रमुच्चारयेदपि ॥ १३ ॥

जप्त्वा गर्तं समापूर्य वेदिं कुर्याच्च गोमुखीम् ।
अन्यथा "भूमि"रित्यादिमन्त्रेण तु विरुध्यते ॥ १४ ॥

शिरःप्रहारस्तेनेति केचिदाहुर्न युज्यते ।
सद्यो लिङ्गं विनिर्माय रङ्गवल्ल्याद्यलंकृते ॥ १५ ॥

वितानतोरणैर्युक्ते मण्डपे पूजयेद्गुरुम् ।
कालाग्निरुद्रकैवल्यश्वेताश्वतरमन्त्रतः ॥ १६ ॥

अथर्वशिरसादेवं शिखया स्तुतिमाचरेत् ।
नालिकेरकणं कर्ता समाघ्राय प्रदापयेत् ॥ १७ ॥

गर्भिण्यस्सुतका दक्षिण्यो भक्षयेयुः परे जनाः ।
स्नात्वाऽवभृथवुद्ध्याथ ग्रामं गच्छेत् प्रसन्नधीः ॥ १८ ॥

न रुदेत्साश्रुमोक्षं वा कुर्यात्कश्चिच्चतोऽपि वा ।
माधूकराशी शिष्यश्चेत् प्रत्यहं ब्रह्म तर्पयेत् ॥ १९ ॥

अन्योऽपि यः कश्चिदिह सङ्कोचेन्न हि तर्पणे ।
आत्मानमन्तरात्मानं परमात्मेति तर्पयेत् ॥ २० ॥

यतिसंस्कारतो ग्रामदेशानां नृपतेश्शुभम् ।
निर्माय मण्डपं तत्र शिवलिङ्गं प्रपूजयेत् ॥ २१ ॥

अश्वत्थस्थापनं कुर्यात्तद्देशेऽध्वर्युणा मुने ।
अश्वत्थे स्थापिते तत्र स्थापितो हि महेश्वरः ॥ २२ ॥

एवं क्षत्रियवैश्यानां संस्कारविधिरीरितः ।

(कर्तॄणामिति शेषः ।)

अयं च परमहंससन्न्यासिविषयः। कुटीचकादीनान्तु अनन्तरं दहनादेरपि पुनः कर्तव्यत्वविधानात् ॥ कर्तुर्नाशौचमुद्दिष्टं पुण्यं स्यादथ चाक्षयम् ॥ तत एकादशे वाह्नि वेदिमालिप्य गोमयैः । नानोपहारैर्बिल्वैश्च पूजयेद्गुरुमादरात् ॥ २४ ॥ अयं दशमेह्निपूजा-विकल्पः । इत्यादि कालीपुराणादिवचनैस्सम्प्रदायानुसारेण च प्रयोगो विलिख्य प्रदर्श्यते ॥

अथ प्रयोगः—परमहंससन्यासिविषयः ॥ काश्यादिपुण्य-क्षेत्रेषु यत्र क्वापि वा सिद्धिं गतं यतिं सन्यासिनं परमहंसं पुत्राद्या-सन्नबान्धवाः शिष्यादयो वा ब्रह्मचारिणो यतयो वा क्षत्रियादयोऽपि

वा समीपस्थास्स्नापयित्वा वस्त्रेणावेष्ट्य भस्मना सर्वाङ्गोध्दूलनत्रिपुण्ड्र-
रुद्राक्षमालिकाश्च धारयित्वा योगपट्टेन चाबद्ध्य कर्तारः स्वयं पुत्रादि-
सम्बन्धिनश्चेत् (पुत्राद्यधिकारिषट्कस्यैव वपनपूर्वं संस्कारवचनस्य
सत्त्वात्।) सर्वाङ्गवपनपूर्वकं स्नानानुज्ञादि कुर्युः। अन्ये शिष्यादयश्चेत्
वपनं विना सर्वं साधारणं कुर्युः। केचित्तु पुत्रव्यतिरिक्तानां च 'षण्मामेव'
वपनमिति। अन्ये तु वपनं संस्कर्तॄणां सर्वेषामपीति। केचित्तु—
यतिं सन्न्यासिनं विनेति। यथादेशाचारं कर्तव्यमिति। पुत्रस्तु
सर्वाङ्गवपनं कृत्वा यथाविधि स्नात्वा शुष्कवस्त्रद्वयभस्मोध्दूलन-
तिर्यक्त्रिपुण्ड्ररुद्राक्षमालाधरः। ब्राह्मणाननुज्ञाप्य गोत्रनामसंकीर्त्य
सिद्धिं गतं परमहंसपरिव्राजकं मम पितरं गुरुं खननकर्मणा संस्करिष्य
इति संकल्प्य सर्वं कुर्यात् यथाविधि। यतिशरीरं स्नानादिभिरलङ्कृत्य
श्रीरुद्राद्यथर्वशीर्षादिमन्त्रैरावाहनादिषोडशोपचारैर्वेदाद्यभिमन्त्रितकुम्भो-
दकाभिषेकरूपमहाभिषेकपूर्वकं यथाविभवविस्तरं संपूज्याथ रथा-
दिरूपशिक्ये स्वलङ्कृते यतिशरीरं समारोप्य भस्मरुद्राक्षभूषिताः शिव-
भक्ता महागुरुभक्ता उपनिषदाद्युक्तशिवनामान्युच्चरन्तो यतिशरीरं
नमस्कृत्य, सोपहारहस्ता उद्वहन्तो नानावाद्यैरुपनिषदादिस्वस्तिवाचन-
मङ्गलपाठैर्लाजपुष्पौघवृष्टिभिर्ग्रामं प्रदक्षिणीकृत्य जलाशयतीरमानीय
बिल्वाश्वत्थमूलशुद्धदेशे वाऽऽरोप्य स्थापयित्वा पूर्ववत्पूजां कृत्वा शुद्ध-
देशे दण्डप्रमाणं कुण्डगर्तं खात्वा व्याहृतिभिः प्रणवेन च त्रिः प्रोक्ष्य
प्रणवव्याहृतिभिः पञ्चब्रह्ममन्त्रैश्च वेदिकां परितो दर्भैः परिस्तीर्य चेला-

जिनकुशोत्तरे योगपीठासनस्थं तं प्रणवेन श्वभ्रे निधाय वामदक्षिणपार्श्व-
योर्दण्डंमुद्रां विसृज्य त्रिधा च्छित्वा कमण्डलुञ्च क्रमेण प्रणवेन निदध्यात्
"प्रजापते+रयीणां।" इति हृदयं स्पृष्ट्वाऽभिमन्त्र्य "ब्रह्मजज्ञानं+विवः'
"ऋतगँसत्यं × नमोनमः" इति द्वाभ्यां भ्रूमध्ये "मानोमहान्तम्
+ रीरिषः" "मानस्तोके + विधेमते" "अग्निर्मूर्द्धा + जिन्वति"
"मूर्धानं दिवो × देवा" इति चतसृभिर्मस्तकं स्पृष्ट्वा जपेत्।
लवणादिभिराश्रूदेशमापूर्य तच्छिरो निश्चलं कृत्वा उचितेन दशमरन्ध्र-
भेदनार्थकेन वैदिकमन्त्रेण लौकिकेन नालिकेरफलशस्त्राश्मादिना-
यतिशिरो बिन्द्यात्। तत्र शिरोभेदने उचितवैदिकमन्त्रस्तावत—भि
"शतंचैका च + उत्क्रमणे भवन्ति" इति वाक्यं मनसा स्मरन्
प्रणवेनैव मन्त्रेण भिन्द्यात्। नतु भूमिर्भूमिमिति। 'शतं चेति
स्मरन् मन्त्रं प्रणवेनैव भेदयेदि" ति वचनात्। ततो भिन्नशिरस्थाने
भस्म निक्षिप्य प्रणवेनैव पूजयित्वा "यो देवानां + संयुनक्तु।"

"योवेदादौ + महेश्वरः" इति जपित्वा गर्तं लवणसिकता-
मृत्तिकाभिरापूर्य शिर आरभ्याभिज्ञानदण्डमेकं प्रतिष्ठाप्य उत्तर-
दिग्गोमुखीं वेदिं कृत्वा तत्र विज्ञानदण्डाग्रे सद्य एव मृण्मयादि
शिवलिङ्गं प्रतिष्ठाप्य नागवल्ल्यादितोरणालङ्कारैरलङ्कृत्य तीर्थेऽवभृथ-
बुद्धया स्नात्वा शुद्धवस्त्रद्वयभस्मोध्दूलनसजलशुद्धभस्मतिर्यक्त्रिपुण्ड्र-
रुद्राक्षमालिकाधरः कर्ता गुरुं प्रत्यहं कालयोः आ आराधनात्—
त्रयोदशाहान्तमुपचारैः पूजयेत। ततः कालाग्निरुद्रकैवल्य श्वेता-

श्वतराथर्वशिरश्शिखामन्त्रैश्च स्तुन्वीत । सुतश्शिष्यो वा कर्ता प्रत्यहं क्षीरेणोदकेन वा वेदिकायां पूजादौ आत्मानं तर्पयामि । अन्तरात्मानं तर्पयामि । परमात्मानं तर्पयामि इति तर्पयित्वा, पूर्ववत्पूजयित्वा पायसं निवेद्य ब्रह्मनिष्ठाय शिवभक्ताय दद्यात् । नेतराय कदाचन । प्रातः काल एव तर्पणदाने । न सायम् । तदा पूजामात्रमेव । एवं दश-दिनपर्यन्तं वेदिकापूजां कृत्वा तस्मिन्दिनएव महापूजां यथाविस्तरं कुर्यात् । एवं सन्न्यासिकर्तॄणामपि समानम् । पार्वणादित्रयाणां विशेषविधानात् । "सन्न्यासिनान्तु कर्तॄणां समानं पूजनादिकम् । पार्वणादित्रयं सर्वं ब्राह्मणानान्तु भोजनैः" इत्यादिवचनात् । इति ॥

॥ अथ पार्वणश्राद्धविधिः ॥

"अवस्थात्रयहीनानां यतीनां द्वादशेऽहनि ।
श्राद्धाधिकारसिद्ध्यर्थं पार्वणन्तु सुतश्चरेत ॥" इति —

कुटीचकादित्रयपरम् । पुत्रस्य च द्वादशाहे पार्वणविधानात् । "अहन्येकादशे प्राप्ते कुर्यात्तस्यैव पार्वणम् ॥" इति तु परमहंसस्यैव एकादशे पार्वणविधानात् । एकादशे पार्वणं द्वादशे बलिः त्रयोदश आराधनमिति च व्यवस्थापनात् । कुटीचकादिसंस्कारे (सन्न्यासे) द्वादशाहं भवेत् क्रिया । त्रयोदशाहं पुत्रस्य परहंसयतौ मृते ॥ १ ॥ कुटीचकादित्रितयं सन्न्यासं वैष्णवं विदुः । शैवं परमहंसाख्यं शिवः प्राह यतीश्वराः ॥ २ ॥ इत्यादि विशिष्य व्यवस्थावचनात् । एकादशाहे पैतृकपार्वणम् पुत्रकर्तृकपरमहंसशैवसन्न्यासिपरम् . इति

व्यवस्था । द्वादशे पार्वणं एकादशे बलिरिति चैतत्सर्वमपि कुटीचका-दित्रयवैष्णवसन्न्यासिपरमेवेति च ॥

"चतुर्विधानां भिक्षूणां ज्ञातिबन्धुसुतादिभिः । द्वादशेऽहनि-कर्तव्यं तेषां श्राद्धं तु पार्वणम्" इति च कुटीचकादित्रयपरमेव । द्वादशाहे पार्वणविधानात् । तत्रैव परमहंसविषयेऽपि पुत्रेतरशिष्य-बान्धवादिकर्तृकदैवपार्वणपरमेवं । कुटीचकादिपुत्रस्य तु एकादश एव नारायणबलिपूर्वकं पाकान्तरेण पैतृकपार्वणश्राद्धविधानाच्च । कुटीच-कादीनां च एकादशे नारायणबलिरिति तु पुत्रेतरविषयत्वं स्पष्टमेव ॥ —यतीनां प्रेतकार्ये तु नरकं याति निश्चयम् ॥ (कर्तेति शेषः) उदकं नात्र दातव्यं न पिण्डं श्राद्धमेव च (उदकं वासोदकादि । पिण्डं प्रेतपिण्डादि) श्राद्धं नवश्राद्धादि प्रेतश्राद्धमित्यर्थः ॥

"पुंसः प्रव्रजिनः प्रोक्तं नेतरेषां कदाचन" । (पार्वण-श्राद्धमिति शेषः । नाशौचं नाग्निकार्यं च न पिण्डं नोदकक्रिया । न कुर्यात् पार्वणादन्यत् ब्रह्मीभूताय भिक्षवे ॥ दग्धस्य दहनं नास्ति न च श्राद्धं न च क्रिया ॥ (प्रेतश्राद्धादिक्रियेत्यर्थः) "एकादशेऽहनि श्राद्धं कुर्यात्पैतृकवत्सुतः । एकादशाहे श्रुत्वा तु स्नात्वा वपन-पूर्वकं ॥ १ ॥ तस्मिन्नेव दिने श्राद्धं कुर्याद्विधिबलेन तु । (श्राद्धं क्षीरादितर्पणादेरुपलक्षणम्) द्वादशाहादिषु श्रुत्वा परेद्युः पार्वणं चरेत् ॥ २ ॥ (परेद्युरिति द्वादशादिदशाहात्परेद्युरित्यर्थः) ॥

"अथवाऽनन्तरे मासि मृताहे पार्वणं चरेत्" तत्रासम्भवे वा शिष्यादिविषयो वा। इति "औरसो दत्तपुत्रश्च भ्राता च भ्रातृपुत्रकः। दौहित्रो भागिनेयश्च यतेस्संस्कारकर्मणि ॥ १ ॥ वपनस्नानमेतेषां षण्णामेव विधीयते। इतरेषां यतीनां तु स्नात्वा कर्म समाचरेत् ॥ २ ॥ (कर्तॄणामिति शेषः।) दौहित्र इति पौत्रादेरप्युपलक्षणम्। "एकादशाहे खननात् परहंसयतेर्मृतौ। श्राद्धाधिकारसिद्ध्यर्थं पार्वणं तु सुतश्चरेत् ॥ १ ॥ इति वचनाच्च परमहंसयतिमृतौ औरसपुत्रः, खननादेकादशाहे दर्शादिसर्वश्राद्धाधिकारसिद्ध्यर्थं पैतृकपार्वणश्राद्धं कुर्यादिति। किञ्च "वृथा सङ्करजातीनां प्रवृज्यादिषु तिष्ठताम्। आत्मनस्त्यागिनां चैव निवृत्ते नोदकक्रिया। नाशौचं नाश्रुपातं च न दाहाद्यन्त्यकर्म च" इति प्रव्रजितानां च सामान्यतः क्रियामात्रनिषेधस्मरणं प्रेतक्रियादिमात्रपरम् ॥

एवञ्च स्मृतीनां विप्रतिपत्तौ केचित्तु—"ताते पितरि + येभ्य एव पिता दद्यात तेभ्यो दद्यात्स्वयं सुतः। पितामहादीनुद्दिश्य पार्वणं तु सुतश्चरेत् ॥ इति स्मृतिवचनादिति तत् स्मृत्यादिविरुद्धम् पुत्रः पैतृकवत्कुर्यात्। पार्वणं तु सुतः कुर्यात्। पुत्रः कुर्यात्तु पार्वणम्। पार्वणन्तु सुतश्चरेत्। पार्वणन्तु सुतः कुर्यात् पितृयज्ञविधानतः। इत्यादि विशिष्य पित्रादिविधानाच्च। "ताते पितरी"त्यादि तु सामान्यदुर्मृतिमात्रपरत्वात्तदुपेक्ष्य पुत्रश्चेत् आचाराच्च प्रत्याब्दिकवत् पितृपितामहप्रपितामहानुद्दिश्यैव पैतृकपार्वणमेव कुर्यादिति ॥

अत्र केचित्तु—पुत्रोऽपि दैवपार्वणमेव कुर्यादिति वदन्ति कालीपुराणवचनावलम्बिनो दुर्वासोवचनप्रामाण्यात्। पुत्रोऽपि दैवपार्वणं कृत्वा दर्शादौ पितृवर्गं परित्यज्य पितामहादित्रिपुरुषपार्वणमेव कुर्यात् मातृश्राद्धे संभवादिति—तन्मन्दम्—यद्यपि जीवपितृके सम्भवस्तदाऽपि मृतपितृके तदसम्भवात्। पुराणवचनाद्दैवपार्वणमेवेति चेन्न—दर्शादौ पितृपूर्वकत्वस्य श्रुत्यादिसिद्धस्यापरित्यक्तव्यत्वात्। अत्रापि पितृपूर्वकपार्वणस्यैवौचित्यान्नैव दैवपार्वणम्। पुराणोक्तदैविकस्य तु पुत्रेतरपरत्वेन सङ्कोचस्यौचित्यात् श्रुत्यादौ च पितृपूर्वमन्त्रस्य च प्रत्यक्षतः श्रुतत्वाच्च ॥

तत्र पुराण एवाधमाधिकारिणः पित्रादिपार्वणस्याभ्युपगमाच्च सर्वथाऽप्यद्यतनानामुत्तमाधिकारित्वासम्भवात् पितृपूर्वकपैतृकपार्वणमेवोचिततया सिद्ध्यति प्रमाणन्यायादिभिराचाराच्च। किञ्च—पुराणे—"एकादशेऽह्नि पूजान्ते" इति बलिमुपक्रम्य तत्पूर्वकपार्वणविधानात्, तथैव यमवचनमपि "एकादशेऽह्नि कर्तव्यो माहेश्वरबलिस्ततः। प्राकान्तरेण तत्रैव पार्वणश्राद्धमाचरेत्" ॥ बोधायनः—"अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते। माहेश्वरबलिश्चास्य कर्तव्यो द्वादशेऽहनि ॥"

इत्येतादृशवचनानि परमहंसस्य माहेश्वरबलिविषये प्रमाणानि। न तु दैवपार्वणपराणि पुत्रस्य। अत्र—पार्वणस्य चैकादशाहे बलिपूर्वकत्वविधानाच्च। तत्क्रमपर्यालोचनया च दैवपार्वणस्य पुत्रेतरपरतया

सङ्कोचो युक्त एव । पुत्रपरत्वे तु दर्शादिसर्वश्राद्धाधिकारसिद्ध्यर्थं पैतृकपार्वणस्यैव कर्तव्यत्वं सिद्ध्यति । किञ्च—दूर्वासाश्च—"देहान्तेऽपि च संस्कारं तेषां वक्ष्ये यतीश्वराः। माहेश्वरबलिश्चैव शैवश्राद्धस्य विस्तरम्" इत्युपक्रमस्य बलिपूर्वकत्वविधानाच्च । दैवपार्वणस्य पुत्रेतरपरत्वं स्पष्टमेव ॥

अपिच—तत्रैव श्राद्धभेदानुपक्रम्याधिकारिभेदेन च व्यवस्था कृता साम्बशिवाभ्यां नमः इतिद्वावेको वा। आत्मान्तरात्मपरमात्मभ्यो नम इति त्रय एको वेत्युत्तमाधिकारिणा कर्त्रा । एवं यथाक्रमं ब्राह्मणा वरणीयाः । महेशभर्गशर्वेभ्यो नम इति मध्यमेन पितृपितामहप्रपितामहेभ्यो नम इत्यधमेन ॥

एवञ्च—ब्रह्मविष्णुमहेश्वररूपपितृपितामहप्रपितामहेभ्यो नमः। आत्मान्तरात्मपरमात्मस्वरूपपितृपितामहप्रपितामहेभ्यो नमः॥ महेशभर्गशर्वस्वरूपपितृपितामहप्रपितामहेभ्यो नमः ॥ वसुरुद्रादित्यस्वरूपपितृपितामहप्रपितामहेभ्यो नमः इति वा क्रमेणोत्तममध्यमाधमाधमाधिकारिष्वधमाधमाधिकारिण एवेदानीन्तनास्सर्वेऽपीति सिद्ध्यति ॥ तत्पुराणवाक्यपर्यालोचनया च । तस्मादत्र पार्वणश्राद्धन्तु औरसपुत्रो दर्शादिसर्वश्राद्धाधिकारसिद्ध्यर्थं पितृपितामहप्रपितामहोद्देशेन पैतृकपार्वणश्राद्धमेव प्रत्याब्दिकवत्कुर्यात् ॥

किञ्च—"द्वादशेऽहनि कर्तव्यम्" इत्युपक्रम्य "पीठेषूदङ्मुखान् स्थाप्य क्षणं दद्यात्पृथक् पृथक् । पित्रे महेशायेत्यात्मनेति

प्रकीर्त्य च ॥ पितामहाय भर्गाय चान्तरात्मन इत्यपि । प्रपितामहशर्वाय परात्मन इत्यपि" इत्येवमुक्तवाक्यपर्यालोचनया चाधिकारिभेदेनैव पार्वणस्य व्यवस्थापनीयत्वात् । अत्र कर्ता तावदुत्तमाधिकारी महाशैवाद्वैतब्रह्मात्मनिष्ठः । मध्यमस्तूत्तमशिवाराधकः । अधमो बाह्यश्रौतस्मार्तानुष्ठानेन सह नित्यशिवलिङ्गाराधकः । अधमाधमो भस्मरुद्राक्षधारी, लोकयात्रामात्रैकतत्परः ॥

तथा—"शैवाद्वैतब्रह्मनिष्ठस्तूत्तमः परिकीर्तितः । महाशैवाराधकस्तु मध्यमः परिकीर्तितः ॥ श्रौतस्मार्ताचारपरो नित्यलिङ्गप्रपूजकः । लौकिकव्यवहारी चाप्यधमः परिकीर्तितः । भस्मरुद्राक्षधारी सन् लोकयात्रैकतत्परः । अधमाधम इत्युक्तो ह्यधिकारिषुसत्तमै"रित्यादिवचनात् । एकादशे बलिः द्वादशे पार्वणमिति विधानाच्च । पुराणवचनं सर्वमपि पुत्रेतरकर्तृकमेव । तथाचात्मान्तरात्मपरमात्मेति शिष्यस्तु पार्वणम् + क्रमादात्मादिमन्त्रतः । इति "साम्बायैकं, शिवायैकं आत्मने चान्तरात्मने परमात्मन इत्येवं वृणुयाद्वा यथाख्यया । "वस्त्रोपवीतगन्धाद्यैरलङ्कृत्य द्विजोत्तमान् । पूर्वोपरिष्टात्तन्त्रेण भवाद्यैर्हविषा हुनेत् । इत्यादि ॥

"इदन्तु पार्वणं शैव"मित्यदिना च होमपर्वकदैवपार्वणमप्युक्तं तथैव स्मृत्यादिषु—"आत्माऽन्तरात्मेत्यादिसंकल्प्यदैवपार्वणमपि होमरहितं च शिष्यपरत्वेन स्पष्टमुक्तम् ॥ तस्माद् दैवपार्वणं पुत्रेतरपरत्वेनैव संकोचनीयम् । अग्नौ करणं च विकल्पेन शिष्यादिपरमेव

देवपार्वणं, नैव पुत्रपरमिति । किञ्च---"कुटीचकादिसंस्कारे द्वादशाहं भवेत्क्रिया । त्रयोदशाहं पुत्रस्य परहंसयतौ मृते" । कुटीचकादित्रितयं सन्यासं वैष्णवं विदुः । शैवं परमहंसाख्यं शिवः प्राह यतीश्वराः ॥ इति दूर्वासोवचनाच्च । एकादशे पार्वणं, द्वादशे बलिः त्रयोदश आराधनम् इति क्रमात् परमहंसविषये पुत्रः त्रयोदशाहं कुर्यादिति । "एकादशाहे पुत्रस्तु पार्वणं द्वादशेऽहनि । कुर्याद्भवबलिं तत्र त्वन्येषान्तु विपर्ययः" इति वचनात् । पुत्रस्तु एकादशाहे पैतृकपार्वणं, द्वादशे भवबलिं, अन्येतु पुत्रेतराः सर्वेऽप्येकादशे भवबलिं तत्रैव पाकान्तरेण वा द्वादशे वा दैवपार्वणं कुर्युः ॥

अत्र केचिन्निर्णयन्ति--यथा पार्वणं च द्विधा । दैवंपैतृकं चेति । बलिश्च नारायणबलिः माहेश्वरबलिरिति च द्विधा । कर्ता पुत्रस्तदितरे शिष्यादयश्चेति द्विधा । उद्देश्याश्च---परमहंसशैवसन्न्यासी कुटीचकादित्रयवैष्णवसन्न्यासिनश्चेति द्विधा । क्रियाकालश्च---द्वादशाहान्तस्त्रयोदशाहान्त श्चेति द्विधा । एवं स्मृत्यादिषु विकल्पा दृश्यन्ते । तत्र कालीपुराणवचनप्रामाण्याद्दैवपार्वणमेव सर्वैरपि कर्तृभिः, कर्तव्यमिति । तन्मन्दं । एकादशे बलिं कृत्वा तस्मिन्नेव पाकान्तरेण वा द्वादशाहे वा दैवपार्वणम् । द्वादशे पार्वणम् । तस्मिन्नेव पाकान्तरेणाराधनमिति तत्रोक्तत्वात्--तच्चानेकस्मृत्यादिविरोधात् परमहंसविषयपुत्रकर्तृक उपेक्ष्यमेव । तस्य त्रयोदशाहान्तक्रियाविधानात् । "त्रयोदशाहं पुत्रस्ये" ति विशिष्य परमहंसविषये त्रयोदशाहान्तक्रियाविधा-

नात् । तत्रापि दैवपार्वणन्तु पुत्रेतरकर्तृकमेव । तथा नारायणबलिश्च कुटीचकादिवैष्णवपरमेवेति, एकादशद्वादशाहयोरेव नारायणबल्याद्याराधनान्तक्रियासमापनात् । माहेश्वरबलिस्तु परमहंससन्न्यासिविषय एवेति । निबन्धनोक्तवचनानिचैवंविधानि । "एकादशेबलिं कुर्यात् तत्रैव द्वादशेऽथवा । दिवसे पार्वणं पुत्रः पितृयज्ञविधानः ॥ (दिवसेपार्वणं कुर्यात् पुत्रस्तु पितृयज्ञवत्) आराधनं द्वादशाह एव चेच्छन्ति केचन ॥ इति च । एकादशे बलिपूर्वपार्वणं द्वादशे पूजनमिति च कुटीचकादित्रयपुत्रकर्तृकपैतृकपार्वणपरम् । अथ-- "एकादशे बलिं चैव द्वादशे पार्वणं तथा । आराधनं च तत्रैव कर्तव्यमिति केचन" इति तु पुत्रेतरशिष्यादिकर्तृकदैवपार्वणपरम् । पुत्रस्त्वैकादशे कुर्यात् पार्वणं पितृयज्ञवत् । द्वादशेऽह्नि बलिं चाथ पूजनं च त्रयोदशे । एवमाहुः क्रमात्केचित् पार्वणादेर्विधेर्बलात् । इति । तत्क्रमस्य परमहंसपुत्रकर्तृकपरत्वं ज्ञेयम् । आत्मान्तरात्मपार्वणं इति च शिष्यादिविषयकदैवपार्वणमिति च स्पष्टम् । एवं च स्मृतिपुराणनिबन्धनानां परस्परविरोधेऽपि व्यवस्थामाहुः प्रमाणन्यायतत्त्वज्ञाः, प्राचीना विद्वांसः । यथा कुटीचकादित्रयवैष्णवसन्न्यासे पुत्रकर्तृके एकादशाहे नारायणबलिपूर्वकपैतृकपार्वणं पाकान्तरेण ॥ द्वादशे गुर्वादिपूर्वककेशवाद्याराधनमिति द्वादशाहान्तं कर्म । तत्रैव पुत्रेतरकर्तृके एकादशे नारायणबलिः द्वादशे दैवपार्वणं तस्मिन्नेव पाकान्तरेण गुर्वादिपूर्वककेशवाद्याराधनमिति द्वादशाहान्तं कर्म ॥

अथ परमहंसशैवसन्न्यासिविषये पुत्रेतरशिष्यादिकर्तृके एकादशे माहेश्वरबलिः। द्वादशे दैवपार्वणं तस्मिन्नेव पाकान्तरेण गुर्वादिपूर्वकंभवाद्याराधनमिति द्वादशाहान्तं कर्म। तत्रैव पुत्रकर्तृके एकादशे पैतृकपार्वणं द्वादशे माहेश्वरबलिस्त्रयोदशे गुर्वादिपूर्वकभवाद्याराधनमिति त्रयोदशाहान्तं कर्म इति व्यवस्थाप्य निर्णयः कृतः॥ प्रमाणानि तु—तत्र तत्र प्रकरण एव व्यवस्थाप्य लिखितानि। "इदन्तु पार्वणं श्राद्धमित्याहात्रिसमुद्भवः। द्वादशेऽहनि भस्माक्षभूषितस्सपवित्रकः॥ १॥ सङ्कल्प्य ब्रह्मविच्छ्रेष्ठान् यतीन्वा वृणुयाद्द्विजान्। साम्बायैकं शिवायैकमात्मनेचान्तरात्मने। परमात्मन इत्येवं वृणुयाद्वा यथाख्यया। वस्त्रोपवीतगन्धाद्यैरलङ्कृत्य द्विजोत्तमान्। पूर्वापरिष्टात्तत्रेण भवाद्यैर्हविषा हुनेत्। सन्तर्प्य स्वादुभोज्यान्नैरैन्द्रवारुणमन्त्रतः। दद्याद्वायसपिण्डं चाप्यात्मादिभ्यस्त्रिपिण्डकम्" इति। "आत्मान्तरात्मपरमात्मेति शिष्यस्तु पार्वण" मित्यादि। "ज्ञातिबान्धवमित्राद्यैर्यतिसंस्कारकृद्यदि। शिष्यवत्पार्वणं कुर्यात् वसिष्ठादिवचो यथा"॥ इत्यादिवचनैः पुत्रस्य न कुत्रचिदपि दैवपार्वणं कण्ठत उक्तम्। पैतृकन्तु बहुस्मृत्यादिषु प्रत्यक्षतश्चोक्तम्। पैतृकवत् पितृयज्ञवत्। पितृयज्ञविधानतः प्रत्याब्दिकप्रकारेणेत्यादिभिरुक्तत्वात्। अथ च केचित् "येभ्य एव पिता दद्यात्," पितामहादीनुद्दिश्येत्यादि वचनैर्दशादिष्वपि पितामहादिपार्वणमेव यतिपुत्रः कुर्यादिति तैः कतिचिन्न्यायसिद्धान्तोऽप्युक्तः। तत्सर्वमपि अपसिद्धान्त एव। अनेकस्मृत्यादिन्यायविरुद्धत्वादुपेक्ष्यमेव। तत्र प्रमाणाभावादित्युपरम्यते॥

एवं च परमहंसशैवसन्न्यासिनः पुत्रस्तु एकादशे सर्वश्राद्धाधिकारसिद्ध्यर्थं पित्रादिपैतृकपार्वणमेव कुर्यात्। द्वादशे—माहेश्वरबलिं त्रयोदशे गुर्वादिपूर्वं भवाद्याराधनं चेति क्रमेण। पुत्रेतरास्तु एकादशे माहेश्वरबलिं द्वादशे दैवपार्वणं तत्रैव पाकान्तरेण गुर्वादिपूर्वकं भवाद्याराधनं च कुर्युरित्येवं व्यवस्थापितमिति॥

इति यतिपार्वणश्राद्धविचारः॥

॥ अथ महेश्वरबलिप्रयोगः ॥

अत्र केचित्—निबन्धनकाराः बोधायनोक्तनारायणबलिरेव कर्तव्य इति निबध्नन्ति। तत्स्मृत्यर्थाविचाररमणीयमेव। यमबोधायनदूर्वासःप्रभृतिभिः माहेश्वरबलिरेव परमहंससन्न्यासिविषये विशिष्य कर्तव्यतया विधीयते। नारायणबलेस्तु बोधायनेन प्रेतोद्देशेनैव सूत्रितत्वात्तस्य च तद्विषयत्वेनान्यथासिद्धत्वाच्च। माहेश्वरबलेस्तु सन्न्यासिनोऽन्यत्र निर्विषयत्वप्रसङ्गस्स्यात्। बोधायनेन चास्य माहेश्वरबलेरभ्युपगमाच्च सन्न्यासिविषयत्वेन। "अह्न्येकादशे प्राप्ते पार्वणन्तु विधीयते। माहेश्वरबलिश्चास्य कर्तव्यो द्वादशेऽहनीति बोधायनवचनाच्च। परमहंसशैवसन्न्यासिविषये माहेश्वरबलेरेव पुत्रकर्तृके प्रयोगे द्वादशाहे कर्तव्यत्वविधानात्तत्रैव कर्तव्यतया व्यवस्थाप्य प्रयोगोऽपि माहेश्वरबलेर्लिख्यते—"स्नात्वा मध्याह्नते सूर्ये" इत्यादिना॥

॥ अथ भवबलिप्रयोगः विधिश्च ॥

"स्नात्वा मध्यंगते सूर्ये भस्मरुद्राक्षभूषितः। (सङ्गवादूर्ध्वे माध्याह्निककाले इत्यर्थः।) "कुलीनान् तादृशान् पीठे भवाद्यर्थे निवेशयेत् ॥ स्वगृह्योक्तविधानेन प्रतिष्ठाप्य हुताशनम् ॥ ब्राह्मणानुज्ञया चापि चरुणाज्येन नामभिः ॥ २ ॥ भवादिभिश्च स्वाहान्तैर्हुत्वा कर्म ततः पुनः। शतरुद्रीयमन्त्रेण कुर्यात्पूर्णाहुतिं ततः ॥ ३ ॥ शिवमस्त्विति पुण्याहं वाचयित्वा द्विजोत्तमान्। आवाहनाङ्घ्रिनिर्णेजनाम्बरस्रग्भिरर्चयेत् ॥ ४ ॥ सापूपसाज्यभोज्यान्नं दत्त्वाङ्गुष्ठाभिमन्त्रितम्। भुञ्जानेष्वेष्वथर्वोक्तमन्त्रा [illegible] यथार्हतः ॥ ५ ॥ आचान्तेष्वासनस्थेषु दत्त्वा ताम्बूलदक्षिणाम्। माहेश्वरबलिं कुर्यात् तदनुज्ञापुरस्सरम् ॥ ६ ॥ विसृज्य तान्होमशेषं भुक्तशेषं च मेलयेत्। भवादिनामभिश्चाष्टौ बलीन् कुर्यात्कुशेष्वपि ॥७॥ बलिं सम्पूज्य विधिवद्योवैरुद्र इति स्तुवन्। भुञ्जानो वैदिकैस्सार्धं पूर्णकामो भवेत्सुधीः॥८॥ इति। अथ प्रयोगः सम्प्रदायानुसारेण। पुत्रः पूर्वेद्युरेकादशाहे पैतृकपार्वणं कृत्वा, परेद्युर्द्वादशाहे श्राद्धाङ्गतिलतर्पणञ्च कृत्वा, मध्याह्ने वैश्वदेवान्ते, तादृशान् ब्राह्मणान् ब्रह्मनिष्ठान् शिवभक्तानष्टौ, भवाद्यर्थे महागुर्वर्थे चैकं, वृणुयात्। नामानि तु—भव-शिव-वामदेव-ज्येष्ठ-महादेव-भर्ग-शङ्कर-सर्वात्मानः, महागुरुश्चेति नव ॥ [illegible]क्रमेण वृत्वा, अभ्यञ्जनादिकं कारयित्वा, तत्तन्नामभिश्चतुर्थ्यन्तनमोऽन्तैरभ्यर्चयेत। अथ स्वगृह्योक्तप्रकारेणाग्निमांश्चेत्पुत्रस्त्वौपासनाग्निं अन्ये

चेल्लौकिकाग्निं, प्रतिष्ठाप्य, ब्राह्मणाननुज्ञाप्य सिद्धिंगतस्य परहमंस-परिव्राजकस्य ममपितुर्गुरोः खननाद्द्वादशेऽहनि दूर्वासः प्रभृतिभिरुक्तप्रकारेण, माहेश्वरबलिं करिष्ये। तदङ्गत्वेनाधिकारयोग्यतासिद्ध्यर्थं कृच्छ्रादिदानञ्च सङ्कल्प्य, कृत्वा, अग्नेरुपसमाधानादि मुखान्ते सिद्धपायसचरुणाज्येन च, भवादितत्तन्नामभिश्चतुर्थ्यन्तस्वाहान्तैः "भवायस्वाहे"त्यादि " सर्वात्मने स्वाहे"त्यन्तं अष्टावाहुतीरवदानधर्मेणावदायाज्येन च हुत्वा स्विष्टकृतं च हुत्वा शतरुद्रीयेण चमकेन च तत्तदनुवाकान्तेन वा सर्वमुक्त्वाऽन्ते आज्येन पूर्णाहुतिं वा हुत्वा, होमशेषं समाप्य शिवमस्त्विति पुण्याहं वाचयित्वा, ततो ब्राह्मणानाहूय पुर्वोक्तभवादिनामभिरावाह्य पादप्रक्षालनाद्युपचारान् यथाविधिविभवविस्तरं क्रमेण महागुर्वन्तं कृत्वा भोजनस्थान आसनाद्यन्नपरिवेषण-अङ्गुष्ठनिवेशन-आपोशनादिदत्त्वा सापूपाज्यभक्ष्यभोज्यान्नादिभिस्सन्तृप्तान् भोजयित्वा भोजनकाले, अथर्वशिरोपनिषदादीन् मन्त्रान् पठेत् ॥

भोजनान्ते तृप्त्युत्तरापोशनादिदत्त्वाऽऽचान्तेष्वाशीर्वादादि—चन्दनपुष्पताम्बूलदक्षिणादिभिरुपचारैरुपचर्य तैरभ्यनुज्ञातस्सङ्कल्प्य, दर्भेषु बलिं दद्यात्। यथासुखं तान् प्रदक्षिणीकृत्यानुव्रज्य विहरन्त्विति विसृज्य तत्सन्निधौ वा होमभुक्तशेषमन्नमेकीकृत्य "मानस्तोके + विधेम ते" इत्यभिमन्त्र्य पूर्वाग्रान् दर्भान्संस्तीर्याक्षतोदकं देवतीर्थेनाष्टधा प्राचीर्निनीय भवाय स्वाहेत्यादिभिस्तत्तन्नामभिःपृथक्पृथक् बलिं

कुर्यात् । "भवायस्वाहा भवाय बलिं ददामि" इत्येवम् अष्टबलीन्दत्त्वा गन्धादिभिरभ्यर्च्य "यो ह वै रुद्र" इत्यादिभिस्स्तुत्वोद्वास्य गोभ्यो भिक्षुकेभ्यो वा दद्यात् । ततो दशदानादिभूरिदानदक्षिणां ब्राह्मणेभ्यो दत्त्वा आचार्यं सम्भाव्य वैदिकैस्सह भुञ्जीत ॥

॥ **इति माहेश्वरः बलिः** ॥

॥ अथाराधनम् ॥

त्रयोदशाहे पुत्रः स्नानादि प्रातः कृत्यं विधाय गुरु-परमगुरु-परमेष्ठिगुरु-परापरगुरूणामर्थे चतुरः एकं वा भवार्थमष्टौ एकं वा ब्राह्मणं वृत्वा अभ्यङ्गादिभिः स्नापयित्वा माध्याह्निकस्नानादि-वैश्वदेवान्ते ब्राह्मणानाहूय सङ्कल्पं कुर्यात् । अनुज्ञाप्य ब्राह्मणान् कृतप्राणायामः परमहंसपरिव्राजकस्य सिद्धिं गतस्य ब्रह्मीभूतस्य मम पितुर्गुरोः खननादित्रयोदशेऽहनि गुरोराराधनकर्म करिष्य इति सङ्कल्प्य—आसनादिभिरभ्यर्च्य वृत्वा रङ्गवल्ल्याद्यलङ्कृतचतुरश्रमण्डले पादौ प्रक्षाल्य-गन्धादिभिरलङ्कृत्य—"चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधातु इति द्वाभ्यां प्रत्येकं प्रतिब्राह्मणं पादोदकं गृहीत्वा सर्वमेकस्मिन्कुम्भे संगृह्य पूरयित्वा अलङ्कृत्य प्रज्ञातं निधाय—यथाचान्तानां आसनगतानां ब्राह्मणानां वस्त्राद्युपचारान् यथाविभव-

विस्तरं कृत्वा धूपाद्युपचारान्ते भोजनस्थानासनामत्रपरिवेषणाङ्गुष्ठ-निवेशनापोशनादिकं दत्त्वा सव्यञ्जनभक्ष्यभोज्यान्नादिभिः संतृप्तान् भोजयित्वा उत्तरापोशनादि हस्तप्रक्षालनाचमनान्ते आसनेषु उपविष्टेषु स्थण्डिले तीर्थराजकुम्भं प्रतिष्ठाप्य सद्योजातविधिना रुद्रविधिना वा आवाहनादि षोडशोपचारैः कुम्भस्थतीर्थराजं सम्पूजयेत् । यथा—

भोजनान्ते तीर्थराजपूजां करिष्ये इति सङ्कल्प्य—कलशादि-पूजां कृत्वा पीठपूजां च कृत्वा मण्डूकादि परतत्त्वान्तमभ्यर्च्य—वामायै नमः । ज्येष्ठायै नमः । रौद्र्यै नमः । काल्यै नमः । कलविकरण्यै नमः । बलविकरण्यै नमः । बलप्रमथिन्यै नमः । सर्वभूतदमन्यै नमः । मनोन्मन्यै नमः ॥ ओं नमो भगवते सकलगुणशक्तियुक्ताय तीर्थराजस्य संयोगपीठात्मने नमः । "आत्वा वहन्तु हरयस्सचेतसः श्वेतैरश्वैस्सहकेतुमद्भिः । वाताजितैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम्" । "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्" भूर्भुवस्सुवरोम् एह्येहि भगवन् आगच्छ अस्मिन् कुम्भे तीर्थराजाधिष्ठितं साम्बपरमेश्वरं (ध्यायन्) आवाहयामि । प्राणान् प्रतिष्ठापयामि । आवाहनादि षण्मुद्राः प्रदर्श्य—

"सद्योजातं प्रपद्यामि सद्यो जाताय वै नमः" इति आसनं समर्पयामि ।

"भवेभवेनातिभवे भवस्वमाम्" इति पादयोः पाद्यं समर्पयामि ।

"भवोद्भवाय नमः" इति हस्तयोः अर्घ्यं समर्पयामि ।

" रुद्राय नमः " इति मुखे आचमनीयं समर्पयामि । मधुपर्कादिकं । " वामदेवायनमः " इति स्नपयामि ।

स्नानकाले " आपोहिष्ठा मयोभुव" इति तिसृभिः, " हिरण्यवर्णाश्शुचयः पावका" इति चतसृभिः " पवमानस्सुवर्जनः " इत्येतेनानुवाकेन, ' ब्रह्मजज्ञानम् " " कद्रुद्राय, " ' सर्वोवै ' ' कयानश्चित्रः इत्येतैः स्नापयित्वा— भूर्भुवस्सुवः इति परिषिच्य- अद्भिस्तर्पयति भवं देवं तर्पयामि शर्वं देवं । पशुपतिं देवं । रुद्रं देवं । उग्रं देवं । भीमं देवं । महान्तं देवं । रुद्राय नमः आचमनीयं समर्पयामि । ज्येष्ठाय नमः । वस्त्रयज्ञोपवीतोत्तरीयाणि समर्पयामि । रुद्राय नमः आचमनीयं समर्पयामि । कालाय नमः । गन्धं समर्पयामि । कलविकरणाय नमः । अक्षतान् समर्पयामि । बलविकरणाय नमः पुष्पाणि समर्पयामि । " भवाय देवाय नमः " इत्यादि बलप्रमथनाय नमः धूपम् आघ्रापयामि । सर्वभूतदमनाय नमः । दीपं सन्दर्शयामि । मनोन्मनाय नमः । इति काले नैवेद्यं समर्पयामि । ताम्बूल समर्पयामि । नीराजनं कृत्वा । " अघोरतनूरुपतिष्ठते "— अघोरेभ्योऽथघोरेभ्य स्सर्वतश्शर्वसर्वेभ्यः नमस्ते अस्तु रुद्ररूपेभ्यः इति ॥ " तत्पुरुषाय विद्महे महादेवायधीमहि । तन्नोरुद्रः प्रचोदयात् " इत्येतां दशवारं आवर्तयेत् । ईशानस्सर्वविद्यानां ईश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम । इत्येवं आशिषमाशास्ते ।

" अघोरेभ्य " इत्युपस्थाय, "यो ह वै रुद्र" इत्यथर्वशिरोमन्त्रैश्चतुस्त्रिंशत् पर्यायैः "योब्रह्माणं," "यो वेदादौ + महेश्वरः " इति च स्तुत्वा, तीर्थराजं कुम्भादुद्धास्य कुम्भं शिरसिस्थाप्य नटन् प्रदक्षिणं ब्राह्मणान् त्रिः परिक्रामति । " मन्त्रः—लोकस्सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्त्याक्रोशन्तो यान्त्यवर्तिमेवास्मिन् प्रतिषज्य प्रतिष्ठां गच्छन्ति यदा दशशतं कुर्वन्त्यथैकमुत्थानं शतायुः पुरुषश्शतेन्द्रियआयुष्येवेन्द्रिये प्रतितिष्ठन्ति यदाशतगुँ सहस्रं कुर्वन्त्यथैकमुत्थानगुँ सहस्रसम्मितो वा असौ लोकोऽमुमेवलोकमभिजयन्ति, यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धितीर्थम्" " चरणं पवित्रं + दधातु" ॥

इति च मन्त्रानुच्चरन् तत्तीर्थेनासिञ्चेत्तनुम । "ऋतगुँ सत्यं + नमः " इति "अविद्यामूलनाशाय जन्मकर्म निवृत्तये । ज्ञानवैराग्यसिद्ध्यर्थं गुरुपादोदकं शुभम् " इति च तीर्थं प्राश्य स्वयं, भक्तांश्च प्राशयित्वा ब्राह्मणैराशीर्वचनं च लब्ध्वा तान् चन्दनताम्बूलदक्षिणाद्यपरिसन्तोष्य, अनुज्ञाप्य, प्रदक्षिणीकृत्य, नमस्कृत्य, " पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः । तत्क्लेशजातं चित्तेतु विस्मृत्य क्षन्तुमर्हथ " ॥

हविश्शोभनमिति पृष्ट्वा, शोभनं हविरिति प्रतिवचनं लब्ध्वा तान् विसृज्याथ ब्राह्मणैर्बन्धुमित्रादिभिस्सह भुञ्जति । एवं मासि मासि मृततिथ्यामाराधनमात्रं, आब्दिकावधि कुर्यात् । पुत्रादिभिः सर्वैरपि

संस्कर्तृभिः कार्यम् ॥ प्रतिवत्सरञ्च पुत्रस्तु मृततिथौ पार्वणं परेद्युराराधनञ्च । इतरैस्तु प्रतिवत्सरं मृततिथावाराधनमात्रं कर्तव्यं नान्यत् । मासिकाराधनस्य विघ्ने नोत्कर्षः । लोप एव । यतिकर्तृके तु खननादिदशाहान्तपूजान्तं सर्वं समम् । पार्वणादि सर्वं ब्राह्मणभोजनमात्रेण मानसैरेवोपचारैः कार्यम् अनग्निकत्वादनधिकाराच्च दानादिबाह्यकर्मस्विति ॥ इति परमहंसयत्याराधनविधिः ॥ इति कालीपुराणे दूर्वासः प्रोक्तपरमहंसयतिखननादिसंस्काराद्याराधनान्तत्रयोदशाहान्तकर्मविधिस्समाप्तः ॥

अथ निबन्धनान्तरोक्तयतिसंस्कारादिरपि लिख्यते प्रदर्शनार्थम् । यतिसंस्कारपद्धतिग्रन्थे—

"यतेः पुत्रवतः पुत्रः समीपस्थो मृतं यतिम् ।
ज्ञात्वाऽवगाह्य वपनं सर्वाङ्गं च समाचरेत् ॥ १ ॥

स्नात्वा धृत्वा शुष्कवस्त्रं पुण्ड्रादि च यथाविधि ।
सङ्कल्प्य यतिसंस्कारं कुर्याच्छास्त्रोक्तवर्त्मना ॥ २ ॥

आदौ प्रक्षाल्य तद्देहं तीर्थतोयैरकल्मषैः ।
पञ्चगव्यैस्स्नापयित्वा प्रणवेन ततः परम् ॥ ३ ॥

कुम्भे नारायणं पूज्य चाब्लिङ्गादीन् जपेद्बुधः ।
अब्लिङ्गैर्वारुणैर्मन्त्रैर्विष्णुसूक्तैस्तथैव च ॥ ४ ॥

त्र्यम्बकैर्नमकैश्चैव चमकैर्वैदिकैस्तथा ।
एवमाद्यैर्महामन्त्रैश्शुद्धाद्भिस्स्नापयेत्ततः ॥ ५ ॥

पौरुषेण तु सूक्तेन शङ्खतोयैश्च भक्तिमान् ।
अभिषिच्य ततोगन्धपुष्पाद्यैर्धूपदीपकैः ॥ ६ ॥

षोडशैरुपचारैश्च कृत्वा पुरुषसूक्तकैः ।
पूज्यान्नं बहुधा तत्र पायसाद्यं सुसंस्कृतम् ॥ ७ ॥

निवेदयेद्विष्णुबुद्ध्या साष्टाङ्गं प्रणमेत्सुधीः ।
शिक्ये शरीरमारोप्य गन्धमाल्यैरलङ्कृतम् ॥ ८ ॥

घोषितं जयशब्दैस्तु दुन्दुभीनां रवैरपि ।
ग्रामं प्रदक्षिणीकृत्य ब्राह्मणैर्वेदपारगैः ॥ ९ ॥

प्राचीमुदीचीं वा गत्वा शुद्धदेशं समाश्रयेत ।
नदीकूलेऽश्वत्थमूले गवां गोष्ठे सुरालये ॥ १० ॥

मूले वा ब्रह्मवृक्षस्य प्रोक्ष्य व्याहृतिभिस्स्थलम् ।
दण्डप्रमाणमवटं देवस्य यजनाय वै ॥ ११ ॥

खात्वा सप्तव्याहृतिभिः संप्रोक्ष्याथोत्तराग्रकान् ।
दर्भान् संस्तीर्य सावित्र्या शरीरं प्रोक्षयेत्पुनः ॥ १२ ॥

स्नापयित्वा पौरुषेण गन्धपुष्पाद्यलङ्कृतम् ।
कुण्डे शरीरं "विष्णो हव्यं रक्षस्वे"ति मन्त्रतः ॥ १३ ॥

सन्निधाय त्रिधादण्डं विस्रस्य ब्रह्ममुद्रिकाम् ।
विस्रस्येदं विष्णुरिति दक्षहस्ते निधाय च ॥ १४ ॥

वामभागे कुण्डिकां वै प्रणवेन निधाय च ।
"हग्ँसश्शुचिषत्"मन्त्रं त्रिर्जपेत् हृदयं स्पृशन् ॥ २५ ॥

पौरुषन्तु भ्रुवोर्मध्ये स्पृशन् सूक्तं सकृज्जपेत् ।
"ब्रह्मजज्ञानमिति" इति च त्रिर्जपेत् नमकं तथा ॥ १६ ॥

स्पृशन् मूर्ध्नि ततोभूमिर्भूमिमित्यादिमन्त्रतः ।
नालिकेरफलेनैवाश्मना परशुनाऽपि वा ॥ १७ ॥

भिन्द्यान्मूर्धानमेवाथ भेत्तुं स्यादक्षमो यदि ।
उक्तेनैव प्रकारेण गुलपिण्डं फलादिकम् ॥ १८ ॥

निधाय तस्य शिरसि तद्भिन्द्यात्पूर्ववत्ततः ।
अभिमन्त्र्य व्याहृतिभिः प्रणवेन च बर्हिभिः १९ ॥

प्रच्छाद्य प्रणवेनैव भस्मना लवणादिभिः ।
आपूर्य देवयजनमग्निनाग्निस्समिध्यते ॥ २० ॥

तं मर्जयन्त यज्ञेन चित्तिस्स्रुक्पृथिवी ततः ।
अग्निर्होता च सूर्येन महाहविरिति क्रमात् ॥ २१ ॥

अष्टौ मन्त्रान् जपित्वैवमतो देवा अवन्तु नः ।
इत्यादि पञ्चभिःऋग्भिस्तु प्रणमेच्च यथाविधि ॥ २२ ॥

(एकेनुनाऽनुवाकेन पुत्रः संस्कारकृद्यदि ।
कुण्डस्य पश्चात्संविश्य सोङ्कारेण तु शंसनम् ॥ १ ॥

होतृवत्केचिदिच्छन्ति नैव चेच्छन्त्यथापरे ।
शंसने तु प्रणामांस्तु शंसनानन्तरं चरेत् ॥ २ ॥)

सृगालश्वापदादिभ्यो रक्षणार्थं मृदादिभिः ।
सम्यक्प्रच्छादयेत्कुण्डं यथा तैस्तन्न भक्षितम् ॥ २३ ॥

भक्षितं चेत्तत्र देशेऽप्यनावृष्टिर्भवेद्ध्रुवम् ।
तस्माद्भूमिं भृशं खात्वा दृढं प्रच्छादयेन्मृदा ॥ २४ ॥

गङ्गायां नर्मदायां वाप्येतन्मन्त्रान् प्रजप्य च ।
कुशनिर्मितशिक्ये तु सम्यग्बद्ध्वा शरीरकम् ॥ २५ ॥

यथानोन्मज्जयेत् तद्वत् प्रक्षिपेच्च जले तु तत् ।
मुमुक्षुं निक्षिपेदग्नौ भूमावभ्यासिनं तथा ॥ २६ ॥

जलेऽनुभाविनं दद्यादारूढं दिक्षु पक्षिणाम्
तं पश्चाद्दिग्बलिं कुर्यात् अथवाऽऽसनं चरेत् ॥ २७ ॥

दिग्बलिर्मुख्य एव स्यात् खननन्तु विकल्पतः
इति शास्त्रस्य सत्त्वाच्च यथाशास्त्रं चरेद्बुधः ॥ २८ ॥

मन्त्रानुक्तौ तत्र सर्वं प्रणवेनैव कारयेत् ।
कलत्रपुत्रमित्रादिबान्धवाद्याश्च तेऽखिलाः ॥ २९ ॥

अन्ये चानुगताश्चाविस्नानं कुर्युस्सचेलकम् ।
अशुद्धबुद्ध्या स्नानात्तु रौरवं नरकं व्रजेत् ॥ ३० ॥

जलाशयादौ पुत्रादिः स्नानं कृत्वा विधानतः ।
शुष्कवस्त्रं च पुण्ड्रादि धृत्वा प्राङ्मुख एव च ॥ ३१ ॥
उदङ्मुखोऽपि वात्मानमन्तरात्मानमित्यपि ।
परमात्मानमिति च प्रणवादि तथैव च ॥ ३२ ॥
तर्पयामीति चान्तेन क्षीरेणैवोदकेन वा ।
देवतीर्थेन कुर्वीत नित्यं यज्ञोपवीतिना ॥ ३३ ॥
दक्षिणाभिमुखो भूत्वा तर्पयेदिति केचन ।
तन्न सङ्गतमेव स्याच्छिष्टाचारविरोधतः ॥ ३४ ॥
मूलप्रमाणाभावाच्च तदुपेक्ष्यं न संशयः ।
कुण्डे लिङ्गाश्वत्थबिल्ववृक्षादीन् स्थापयेत् बुधः ॥ ३५ ॥
अथवा वेदिकां कृत्वा लिङ्गं तत्र शिवमयं तु ।
मृण्मयेन विधायात्र नित्यपूजां समाचरेत् ॥ ३६ ॥
खननादिदशाहान्तं त्रिसन्ध्यं पूजयेद्गुरुम् ।
दानं पायसपूर्णस्य पात्रस्य श्रोत्रियाय वै ॥ ३७ ॥
सन्ध्ययोर्वा प्रकुर्वीत नित्यं पूजावसानकम् ।
(आराधनान्तमित्यर्थः)
आचारात्केचिदिच्छन्ति सर्वेषां यतिसंस्कृतौ ॥ ३८ ॥
वपनं त्वपरे प्राहुः षण्णामेवेति शास्त्रतः ।
औरसो दत्तपुत्रश्चेत्यादिशास्त्रावलम्बिनः ॥ ३९ ॥

शास्त्रमेव प्रमाणं स्यात् आचारन्यायमानतः ।
यथाशास्त्रं प्रकुर्वीत वपनं यतिसंस्कृतौ ॥ ४० ॥
एकादशे बलिं कुर्यात् तत्रैव द्वादशेऽपि वा ।
दिवसे पार्वणं पुत्रः पितृयज्ञविधानतः ॥ ४१ ॥
(एकादशाहे द्वादशाहेवा बलिपूर्वकपुत्रकर्तृकपंतृकपार्वणादि कुटीचकादित्रयवैष्णवसन्न्यासिपरम् ॥)
आराधनं द्वादशाह एव चेच्छन्ति केचन ।
एकादशे पार्वणं च द्वादशे बलिकर्म च ॥ ४२ ॥
त्रयोदशे पूजनं च क्रममाहुरथापरे ।
(इदं च परमहंसविषये पुत्रकर्तृकपरम् ।)
बलिकर्मविधाने तु बोधायनमतेन च ॥ ४३ ॥
क्रियमाणे तु सामान्यात्पितृरूपेण भावनम् ।
भुञ्जानब्राह्मणानान्तु तथैव बलिकर्मणः ॥ ४४ ॥
स्वधाकारेण करणं होमकाले विशेषतः ।
तिलमिश्रं हविश्चापि हस्तेन जुहुयादिति ॥ ४५ ॥
पितृभ्यस्स्वधानमश्चेत्यादिमन्त्रैश्च सूत्रितम् ।
तत्सर्वं प्रेतकृत्ये तु ब्रह्मचार्यादिकान् प्रति ॥ ४६ ॥
यतिकृत्ये तु तत्सर्वं विनाऽन्यतु समाचरेत् ।
यतिकृत्ये विशेषे तु सम्प्राप्ते विधिरुच्यते ॥ ४७ ॥

सर्वेषां चैव तेषां वै प्रमाणं तु यथास्थितम् ।
निबन्धनादिकारैश्च संगृहीतं विलिख्यते ॥ ४८ ॥

यतेः पुत्रवतः पुत्रः स्वपितुर्मरणे सति ।
देशान्तरमृतं श्रुत्वा मुनिपुत्रो विदेशगः ॥ ४९ ॥

कृत्वाऽवगाहद्य वपनं तर्पयेत्सहसामुनिम् ।
आत्मानमन्तरात्मानं परमात्मेति च क्रमात् ॥ ५० ॥

समीपस्थसुतस्यापि वपनं तर्पणं समम् ।
दशाहमध्ये श्रुत्वा तु प्रसङ्गन्याय मृताहनः ॥ ५१ ॥

एकादशेऽहनि श्राद्धं कुर्यात्पैतृकवत्सुतः ।
एकादशाहे श्रुत्वा तु स्नात्वा वपनपूर्वकम् ॥ ५२ ॥

दशाहं तर्पणं कृत्वा मूलेऽश्वत्थस्य वै सुतः ।
अथवा वेदिकायां वा पूजां तर्पणमाचरेत् ॥ ५३ ॥

तस्मिन्नेव दिने श्राद्धं कुर्याद्विधिबलेन तु ।
द्वादशाहादिषु श्रुत्वा परेद्युः पार्वणं चरेत् ॥ ५४ ॥

अथवानन्तरे मासि मृताहे पार्वणं चरेत् ।
समीपस्थस्सुतः कुर्यात् संस्कृतिं क्षौरपूर्वकम् ॥ ५५ ॥

यथोक्तविधिना शिष्यो विना क्षौरन्तु कारयेत् ।
पुत्रादीनामेव षण्णां कर्तृत्वं क्षौरपूर्वकम् ॥ ५६ ॥

यतिसंस्कारकृत्ये तु केचिदाहुर्महर्षयः ।
औरसो दत्तपुत्रश्च भ्राता भ्रातुश्च पुत्रकः ॥ ५७ ॥

दौहित्रो भागिनेयश्च यतेस्संस्कारकर्मणि ।
सर्वाङ्गवपनं कुर्यात् षण्णामेव विधीयते ॥ ५८ ॥

परेषां च यतीनां तु स्नात्वा कर्म समाचरेत् ।
इत्यादिशास्त्रप्रामाण्यबलादेव न युक्तितः ॥ ५९ ॥

इति स्मृतिनिबन्धनवचनानि ॥

अथ यतिसंस्कारप्रयोगो निबन्धनान्तरोक्तोऽपि लिख्यते प्रदर्शनार्थम् ॥ पूर्वं कालीपुराणे दूर्वासः प्रोक्तप्रकारेण परमहंसयति संस्काराद्याराधनान्तमुक्तप्रयोगो लिखितः । निबन्धनान्तरोक्तानि च विधिप्रयोगादीनि लिख्यन्ते ॥ आदौ स्नात्वा पुत्राद्यधिकारी विधिवत्सर्वाङ्गवपनं कृत्वा यथाविधि स्नात्वा शुद्धस्सन् धृतशुष्कवस्त्रपुण्ड्रादिकः कृच्छ्राचरणपूर्वकं यतिसंस्कारं कुर्यात् । आदौ गोत्रशर्माणं पितरं सिद्धिं गतं परिव्राजकं यतिं परमहंसं मम गुरुं यतिसंस्कारविधिना खननकर्मणा संस्कर्तुमनुगृहाणेति परिषदनुज्ञा ॥ "यतिसंस्कारं करिष्ये" इति सङ्कल्प्य यतिं पञ्चगव्यपुण्याहशुद्धतीर्थतोयैस्स्नापयित्वा कुम्भे नारायणमावाह्य सम्पूज्य—इति तु कुटीचकादित्रितय वैष्णसन्न्यासि परम् । "कुटीचकादित्रितयं सन्न्यासं वैष्णवं विदुः" इति वचनात् ॥

अब्लिङ्गादिवरुणमन्त्रब्रह्मविष्णुरुद्रसूक्तत्र्यम्बकमन्त्रनमकचमक-पुरुषसूक्तोत्तरनारायणपञ्चब्रह्मादिवैदिकोपनिषन्मन्त्रांश्च ब्राह्मणैर्जापयित्वा ततः पुरुषसूक्तेन कुम्भतीर्थेन शङ्खतोयैश्चाभिषिच्यासनादिषोडशोपचारान् पुरुषसूक्तविधिना कृत्वा घृतगुडपायसं निवेद्य विष्णुबुद्ध्या गुरुं साष्टाङ्गं प्रणम्य दर्भमयशिक्ये यतिशरीरं संस्थाप्य गन्धमाल्यादिभिरलङ्कृत्य जयशब्ददुन्दुभिनिर्घोषवेदपारायणादिघोषपुरस्सरं ग्रामं प्रदक्षिणीकृत्य प्राचीमुदीचीं वा गत्वा नदीकूलाश्वत्थमूलादिशुद्धदेशं व्याहृतीभिः प्रोक्ष्य दण्डप्रमाणमवटं खात्वा, व्याहृतीभिः प्रोक्ष्य उत्तराग्रान् दर्भान् संस्तीर्य तत्र लवणं प्रक्षिप्य सावित्र्या शरीरं प्रोक्ष्य पुरुषसूक्तेन स्नापयित्वा माल्यगन्धादिभिरलङ्कृत्य "विष्णोहव्यगँ रक्षस्वे"ति गर्ते शरीरं प्राङ्मुखं निधाय "इदं विष्णुर्विचक्रमे" इति मन्त्रेण दक्षिणहस्ते दण्डं त्रिधा विभज्य ब्रह्ममुद्रां विसृस्य च निधाय सव्ये कमण्डलुं प्रणवेन, "हगँसश्शुचिषदि"ति मन्त्रं हृदयं स्पृष्ट्वा त्रिर्जपेत्। पुरुषसूक्तेन भुवोर्मध्ये सकृत् "ब्रह्मजज्ञानं" "नमस्ते रुद्रमन्यव" इति रुद्रानुवाकांश्च मूर्द्धानमिति च मूर्धानं स्पृष्ट्वा त्रिर्जपेत् ॥

खननकालेऽनुज्ञा हिरण्यदानानि कृत्वा "भूमिर्भूमिमगादिति" मन्त्रेण नालिकेरफलाश्मादिना वा भिन्द्यान्मूर्द्धानम्। (भूमिर्भूमिमन्त्रस्साम्प्रदायिक ईरितः" इति) एतावत्कर्तुमशक्तश्चेत् गुडपिण्डनालिकेर फलादिकं तस्य शिरसि निधाय तद्भिन्द्यात्। ततो व्याहृतीभिः

अभिमन्त्र्य दर्भैराच्छाद्य प्रणवेन भस्मना सिकतालवणादिभिश्च पूरयित्वा "अग्निनाऽग्निस्समिध्यते कविः। तम्मर्जयन्त। यज्ञेन यज्ञमयजन्त। चित्तिः पृथिव्यग्निस्सूर्यन्ते चक्षुर्महाविर्होता इत्यष्टावनुवाकांश्च जपित्वा "अतो देवा" इत्यादि षडृचश्च जपेत्। (ऋत्विग्भिः पठेत्) पुत्रश्चेत्कर्ता "प्रकेतुने"त्यनुवाकं कुण्डस्य पश्चादुपविश्य होतृवदेकस्वर्येण सोङ्कारेणानुशंसेदित्येके। तत्सर्वं नारायणबलिवत् कुटीचकादिपरमेवेति व्यवस्थापयन्त्यभिज्ञाः॥ एवमादीन्यनेकानि विचारणीयानीति। अनुशंसनपक्षे शंसनानन्तरमेव प्रणमेत्। ततो मृदादिनाऽऽच्छादयेत्। खननस्थाने शिवलिङ्गाश्वत्थबिल्ववृक्षादीनि प्रतिष्ठाप्यावटं प्रच्छाद्य कर्तुस्सद्यश्शौचमेवाप उपस्पृशेत् (स्नायादित्यर्थः) नाशौचं नोदकक्रिया न घृतप्राशनज्योतिर्दर्शनादि विधीयते। अवभृथबुद्ध्या स्नानं कुर्यात्। अश्वमेधफलमवाप्नोतीति विज्ञायते इत्याह भगवान बोधायनः इति ॥

अथ नित्यपूजा।

खननदेशे वेदिकां कृत्वा शिवलिङ्गं मृन्मयं वा कृत्वा प्रतिष्ठाप्य पुत्रा वा शिष्यादयो वा खननदिनप्रभृति दशमदिनपर्यन्तं जलाशये स्नात्वा शुद्धशुष्कवस्त्रपुण्ड्रादि धृत्वा सङ्कल्प्य "ओमात्मानं तर्पयामि ओंजीवात्मानं तर्पयामि ओं परमात्मानं तर्पयामीति प्राङ्मुखो वा देवतीर्थेन तर्पयेत्॥ (केचिद्दक्षिणामुखस्सन्निति तु विचारणीयम्।) क्षीरेण जलेन वाऽञ्जलिना देवतीर्थेन। केचित्खननदेशे सालग्रामं

निधाय पुरुषसूक्तेन षोडशोपचारैः सम्पूज्य पायसं निवेद्य पूजान्ते
ष्टदिक्षु क्षीरेण तर्पणं प्रणवेन कुर्यादिति । तत्पक्षे अक्षतोदकैःलो
पालेभ्यो बलिं दत्त्वा प्रणमेत् । नारायणप्रीत्यर्थं पायसदानम्
इदं सर्वं कुटीचकादिपरमेव । "पायसं परमं यस्माद्दानानामुत्तमोत्तमम्
सर्वदैवतयोग्य त्वं श्रियं पुष्टिं च देहि मे" ॥ अमृतं सर्वदेवा
पायसं प्रियमुत्तमम् । ब्रह्मात्मकं यतस्तस्माद्दातुश्च सुखदं सदा
इति दद्यात् ॥

॥ इति नित्यपूजा ॥

पार्वणश्राद्धात्पूर्वं दर्शे आगते नापकर्षणं दर्शश्राद्धस्य । पा
णदिने दर्शे आगते पार्वणश्राद्धाङ्गतिलतर्पणं श्राद्धानन्तरमेव कृत
दर्शश्राद्धं च कुर्यादिति वचनात् । यतेः खननाद्याराधनान्तं दर्शादि
पुत्रस्य नास्ति । तत्परमेव दर्शाद्यारम्भः । शिष्यादिविषये दर्शे कृत
पार्वणं कुर्यादिति । शिष्यादिविषये आराधनान्तमध्ये दर्शश्चेद्
कृत्वा कर्म कुर्यात् । दशमेऽहनि महापूजां एकादशे पार्वणं द्वादशे
नारायणबलिरिति ॥

अथ नारायण बलिप्रयोगः पद्धत्युक्तः । ब्राह्मणाननुज्ञा
नारायणबलिं करिष्ये इति सङ्कल्प्य ईशानभागे होमस्थानम् । तत्पूर्वभा
विष्णुकुम्भपूजा अग्नेर्दक्षिणतो बलिदानम् । तद्दक्षिणतो दक्षिणापश्चिमे
वा भोजनस्थानमिति च परिकल्प्य सर्वोपकरणानि सम्पाद्य त्रयोदश
ब्राह्मणान् शुक्ले केशवादीन् कृष्णे संकर्षणादीन् वृणुयात् । गुरुरूप

विष्णुश्च । केचित् कृष्णेऽपि केशवादय एवेति । एवं वृत्वा तेभ्योऽ-
भ्यङ्गादि यथोपपादं दत्त्वा श्राद्धमारभेत । उपवीती गोत्रस्य शर्मणः
सिद्धिगतपरमहंसपरिव्राजकस्य मम पितुर्गुरोर्दिने गुरुमुद्दिश्य नारायण-
बलिकर्म करिष्ये इति सङ्कल्प्य पुत्रस्यौपासनाग्निं शिष्यादीनां लौकि-
काग्निं प्रतिष्ठाप्य स्वगृह्योक्तप्रकारेण पायसं चरुं संस्कृत्याप्रणीताभ्यः
कृत्वाऽग्नेः पुरस्तात्कुम्भे विष्णुं नारायणमावाह्य पुरुषसूक्तेन षोडशोप-
चारैः पूजयेत् । पुरुषसूक्तस्य साध्यनारायण ऋषिः । अनुष्टुप्त्रिष्टुभौ
छन्दसी । पुरुषो नारायणो देवता । पूजादौ विनियोगः । "अतो-
देवा" इत्यादि षड्भिर्ऋग्भिष्षडङ्गानि विन्यस्य वैष्णवीं पूजां कृत्वा सहस्र-
शीर्षापुरुष + दशाङ्गुलम् । ओं भूः पुरुषं ओं भुवः पुरुषँ, ओं सुवः
पुरुषँ, ओंभूर्भुवस्सुवः पुरुषमावाहयामीत्यावाह्य प्राणप्रतिष्ठां कृत्वा
पुरुष एवेदगुँ सर्वं + तिरोहति । इत्यादिना आसनादिषोडशोपचारान्
कुर्यात् । स्नाने पुरुषसूक्तेन स्नापयित्वाऽथवस्त्रादिभिरष्टाक्षरेणाभ्यर्च्या-
द्भिस्तर्पयति ॥

केशवादिभिः सङ्कर्षणादिभिः द्वादशनामभिः । केशवं तर्पयामी-
त्यादि । ब्रह्मवरणादि मुखान्ते पक्वान्नं जुहोति । विष्णोर्नुकमिति पुरो-
नुवाक्यामनूच्य परोमात्रयेति याज्ययास्वाहान्ते जुहोति । आज्याक्तपा-
यसेन व्याहृतीभिः पुरुषसूक्तेन प्रत्यृचमवदानधर्मेणावदाय हुत्वा केशवा-
दिद्वादशनामभिः प्रणवादि चतुर्थ्यन्तस्वाहान्तैः ओं केशवाय स्वाहेत्यादि
द्वादशाहुतीर्हुत्वाऽऽज्येन चैवंहुत्वा स्विष्टकृदादिहोमशेषं समापयेदिति

पद्धतौ। बोधायनीयेतु—पक्वहोमान्ते केशवादिद्वादशनामभिराज्यहो
एव उक्तः। ब्राह्मणानामुपचारानन्तरं होमविशेषान् कृत्वा ब्राह्मणभोज
नानन्तरं बलिदानान्ते स्विष्टकृदादिहोमशेषसमापनमित्युक्तम्। बोधा
यनसूत्रिणामेवेदम् नान्येषामिति। इदमपि विचारणीयम्। अ
होमान्ते घृतगुडपायसं देवस्य त्वा + हस्ताभ्याम्, विष्णवे हविर्निवेद
यामीति निवेद्य सप्तव्याहृतिभिस्स्वाहाकारैर्जपित्वा ओं भूस्स्वाहेत्यादि
व्याहृतीभिराचमनीयं दत्त्वा निवेद्याथ ब्राह्मणानाहूय सदर्भोपक्लृप्ते
आसनेषूपवेश्य एनान् वृत्त्वा पाद्यासनवस्त्रगन्धमाल्यधूपदीपादिभि
यथोपपादं सम्पूज्य, (अत्र सर्वान्विप्रान् पितृरूपेण स्मरेदिति) (तद
विचारणीयम्) अन्ते त्रयोदशं गुरुं विशेषेणोपचारैस्सम्पूजयेत्
(आदाविति केचित्) पूजातु केशवस्य इदमासनम्। केशवा
भवता क्षणः कर्तव्यः। प्राप्नोतु भवानित्यादि वरणं कृत्वा
पादप्रक्षालनं पुनर्वरणं वस्त्राद्युपचारः॥

बोधायनीये तु उपचारान्तेऽथाभ्यनुज्ञातस्तिलमिश्रं, हविस्स
मुदायुत्य हस्तेन जुहोति। पितृभ्यस्स्वधानमो नारायणाय स्वाहा।
पितामहेभ्यः स्वधा नमोनारायणाय स्वाहा। प्रपितामहेभ्यस्स्वधा
नमोनारायणाय स्वाहा। अग्नये कव्यवाहनाय स्वधा स्वाहा। इति
विशेष उक्तः। एतदपि विचारणीयम्। अथ ब्राह्मणानां भोजनस्थान
आसनं दत्त्वाऽन्नाभिमर्शनं "मिदं विष्णु + " स्वाहा विष्णो हव्यं
रक्षस्व"। केचित्त्वमत्र हुतशेषं निधायेति। इदमिदमन्नमित्यादि संप्रदद

ति प्रतिपात्रं दत्त्वा सत्यं त्वर्तेनेत्युत्तरपरिषेचनम्। "एकोविष्णुः"
मोऽस्त्वनन्ताय + धारिणे नमः" इति नमस्कृत्यापोशनादि भोजनो-
त्तरापोशनान्तं हस्तप्रक्षालनादि। यथाशक्ति दक्षिणां दत्वाऽऽशीर्वादादि
दक्षिणनमस्कारानुव्रजनविसर्जनान्तं कृत्वा दक्षिणेनाग्निं प्रागग्रान्
दर्भान् द्वेधा संस्तीर्य तेषु क्रमेणाक्षतोदकं निनीय देवतीर्थेन तेषु बलिं
ददाति। ओंभूःस्वाहा। ओंनमोनारायणायेमं बलिं ददामि। ओंभुव-
स्स्वाहोन्नमोनारायणायेमं बलिंददामि। ओंसुवस्स्वाहोन्नमोनाराय-
णायेमं बलिं ददामि। ओं भूर्भुवस्सुवस्स्वाहोन्नमोनारायणायेमं बलिं-
ददामि। इति॥

बोधायनीये तु—ओं भूस्स्वधेत्यादिप्रकारेण कर्तव्यमिति।
केचित्तु—ब्राह्मणभोजनान्तोच्छिष्टसन्निधाविति। एतत्सर्वं विचार-
णीयम्। ब्राह्मणविसर्जनानन्तरं केशवाय नमः इमं बलिं ददामी-
त्यादि द्वादशबलिं क्रमेण दत्त्वाऽक्षतोदकञ्च दत्त्वाथ कुम्भोद्वासनमभि-
षेकोयजमानस्याथगोदानाद्याचार्यपूजान्तं कृत्वा अथवैश्वदेवमिति। इदमपि
विचारणीयम्। ब्राह्मणैस्सह भुञ्जीत। अथास्मिन्दिने सिद्धिं गतस्य गुरोः
प्रीत्यर्थं गुर्वादीन् केशवादीनुद्दिश्याराधनकर्म करिष्ये इति संकल्प्या-
राधनं कुर्यात्। इति पद्धत्युक्तनारायणबलिः॥ अत्र विचारणीयमिति
यत्र यत्र लिखितं तत्सर्वं ब्रह्मचार्यादिप्रेतनारायणबलिपरम् न तु यति-
विषयतया प्रवृत्तम्॥ अथ नारायणबलिश्च कुटीचकादिसन्न्यासिपर
एवेति व्यवस्थापितः पूर्वविद्भिः॥

सपिण्डीकरणं नैव मृतानां ब्रह्मचारिणाम् ।
क्लीबानां पतितानां च दुष्टस्त्रीणां तथैव च ॥
नैष्ठिकानां यतीनां च श्राद्धं नारायणार्पणम् ।
उपकुर्वाणकस्यैव सपिण्डीकरणं विदुः ॥ इत्यादिवचनात् ।

अथ निबन्धनान्तरोक्तनारायणबलिरपि लिख्यते प्रदर्शनार्थम्–

अथ कुटीचकादियतिनारायणबलिप्रयोगः । परमहंसविषये महेश्वरबलिस्तु पूर्वमेवोक्तः ॥ एकादशे द्वादशे वा नारायणबलिं कुर्यात् । त्रयोदशावरान् वृत्वा मध्याह्ने स्नात्वा नारायणबलिकर्म करिष्य इति सङ्कल्प्य ईशानदेशे पुत्रश्चेदौपसनाग्निमन्यश्चेल्लौकिकाग्निं उपसमाधाय स्वगृह्योक्तप्रकारेणाग्निप्रतिष्ठापनाद्याघारान्ताम्यः कृत्वाऽग्नेः पूर्वभागे कुम्भं प्रतिष्ठाप्य पुरुषसूक्तस्य ऋष्यादिध्यानपूर्वकं पुरुषसूक्तेन कुम्भे विष्णुमावाह्यासनादिषोडशोपचारैस्सम्पूज्य ब्रह्मवरणाद्यग्निमुखान्ते पक्वाज्जुहोति । विष्णोर्नुकमिति पुरोनुवाक्यामनूच्य परो मात्रयेति याज्ययाऽवदानधर्मेणावदाय हुत्वा पायसेन व्याहृतिभिर्व्यस्ताभिस्समस्ताभिः पुरुषसूक्तेन प्रत्यृचं केशवादिनामभिः प्रणवादिचतुर्थ्यन्तैस्स्वाहाकारैरवदानधर्मेणावदाय हुत्वा एवमाज्याहुतीश्च हुत्वा स्विष्टकृदादिहोमशेषं समाप्य मानोमहान्तमित्यग्नेरुत्तरतो बलिं निधाय कुम्भे विष्णुं पुनस्सम्पूज्य हुतशेषं निवेद्य ब्राह्मणानाहूय शुक्लपक्षे केशवादि कृष्णे संकर्षणादिद्वादशनामभिः प्रत्येकमेकैकं द्वौ द्वौ त्रीन्वा यथाविभवं यतीन्वा तदभावे गृहस्थान्वा पाद्यासनवस्त्राद्यु-

पचारैस्सम्पूज्य सघृतभक्ष्यान्नादिभिर्भोजयित्वा त्रयोदशमन्ते गुरुरूपविष्णवे नम इति च विशेषेण पूजयेत् । तेभ्यो यथाशक्ति दक्षिणाताम्बूलादिकं दत्त्वाऽऽशीर्वादञ्च प्रार्थ्य ब्राह्मणान्विसृज्य शुचिदेशे प्रागग्रान् दर्भान् द्वेधाऽऽस्तीर्य दक्षिणतः प्रागपवर्गं चतुर्षु स्थलेषु तूष्णीमक्षतोदकं देवतीर्थेन निनीय । उत्तरतः प्रागपवर्गं द्वादशस्थलेषु च निनीय हुतशेषं भुक्तशेषं पायसान्नञ्च संसृज्य तेन ओंभूस्स्वाहोन्नमोनारायणायेमं बलिं ददामि ॥ १ ॥ ओंभुवस्स्वाहोन्नमोनारायणायेमं बलिं ददामि ॥ २ ॥ ओंसुवस्स्वाहोन्नमोनारायणायेमं बलिंददामि ॥ ३ ॥ ओंभूर्भुवस्सुवस्स्वाहोंनमो नारायणायेमं बलिं ददामि ॥ ४ ॥ इति ॥ दक्षिणतः प्रागपवर्गं चतुरो बलीन् । केशवायेमंबलिंददामीत्यादि शुक्ले, कृष्णे तु सङ्कर्षणायेमं इत्याद्युत्तरतः प्रागपवर्गान् द्वादशबलीन् हरेदुपवीत्येव । पूर्ववत्तूष्णीं अक्षतोदकं निनीय । ततो गवादिदशदानादिभूरिदक्षिणाचार्यपूजादिकञ्च कृत्वा कुम्भमुद्रास्याभिषिच्य तस्मिन्नेव दिने पाकान्तरेण परेद्युर्वा द्वादशेऽहनि आश्रमनामगोत्रादिनिर्देशेन प्रत्याब्दिकवत्पुत्रः पार्वणश्राद्धं कुर्यात् । द्वादशेऽह्नि पार्वणे तस्मिन्नेव दिने पाकान्तरेणाराधनम् । पूर्वेद्युरेकादशाह एव पार्वणं चेत् परेद्युर्द्वादशाहे आराधनमात्रमिति ॥

॥ अथाराधनविधिः ॥

अस्मिन्दिन आराधनकर्म करिष्य इति सङ्कल्प्य । प्रथमाराधने प्रतिमासं क्रियमाणं इति मासिके । प्रत्यब्दं क्रियमाणमित्याब्दिके ।

गुरोराराधनकर्म करिष्य इति क्रमेण संकल्प्य । गुरु-परमगुरु-परमेष्ठि-गुरु-परापरगुरूणां चत्वारो ब्राह्मणाः । एको वा । पूर्वपक्षे सिद्धिश्चेत् केशवादिस्थाने कृष्णे चेत्संकर्षणादिस्थाने द्वादश एको वा । यथाशक्ति ब्राह्मणा वरणीयाः । एवं ब्राह्मणान् वृत्वा रङ्गवल्ल्याद्यलङ्कृतचतुरश्रमण्डले पाद्यमादौ गुर्वादीनां दत्त्वा पादौ गन्धादिभिरलङ्कृत्य पादोदकं "चरणं पवित्रं + दधातु" इति पात्रान्तरकुम्भे गृहीत्वा प्रज्ञातं निधायासनगतानां वस्त्रगन्धमाल्यादिपुष्पधूपदीपादिभिर्ब्राह्मणानभ्यर्च्य मिष्टान्नं भोजयित्वाऽऽचान्तेषु विप्रपादोदककुम्भमानीय स्थण्डिले प्रतिष्ठाप्य तत्र तीर्थराजमावाह्य पुरुषसूक्तविधानेन षोडशोपचारैस्सम्पूज्य कुम्भमुद्रास्य तत्त्वशिरसि निधाय विष्णुं सारन्नेकमात्मानं प्रदक्षिणीकृत्य लोकस्सरस्वत्या + तद्धितीर्थमिति भगवन्नामभिश्च ब्राह्मणान् नर्तनपूर्वं त्रिःप्रदक्षिणीकृत्य तत्तीर्थं स्वबान्धवाश्चान्ये भक्ताश्च "अविद्यामूलनाशाय जन्मकर्मनिवृत्तये । ज्ञानवैराग्यसिद्ध्यर्थं गुरुपादोदकं शुभमि"ति प्राशयेयुः ॥ अथाशीर्वादं प्रार्थ्य ताम्बूलदक्षिणाद्युपचारैर्ब्राह्मणान्सन्तोष्यानुव्रज्य प्रदक्षिणीकृत्य नमस्कृत्य "पत्रशाकादी"ति हविश्शोभनं प्रार्थ्य क्षमाप्य विसृज्य ब्राह्मणबन्धुमित्रादिभिस्सह स्वयं भुञ्जीत ॥

॥ इत्याराधनविधिः ॥

अयमपि कुटीचकादित्रयविषयत्वेन स्पष्टमेव प्रतीयते । एव प्रतिसंवत्सरं पुत्रश्चेत्पार्वणमाराधनं च सिद्धिदिने परेद्युश्च क्रमेण कुर्यात् । सिद्धिदिने वा विघ्नसंशये । अन्यश्चेत्सिद्धिदिन आराधन-

मात्रमेव नान्यत् । एतद्व्यतिरेकेण पुत्रस्यान्यस्य वा ब्रह्मीभूतयतिमुद्दिश्य प्रेतकार्यं किमपि नास्तीति । यतिसंस्कारपद्धत्यादावुक्तम् ।

अथात्रैव — स्मृतिनिबन्धनादिषु स्थितपरस्परविरुद्धाविरुद्धवचनानि व्यवस्थया निर्णेतव्यानि लिख्यन्ते । यथा यमः—"दण्डग्रहणमात्रेण प्रेतत्वं नैव जायते । प्रेतत्वस्य विमोक्षार्थं षोडश श्राद्धिको विधिः ॥ १ ॥ पिण्डोदकान्नपानादिक्षुत्तृष्णादिनिवृत्तये । सपिण्डीकरण श्राद्धं पितृत्वप्राप्तये विधिः ॥ २ ॥ अवस्थात्रयहीनानां यतीनां द्वादशेऽहनि । श्राद्धाधिकारसिद्ध्यर्थं पार्वणन्तु सुतश्चरेत ॥ ३ ॥ इति द्वादशे पार्वणं कुटीचकादित्रयविषयम् ।

सपिण्डीकरणं नैषां कुर्यादेवौरसस्सुतः । एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा ॥ ४ ॥ अहन्येकादशे प्राप्ते कुर्यात्तस्य हि पार्वणम् । हंसे मृते सुतः कुर्यात् पार्वणं पितृयज्ञवत् ॥ ५ ॥ नारायणबलिं चैव तथापरमहंसके । (अवस्थात्रयहीनानां सामान्यतः पुत्रः द्वादशेऽहनि पार्वणमिति पूर्वत्र । उत्तरत्र तु अहन्येकादशे प्राप्ते तस्य हीति वचनात् तेषां मध्ये तस्य परमहंसस्यैकादशाहे पुत्रः पार्वणं कुर्यादिति सिद्ध्यति । हंसे मृते इति तु एकादशाह एव पार्वणस्य नारायणबलेश्च विधानात्तथा परमहंसक इत्यस्य पार्वणमात्रपरत्वम्) विष्णुं सम्पूज्य विधिवद्दत्त्वाऽर्घ्यं बलिमुत्तमम् ॥ ६ ॥ चरुं हुत्वा तु सूक्तेन पौरुषेण तु षोडश । केशवाद्यैर्द्वादशभिर्नामभिर्जुहुयात्ततः ॥ ७ ॥ द्वादश ब्राह्मणा भोज्या विष्ण्वर्थे च त्रयोदशम् ।

पूर्वपक्षे केशवाद्याः कृष्णे संकर्षणादयः ॥ ८ ॥ एकादशेऽह्नि कर्तव्यो नारायणबलिस्ततः । पाकान्तरेण तत्रैव पार्वणन्तु विधीयते ॥ ९ ॥ इति । एतत्सर्वं कुटीचकादि विषयम् । एकादश एव नारायणबलि-पार्वणयोर्विधानादिति ॥

तथा वसिष्ठः -- "चतुर्विधानां भिक्षूणां ज्ञातिबन्धुसुतादिभिः । द्वादशेऽहनि कर्तव्यं तेषां श्राद्धं तु पार्वणम् ॥ १ ॥ एकोद्दिष्टद्वयं पिण्डमाशौचं प्रेतकर्म च । न कुर्यात्पार्वणादन्यत् ब्रह्मीभूताय भिक्षवे ॥ इति न पूर्ववत्कुटीचकादिपरमेव द्वादशाहे पार्वणविधानात् ॥

पुलस्त्यः-

" कुटीचकन्तु प्रदहेत्पूरयेत्तु बहूदकम् ।
हंसं जले विनिक्षिप्य परहंसं विकीरयेत ॥ "

इति । सर्वेषां पूर्वं खननं कृत्वा पश्चाद्विशेषेण दहनादिकमपि कुर्यादित्येवंपरमिति ॥

" मुमुक्षुं निक्षिपेदग्नौ भूमावभ्यासिनं ततः । जलेऽनुभाविनं दद्यादारूढं दिक्षु पक्षिणाम् ॥ तं पश्चाद्दिग्बलिं कुर्यादथवा खननं चरेत । दिग्बलिर्मुख्य एव स्यात्खननं तु विकल्पतः ॥ अनुकल्पोऽथवा तस्य शिरोभेदस्तु मन्त्रतः ॥" इति । परमहंसस्य खननं तु अनुकल्प एव न तु विकल्पः । तस्याष्टदोषग्रस्तत्वात । अयमपि विकल्पः परमहंसेतरविषयः इति सपण्डीकरणं नैव सर्वेषां स्मृतिशासनात् । अहन्येकादशे प्राप्ते पार्वणं तु सुतश्चरेत् ॥ इदं तु परमहंसपुत्रपरम् ॥

सुमन्तुः---" औरसःक्षेत्रजो वाऽपि भ्राता वा तत्सुतोऽपि वा । कुर्यात्तु पार्वणं श्राद्धं शिष्यान्तेवासिभूमिपाः " इति पुत्रेतरेषां दैवपार्वणमिति शेषः । " पिण्डयज्ञं सुतः कुर्यात् दर्शे श्राद्धे मृतेऽहनि । यतेर्महालये दर्शे वा तस्य मृतवासरे ॥ पार्वणं त्वितरेषां तु नैकोद्दिष्टं भवेदिति ॥ " सुतः = यतेः पुत्रः । दर्शश्राद्धे— यतेर्मृतेऽहनि श्राद्धे महालये श्राद्धे च पिण्डयज्ञं = पैतृकपार्वणश्राद्धं । कुर्यात् । इतरेषां = पुत्रेतरेषां तु दर्शे वा तस्य यतेर्मृताहे वा पार्वणन्तु वा पैतृकदैविकादि वा पार्वणं श्राद्धं एकोद्दिष्टं तु वा पैतृकैकोद्दिष्टं श्राद्धं वा न भवेत् । नैव भवेदित्यर्थः ॥ पुत्रेतरेषां पैतृकपार्वणं एकोद्दिष्टं च निषिध्यतेऽनेन वचनेन । न दैवपार्वणेन च विकल्पः इति ॥ स्कन्दपुराणे—

" चतुर्थमाश्रमं गच्छेद्ब्रह्मविद्यापरायणः । एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्जितः ॥ एकाशेऽह्नि सम्प्राप्ते यद्वा तु द्वादशेऽहनि । पार्वणेन विधानेन श्राद्धं कुर्यात्तथौरसः ॥ नारायणबलिं कृत्वा पार्वणश्राद्धमाचरेत ॥" इत्यादि ॥ सर्वसंगविवर्जितः = सिद्धिगतः । एकदण्डी = परमहंसः । त्रिदण्डी = कुटीचकादिः । औरसपुत्रः क्रमेण एकादशाहे एकदण्डिनः पार्वणं त्रिदण्डिनः एकादशाहे द्वादशाहे वा नारायणबलिपूर्वकपार्वणश्राद्धं कुर्यादित्यर्थः । औरसः पुत्रः एकदण्डिनः परमहंसस्य एकादशाहे पार्वणेन विधिना पैतृकविधिना च पार्वणश्राद्धं कुर्यात् । त्रिदण्डिनः कुटीचकादेः पुत्रः एकादशाहे नारायणबलिपूर्वकपैतृक-

कपार्वणं कुर्यात् । पुत्रेतरास्तु एकादशाहे नारायणबलिं कृत्वा द्वादशे दैवपार्वणं कुर्युरित्यर्थः । एवं एकादशाहादिनारायणबलिपूर्वकपार्वणं कुटीचकादित्रयपरमेवेति स्पष्टमेव ॥ प्रत्यब्द दार्शिके श्राद्धे तीर्थेष्वपि महालये । सम्बन्धनामगोत्रेण श्राद्धकालेषु नित्यशः ॥ इति पुत्रस्य प्रत्याब्दिकादि सर्वश्राद्धसामान्यपरम् ॥

नागरखण्डे --"यतीनां प्रेतकार्ये तु नरकं याति पुष्कलम् । उदकं नात्र दातव्यं न पिण्डं श्राद्धमेव च ॥ १ ॥ नारायणं समुद्दिश्य कुर्यादेकादशेऽहनि । इदमपि कुटीचकादिपरमेव । पूर्वपक्षे केशवादीन् कृष्णे सङ्कर्षणादिकान् ॥ २ ॥ अन्ते त्रयोदशं विष्णुमुद्दिश्य विधिपूर्वकम् । ब्राह्मणान्भोजयेच्छक्त्या बलिर्यद्विहितिभिर्मतेन ॥ ३ ॥ एकादशे द्वादशे वा ततः पार्वणमाचरेत् । द्वादशाहे मृताहेऽपि चाराधनमथाचरेत् ॥ ४ ॥ श्रीगुरून् तद्गुरूंश्चैव परमेष्ठिगुरूंस्तथा । परापरगुरूंश्चैव केशवादीन् स्वनामभिः ॥ ५ ॥ गुर्वर्थे चतुरो विप्रान् केशवादींश्च शक्तितः । सम्पूज्य भोजयेदन्नैस्सघृतव्यञ्जनादिभिः ॥ ६ ॥ द्वादश्यामथवा शुक्ले सम्यगाराधनं चरेत् ॥ इति । एतत्सर्वमपि परमहंसव्यतिरिक्तकुटीचकादिवैष्णवसंन्यासिपरमेव । इत्यादि---प्रमाणानुरोधेन च नारायणबलिप्रयोगोऽपि दृश्यते निबन्धनान्तरेषु ॥ "दशाहान्तं पूजां विधाय । एकादशाहे नारायणबलिं कुर्यादिति । त्रयोदशावरान्वृत्वेत्यादि ---"बलिं दत्त्वा ततो गवादिदक्षिणादानमित्यन्तं, विधाय तस्मिन्नेव दिने पाकान्तरेण परेद्युर्द्वादशाहे वा आश्रमनामगोत्र-

निर्देशेन पार्वणं कुर्यात्पुत्रः प्रत्याब्दिकवत् इति । द्वादशाहे पार्वणे क्रियमाणे तस्मिन्नेवदिने पाकान्तरेणाराधनं कुर्यात् । पूर्वेद्युः पार्वणे कृते द्वादशाह आराधनमात्रमेव । **आराधनविधिश्च,** तत्र गुरुपरमगुर्वित्यादि-"नमस्कृत्य क्षमापयेदि"त्यन्तमेवमेवाराधनं प्रतिसंवत्सरं पुत्रश्चेत्पार्वणमाराधनं च सिद्धिदिवसे कुर्याद्, इतरस्त्वाराधनमात्रम् । एतद्व्यतिरेकेण पुत्रस्यान्यस्य वा ब्रह्मभूतयतिमुद्दिश्य प्रेतकार्यं किमपि नास्ति । तथा सपिण्डीकरणनिषेधवचनानि च पार्वणादिकर्तव्यता वचनानि च कानिचिद्वचनानि पूर्वमेव व्यवस्थया लिखितानि । तानि सर्वाण्यपि परमहंसव्यतिरिक्तकुटीचकादित्रयपरत्वेनैव व्यवस्थापनीयानि । वचनस्वारस्यबलात् । "कुटीचकादिसंस्कारे द्वादशाहं भवेत् क्रिया । त्रयोदशाहं पुत्रस्य परहंसो मृतो यदि ॥ १ ॥ इति । एवं परमपि कानि चिल्लिख्यन्ते निबन्धान्तरगतानि विषयभेदेन—

॥ स्मृत्यन्तरे ॥

"यतीनां मरणे प्राप्ते स्पृष्टिदोषो न विद्यते ।
आशौचबुद्ध्या स्नातश्चेदुपपातकवान्भवेत् ॥ १ ॥

ज्ञातिपुत्रकलत्राणां परिव्राण्मरणं यदि ।
आशौचं नास्ति तेषां वै सचेलस्स्नानमाचरेत् ॥ २ ॥

भिक्षुः प्राणविहीनश्चेद्दृष्टस्तु प्राणिभिर्यदि ।
तेषामप्यघहानिस्स्यादायुर्वृद्धिश्च जायते ॥ ३ ॥ इति ॥

कर्मदीपिकायां च ।

" सिद्धिं गते तु पितरि सम्प्राप्ते सूतकान्तरे ।
कारयेत्सर्वकर्माणि तदघं नैव विद्यते ॥ १ ॥

स्मृत्यन्तरे---

" ताते सिद्धिं गते कर्म कुर्यादाशौचवानपि ।
आशौचान्न सलिप्येत ब्रह्मीभूतस्य कर्मणः " ॥ २ ॥ इति ॥

स्मृतिसारे --

" सिद्धिं गते तु पितरि सम्प्राप्ते सूतकान्तरे ।
तदघं संपरित्यज्य कर्म कुर्याद्यथाविधि ॥ २ ॥
आशौचमध्ये पितरि सिद्धिं प्राप्ते तु पुत्रकः ।
तदघं सम्परित्यज्य सर्वकर्माणि कारयेत ॥ २ ॥ इति ॥

गोभिलः---

" आशौचान्तरमालोच्य मौढ्याल्लोभाच्च पुत्रकः ।
न त्यजेद्यतिकर्माणि त्यक्तश्चेत्पतितो भवेत् ॥ १ ॥

विश्वेश्वरसरस्वतीये---

प्रव्रज्याबाधमापन्ने पुत्रः पितरि सूतकी ।
तत्सूतकं परित्यज्य कर्म कुर्यादतन्द्रितः ॥ २ ॥
शावं वा सूतकं वाऽपि सिद्धेः पूर्वं परन्तु वा ।
तदघं सम्परित्यज्य यतिकर्म समाचरेत् ॥ ? ॥
(यतिकर्माणि कारयेत) ॥ इति ॥

याज्ञवल्क्यः—

" सिद्धिं गते तु पितरि सम्प्राप्ते सूतकान्तरे ।
तदघं सम्परित्यज्य यावत्कर्म समाचरेत् ॥ २ ॥
चतुर्णामपि भिक्षूणां यावत्संस्कारकर्मणि ।
आराधनान्तं पुत्रस्तु कुर्यादेवाविचारयन् १ ॥ इति ॥

स्मृतिसंग्रहे—

" स्वपत्न्याः प्रसवे मातुर्मरणे जनके यतौ ।
सिद्धिंगते सुतश्चैवोभयं कर्म समाचरेत् ॥ २ ॥

(उभयं मातृपितृकर्म)

मातृसंस्कारकाले तु, कर्तुराशौचमिष्यते ।
क्रियावसाने स्नानाच्च शुद्धिस्स्याद्यतिकर्मणः ॥ २ ॥
स्नात्वा पुण्ड्रं शुष्कवस्त्रं धृत्वा पूजां समाचरेत ।
बलिं क्षीरैस्तर्पणं चाप्यादशाहात्तु पुत्रकः ॥ ३ ॥

समाचरेदिति शेषः ॥ इत्यादिना पितुः खननादिदशाहान्ते, मात्राशौचशेषमनुष्ठाय स्वयमेव मातुरेकादशेऽहनि स्वतन्त्रैकोद्दिष्टाद्य-श्राद्धं च कुर्यात् । आशौचान्ते तु कर्तव्यमितिवचनात् ।

" मातुराशौचशेषं चाप्यनुष्ठाय यतेस्सुतः ।
एकोद्दिष्टं तु निर्वर्त्य मातुरेकादशेऽहनि ॥ १ ॥
अग्निं सन्धाय विधिवत्कृच्छ्राचरणपूर्वकम् ।
प्रसूतायां च भार्यायां भाण्डस्पर्शादनन्तरम् ॥ २ ॥

पत्न्या सहैव सन्धानं कृच्छ्राचरणपूर्वकम् ।
नित्यहोमं प्रकुर्वीत पितुः पार्वणमाचरेत् ॥ ३ ॥
ततो नारायणबलिं कुर्यादौपासनानले ।
आराधनं च विधिवत्कृत्वा च तदनन्तरम् ॥ ४ ॥
त्रयोविंशदिने मातुष्षोडशं च सपिण्डनम् ।
ततोगृहमखं कुर्यात् सोऽश्वमेधफलं लभेत् ॥ ५ ॥ इति ॥

स्मृत्यन्तरे च—

" गुरौ सिद्धिं गते चापि कर्तृभार्या प्रसूयते ।
तन्त्रशेषं प्रकुर्वीत पार्वणश्राद्धवर्जितम् ॥ १ ॥
ताते सिद्धिं गते माता मृता पत्नी प्रसूयते ।
आशौचान्ते तु कर्तव्यं पार्वणादि यथाविधि ॥ २ ॥
यतिसंस्कारमध्ये तु सूतकद्वयमापतेत् ।
आशौचान्ते प्रकुर्वीत पुत्रश्चैव तु पार्वणम् ॥ ३ ॥
औरसो दत्तपुत्रश्च भ्राता भ्रातुश्च पुत्रकः ।
दौहित्रो भागिनेयश्च यतेस्संस्कारकर्मणि ॥ ४ ॥
सर्वाङ्गवपनं कुर्यात् षण्णामेव विधीयते ।
इतरेषां यतीनां तु स्नात्वा कर्म समाचरेत् ॥ ५ ॥ इति ।
आशौचे यदि सम्प्राप्ते सन्यासेच्छा भवेद्यदि ।
मूलमन्त्रं समुच्चार्य कर्तव्यं मनुरब्रवीत् ॥ ६ ॥

वृद्धमनुः—" धर्मवृद्धौ त्वामरणादेकत्र निवासोऽन्यथा प्रव्रजनशीलः " इति ॥

अथ पुत्रकर्तृकपार्वणाराधनविषये विशेषवचनानि । यतिसंस्कारचन्द्रिकायतिसंस्कारकृत्यसङ्ग्रहादिस्मृत्यादिवचनानि च लिख्यन्ते प्रदर्शनार्थम्—

" नैकोद्दिष्टं न सापिण्ड्यं नाशौचं नोदकक्रिया ।
अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते ॥ १ ॥
एकादशे वत्सरान्ते पार्वणञ्च सुतश्चरेत् ।
तस्मिन्कर्तव्यमित्याह परं गुर्वर्चनं भृगुः ॥ २ ॥ इत्येतत् औरसेतरपरम् ॥

नैकस्मिन् दिवसे कुर्यात् पित्र्यं दैवं च पुत्रकः ।
नैकस्मिन्दिवसे पित्र्यं दैवञ्चापि सहाचरेत् ।
परेद्युः पूजनं कार्यमौरसेन सुतेन तु ॥ ३ ॥
दिनद्वयेन कर्तव्यं पार्वणं पूजनं गुरोः ।
नैकस्मिन्दिवसे कुर्यादन्यथा किल्बिषी भवेत् ॥ ४ ॥
आराधनं सुतः कुर्यात् श्राद्धाहात्तु परेऽहनि ।
नैकस्मिन्दिवसे कुर्यात् गुरुद्रोही भविष्यति ॥ ५ ॥
(कुर्याच्चेदिति शेषः ।)
पूर्वकाले समे पश्चाद्दिनैकस्मिन्न कारयेत् ।
श्राद्धं चाराधनं भिक्षोरन्यथा नारकी भवेत् ॥ ६ ॥

पार्वणानन्तरदिने पूजनन्तु गुरोश्चरेत् ।
न पित्र्येण समं कुर्यादन्यथा किल्बिषी भवेत् " ॥ इति ।

अथापत्कल्पमाह—

यस्मिन्दिने सिद्धिगतो यतिस्तस्मिन्दिने पार्वणपूजने च ।
शिष्यादयः कुर्युरुतापरेऽह्नि नो वित्तशाठ्यं न च पाकसङ्करः ॥

परेद्युर्बाधसन्देहे पुत्रोऽप्येकदिने चरेत् ।
शाकपाकं पृथक् कुर्यादेकस्मिन्दिवसे यदि ॥

एकसंवत्सरं भिक्षोर्मासि मासि प्रपूजनम् ।
पुत्रस्य पार्वणं केचिद्वदन्त्यन्यस्य पूजनम् ॥

उभयोः पूजनन्त्वेव कार्यं यावत्तु वत्सरम् ।
उशन्ति मुनयः प्राज्ञा भृग्वादीनां मतेन तु ॥

मासिकाराधनस्येह प्रत्यूहे न पुनः कृतिः ।
आकर्षणे निमित्तं तु न स्मरन्ति महर्षयः ॥

आत्मान्तरात्मपरमात्मेति शिष्यस्तु पार्वणम् ।
उपवीत्येव कुर्वीत प्राङ्मुखान्भोजयेत्ततः ॥

(ब्राह्मणानिति शेषः)

नैवाग्नौ करणं कुर्याद्द्यात्पिण्डत्रयं तथा ।
प्राचीनाग्रेषु दर्भेषु क्रमादात्मादिषु त्रिषु ॥ इति ।

इदं तु पार्वणं शैवमित्याहात्रिसमुद्भवः ।
द्वादशेऽहनि भस्माक्षभूषितस्सपवित्रकः ॥

सङ्कल्प्य ब्राह्मणश्रेष्ठान् यतीन्वा वृणुयाद्द्विजान् ।
साम्बायैकं शिवायैकं आत्मने चान्तरात्मने ॥

परमात्मन इत्येवं वृणुयाद्वा यथाख्यया ।
वस्त्रोपवीतगन्धाद्यैरलङ्कृत्य द्विजोत्तमान् ॥

पूर्वापरिष्टात्तन्त्रेण भवाद्यैर्हविषा हुनेत् ।
सन्तर्प्य स्वादुभोज्यान्नैरैन्द्रवारुणमन्त्रतः ॥
दद्याद्वायसपिण्डं चाप्यात्मादिभ्यास्त्रिपिण्डकान् ॥ इति च ।

ज्ञातिबान्धवमित्रादिः यतेस्संस्कारकृद्यदि ।
शिष्यवत्पार्वणं कुर्याद्वसिष्ठादिवचो यथा ॥ इति ।

समीपस्थस्सुतः कुर्यात्संस्कृतिं क्षौरपूर्वकम् ।
यथोक्तविधिना शिष्यो विना क्षौरन्तु कारयेत् ॥

कनीयसा कृते श्राद्धे केचिज्ज्येष्ठस्य पार्वणम् ।
अनिच्छिन्त्यपरे पूजां यथाचारं चरेद्बुधः ॥

(एतत्साग्निकानग्निकाधिकारिपरम्)
ज्येष्ठेन तु कृते श्राद्धे कनीयान्नैव पार्वणम् ॥

(सामिनेति शेषः)

पूजामेव तु कुर्वीत प्रत्यब्दं श्राद्धपूजने ।
देशान्तरमृतं श्रुत्वा मुनिपुत्रो विदेशगः ।

कृत्वाऽवगाह्य वपनं तर्पयेदम्भसा मुनिम् ।
आत्मानमन्तरात्मानं परमात्मेति च क्रमात् ॥
समीपस्थसुतस्यापि वपनं तर्पणं समम् ॥ १२ ॥

दशाहमध्ये श्रुत्वा तु प्रसङ्गध्याय मृताहतः ।
(तर्पणं पूजनं च कृत्वेति शेषः)
एकादशेऽह्नि कर्तव्यं श्राद्धं पैतृकवत्सुतः ॥ १३ ॥

एकादशाहे श्रुत्वा तु स्नात्वा वपनपूर्वकम् ।
दशाहे तर्पणं कृत्वा मूलेऽश्वत्थस्य वै सुतः ॥ १४ ॥

अथवा वेदिकायां वा पूजां तर्पणमाचरेत् ।
तस्मिन्नेव दिने श्राद्धं कुर्याद्विधिबलेन तु ॥ १५ ॥

द्वादशाहत्रयोदशाहचतुर्दशाहादिषु वा श्रुत्वा परेद्युः तद्दिनादेकादशे पार्वणमित्यादिक्रमेण त्रयोदशाहान्तं कुर्यात् ॥

द्वादशाहादिषु श्रुत्वा परेद्युः पार्वणं चरेत् ॥
अथवाऽनन्तरे मासि मृताहे पार्वणं चरेत १६ ॥ इति ।

तिथ्यज्ञाने पार्वणस्य शुक्लायां द्वादशीतिथौ ।
मासिकाराधनं चापि शुक्लायां न तु पार्वणम् ॥ १७ ॥

आब्दिकादि च शुक्लायां द्वादश्यामेव कारयेत् ।
मासाज्ञाने मार्गशुक्लद्वादश्यां पार्वणं चरेत् ॥ १८ ॥

प्रतिमासन्तु कुर्वीत द्वादश्यामेव पूजनम् ।
प्रत्याब्दिकादि द्वादश्यां मार्गशीर्ष्यां चरेत्तथा ॥ १९ ॥

दुर्मृतौ तु दशाहान्तं कृत्वा संस्कृतिपूर्विकाम् ।
क्रियां मार्गसितायान्तु द्वादश्यां पार्वणं चरेत ॥ २० ॥

बलिं नाराधनं पश्चान्मासिकाराधनं तथा ।
वत्सरान्ते मृताहे तु पार्वणं पूजनं चरेत् ॥ २१ ॥

विदेशस्थसुतस्यापि दुर्मृतौ करणं समम् ।
मार्गशीर्षे पार्वणादेरब्दान्ते पार्वणस्य च ॥ २२ ॥

ज्ञातिबान्धवमित्रादिर्यतेस्संस्कारकृद्यदि ।
शिष्यवत्पार्वणं कुर्याद्वसिष्ठादिवचो यथा ॥ २३ ॥

नारायणबलिन्त्वेव शिष्यः कुर्यान्न पार्वणम् ।
वत्सरान्तेऽप्येवमेव मृततिथ्यां चरेदिति ॥ २४ ॥

केचिदाहुस्सुतस्यापि विकल्पेन जगुः परे ।
विशेषेण मृतेह्नीति सुतस्यान्यत्र पार्वणम् ॥ २५ ॥

सुमन्तुः प्राह भिक्षूणां चतुर्णामपि पार्वणम् ।
अन्यत्र अब्दान्ते मृततिथावित्यर्थः —
एकादशे द्वादशाहे बलिं नाराधनं समम् ॥ २६ ॥

शिष्यादीनां सुतस्यापि वत्सरान्ते च पार्वणम् ।
आराधनं परेद्युश्च कर्तव्यमिति नित्यवत् ॥ २७ ॥
आशौचादावनुप्राप्ते पूजामन्येन कारयेत् ।
निवृत्ताशौचः कुर्वीत पार्वणादि यथाक्रमम् ॥ २८ ॥
एकादशेऽह्नि कुर्वीत नारायणबलिं सुतः ।
द्वादशे पार्वणं नेति केचिदाहुर्मनीषिणः ॥ २९ ॥
(इतीदमपि कुटीचकादिपरमेव) ।
केशादिधारणं चैव सोदकुम्भं तथैव च ।
भिक्षौ गते न कर्तव्यं मासिकाराधनं विना ॥ ३० ॥ इति ।
द्वादशाहादिषु श्रुत्वा पितुर्वपनपूर्वकम् ।
अश्वत्थमूले सम्पूज्य पुरुषोत्तमविधानतः ॥ ३१ ॥
क्षीरेण तर्पणं कुर्यादादशाहात्तु पुत्रकः ।
एकादशे पार्वणं च द्वादशे बलिकर्म च ॥ ३२ ॥
त्रयोदशदिने पूजां कुर्य्यात्सिद्धिं गते यतौ ।
इदन्तु—पुत्रकर्तृकपरमहंसविषयम् ॥

अथवाऽनन्तरे मासि मृताहे वापीत्यादि (एकादशाहादौ नारायणबलिपूर्वकं पार्वणादि द्वादशाहान्तकर्म यत्र दृश्यते तत्र सर्वं कुटीचकादित्रयपरम । यत्र तु एकादशाहे पार्वणं द्वादशाहे बलिः त्रयोदश आराधनमिति क्रमेण त्रयोदशाहान्तविधिस्तत्र सर्वं परमहंसपरमिति विज्ञेयम् ॥) इति ।

पुत्रस्त्वौपासने कुर्यात्पार्वणं बलिकर्म च ।
शिष्यादिर्लौकिके कुर्याद्यतीनामिति निर्णयः ॥ ३३ ॥
अज्ञानाल्लौकिकाग्नौ तु कुर्याच्चेत्तु पुनः कृतिः ।
इदं यतिकर्तृकव्यतिरिक्तपरम् ।
वानप्रस्थयतिब्रह्मचारिणश्शुचयस्स्मृताः ।
इतरेऽपि समारब्धप्रयोगाश्शुचयस्स्मृताः ॥ ३४ ॥

अत्र सन्न्यासिकर्तृकपार्वणादित्रयं कर्म तु केवलं ब्राह्मणभोजनादिमात्रेणैव पूर्णं भवति । न बाह्यकर्मकलापः । अनधिकारादनग्निकत्वाच्च । सर्वं मनसैव भावयेदिति । “खननादि दशाहान्तं कर्म कुर्यात्स्वयं यतिः । पार्वणादित्रयं कर्म ब्राह्मणानां तु भोजनैः” इति वचनात् । इत्यादिप्रमाणमूलस्मृत्यादिनिबन्धनानि यतिसंस्कारविषयाणि वचनानि विश्वेश्वरीयस्मृतिसङ्ग्रहादिषूक्तानि स्मृत्यादिवचनानि लिखितानि ॥

अन्यान्यपि कैश्चित्सङ्गृहीतान्यप्युत्तरत्र प्रदर्शनार्थं यतिकृत्ये विशेषे प्राप्ते निर्णयः—अत्र यः कोऽपि यतिसंस्कारकृत्सर्वोऽपि सर्वाङ्गवपनं कृत्वा खननादिसंस्कारं कुर्यादिति सर्वैः कल्पकारैरुक्तम । तथैवाचारश्च । अत्र पूर्वपक्षत्वेन किञ्चिद्वचनं वर्तते । औरसौ + ते इत्यादि तु तदावश्यकप्रतिपादनपरमिति ॥ सिद्धिगतस्य पितुः पुत्रेण खननमारभ्याराधनान्तं त्रयोदशाहं यथावत्कर्तव्यं तत्राशौचाद्यभावः । पितुस्सिद्धिदिनादूर्ध्वं नाशौचं कर्तुरिष्यते । सन्ध्यास्नानं नित्यहोमं

वैश्वदेवार्चनं चरेत् ॥ अन्यानि सर्वकर्माणि न कुर्यात्पार्वणादधः । अत्राशौचशब्दः---यतिनिमित्तपरः । अन्यस्य तु वक्ष्यमाणत्वात् । "पितुस्सिद्धिदिनादूर्ध्वमेकादशदिनात्पुरा । मातुः प्रत्याब्दिकं दर्शं नान्दी श्राद्धं च वर्जयेत् ॥ अज्ञानादविचाराच्च मातृश्राद्धे कृते सति । पार्वणान्ते पुनः कुर्यान्मातृश्राद्धं यथाविधि ॥

ज्ञात्यादियतिविषये-

ज्ञातेस्सिद्धिदिनात्पश्चात पित्रोः प्रत्याब्दिकं भवेत ।
श्राद्धं दर्शं च निर्वर्त्य यतेः पार्वणमाचरेत् ॥

आशौचमध्ये पितरि सिद्धिं प्राप्ते तु पुत्रकः ।
तदघं संपरित्यज्य सर्वकर्माणि कारयेत् ॥

इत्यादीनि पूर्वमेवोक्तान्येव । "ताते पितरि सन्न्यस्त" इत्यादि "सोऽश्वमेधफलं लभेदि"त्यन्तम् ॥ तत्र च विशेषश्चोक्तः । ततः पार्वणमाचरेत्, ततो नारायणबलिं कुर्यादौपासनानले ॥ इत्युक्तम् । अत्र तु, बलिं कुर्याद् द्वादशाहे कुर्यादौपासनानले । आराधनं च विधिवत्त्रयोदशदिने चरेत् इति विशेषः ॥ अन्यत्पूर्वेण समानम् । बान्धवादियतिविषये—स्मृत्यन्तरे सङ्ग्रहे च—आशौचादावनुप्राप्ते पूजामन्येन कारयेत् ॥

निवृत्ताशौचः कुर्वीत पार्वणादिं यथाक्रमम् ।
वानप्रस्थयतिब्रह्मचारिणश्शुचयस्स्मृताः ॥

इतरेऽपि समारब्धप्रयोगाश्शुचयस्स्मृताः ॥
—आरब्धस्य प्रयोगस्य समाप्तिपर्यन्तं शुद्धिविधानात् ।

यतिकर्तृकसंस्कारे दशाहान्तं भवेत् क्रिया ।
पार्वणादित्रयं कर्म ब्राह्मणानान्तु भोजनैः ॥ इति ।

सिद्ध्यनन्तरमागते सूतकादौ पुत्रविषये—

सिद्धिं गते तु पितरि सम्प्राप्ते सूतकान्तरे ।
तदघं नैव विद्येत सर्वकर्माणि कारयेत ॥

आशौचान्तरमालोच्य मौढ्याल्लोभाच्च पुत्रकः ।
न त्यजेद्यतिकर्माणि त्यजेच्चेत्किल्बिषीभवेत ॥

यतिसंस्कारमध्ये तु सूतकद्वयमापतेत ।
आशौचान्ते प्रकुर्वीत पुत्रश्चैव तु पार्वणम् ॥

(द्वयशब्दः पुत्रजनिमातृमृतिपरः)

गुरौ सिद्धिं गते चापि कर्तृभार्या प्रसूयते ।
तन्त्रशेषं प्रकुर्वीत पार्वणश्राद्धवर्जितम् ॥

स्वपत्न्याः प्रसवे मातुर्मरणे जनके यतौ ।
सिद्धिं गते सुतश्चैवोभयं कर्म समाचरेत् ॥

(उभयंकर्म मातृपितृकर्म)

"ताते सिद्धिं गते माता मृता पत्नी प्रसूयते ।
आशौचान्ते तु कर्तव्यं पार्वणादि यथाविधि ॥

मातुस्संस्कारकाले तु कर्तुराशौचमिष्यते ।
क्रियावसाने स्नानाच्च शुद्धिस्स्याद्यतिकर्मणि ॥
स्नात्वा पुण्ड्रं शुद्धवस्त्रं धृत्वा पूजां समाचरेत् ।
बलिं क्षीरैस्तर्पणं चाप्यादशाहात्तु पुत्रकः ॥
मातुराशौचशेषं चाप्यनुष्ठाय ततस्सुतः ।
एकोद्दिष्टन्तु निर्वर्त्य मातुरेकादशेऽहनि ॥
प्रसूतायां च भार्यायां भाण्डस्पर्शादनन्तरम् ।
अग्निं सन्धाय विधिवत् कृच्छ्राचरणपूर्वकम् ॥
नित्यहोमं विधायैव ततः पार्वणमाचरेत् ।
ततः परं बलिं पुत्रः कुर्यादौपासनानले ॥
(ततो नारायणबलिं कुर्यादौपासनानले)

आराधनं च विधिवत् त्रयोदशदिने चरेत् ।
त्रयोविंशदिने मातुष्षोडशं च सपिण्डकम् ॥
कुर्याद्ब्रह्ममखं चान्ते सोऽश्वमेधफलं लभेत ।
त्रयोविंशदिति त्रिपक्षादेरुपलक्षणम्

एवञ्च—पितुर्यतेस्सिद्धिदिनादूर्ध्वं मातुर्मरणे मातुर्दाहानन्तरं पितृपूर्वं सर्वमुभयञ्च कृत्वा पितुर्दशाहान्ते मात्राशौचशेषमनुष्ठाय मातुरेकादशाहे नवश्राद्धवृषोत्सर्गस्वतन्त्रमहैकोद्दिष्टान्तं विधिवत्कृत्वा तस्मिन्नेव दिने स्नानपुण्याहादि कृत्वा कृच्छ्राचरणपूर्वमौपासनाग्निं

सन्धाय नित्यहोमञ्च कृत्वा पितुः पार्वणं च कृत्वा मातुर्द्वादशाहे बलिमौपासनाग्नौ कृत्वा तत्परेद्युराराधनं च विधिवत्क्रमाद्विधाय त्रयो-विंशदिने त्रिपक्षादौ वा यथासम्भवं मातुष्षोडशं सपिण्डीकरणश्राद्धं कृत्वा ततः परेद्युर्ब्रह्ममखं च कृत्वाऽश्वमेधफलं लभेदिति ॥ तथैव स्वपत्नीप्रसवेऽपि पितुर्दशाहान्तं पूजां विधाय भाण्डस्पर्शानन्तरमौपा-सनाग्निं पूर्ववत्सन्धाय पार्वणादि यथाक्रमं विधिवत्कुर्यादिति । एका-दशदिने पुत्रव्यतिरिक्तकर्तृके पार्वणे विशेषः—

“ज्ञातिबान्धवमित्रादिर्यतेस्संस्कारकृद्यदि ।
शिष्यवत्पार्वणं कुर्याद्वसिष्ठादिवचो यथा ॥
सुमन्तुः प्राह भिक्षूणां चतुर्णामपि पार्वणम् ।
एकादशे द्वादशे वा बलिं चाराधनं समम् ॥
शिष्यादीनां सुतस्यैव वत्सरान्ते च पार्वणम् ।
आराधनं परेद्युश्च कर्तव्यमिति नित्यवत् ॥
पुत्रव्यतिरिक्तकर्तॄणामेकोद्दिष्टविधानतः ।
श्राद्धं कर्तव्यमित्येवं निर्णयन्ति च केचन ॥

तन्मन्दं । “पार्वणमितरेषां तु नैकोद्दिष्टं तु वा भवेत्” । इति निषेधादिति ॥

केचिच्छिष्यादिकर्तृकपार्वणे विधानान्तरमिच्छन्ति—
आत्मान्तरात्मपरमात्मेति शिष्यस्तु पार्वणम् ।
उपवीत्येव कुर्वीत प्राङ्मुखान् भोजयेततः ॥

नैवाग्नौ करणं कुर्याद्द्यात्पिण्डत्रयं तथा ॥
प्राचीनाग्रेषु दर्भेषु क्रमादात्मादिषु त्रिषु ।
इत्येतन्न साधुरित्याहुरविचारपराः किल (कुशलाः) ॥

पार्वणादावग्निनिर्णयः ।

पुत्रस्त्वौपासने कुर्यात्पार्वणं बलिकर्म च ।
शिष्यादिर्लौकिके कुर्याद्यतीनामिति निर्णयः ॥

लौकिक इति यतिकर्तृकव्यतिरिक्तशिष्यादिकर्तृकपार्वण बलिपरः, यतीनामनग्नित्वाच्चेति पूर्वमेव निराकृतः ॥

अज्ञानाल्लौकिकाग्नौ तु कुर्याच्चेत्तु पुनः क्रिया ॥ इति ॥

(पुत्रस्येति शेषः) पुत्रकर्तृकविषय औपासनाग्निः पार्वणबलिकर्मपर इति ॥

अथ प्रतिमासाराधनविधिः—

एकसंवत्सरं भिक्षोर्मासि मासि प्रपूजनम् ।
पुत्रस्य पार्वणं केचिद्वदन्त्यन्यस्य पूजनम् ॥ १ ॥
उभयोः पूजनन्त्वेव कार्यं यावत्तु वत्सरम् ॥
उशन्ति मुनयः प्राञ्चो भृग्वादीनां मतेन तु ।"

इत्यादि । अनेन वचनेन पुत्रस्यापि प्रतिमासमाराधनमात्रमेव न श्राद्धं नोभयमपीति ॥ तथाविधवचनानि बहूनि वर्तन्ते विस्तरभयान्न लिखितानि ।

प्रतिमासाराधनविघ्ने—

"मासिकाराधनस्येह प्रत्यूहे न पुनः कृतिः ।
आकर्षणे निमित्तं तु न स्मरन्ति मनीषिणः ॥"

प्रतिसंवत्सरं श्राद्धमाराधनञ्च कर्तव्यमित्याह—

"एकादशे वत्सरान्ते पार्वणं तु विधीयते ।
तस्मिन् कर्तव्यमित्याह परं गुर्वर्चनं भृगुः ।
इत्येतत्पुत्रेतरविषयम् तस्मिन्निति शिष्यादिपरम् ॥
"नैकस्मिन्दिवसे पित्र्यं दैवञ्चापि सहाचरेत् ।
परेद्युः पूजनं कार्यमौरसेन सुतेन तु ॥
आराधनं सुतः कुर्याच्छ्राद्धाहात्तु परेऽहनि ।
पूर्वकाले समे पश्चाद्दिनैकस्मिन्न कारयेत् ॥
"यस्मिन्दिने सिद्धिगतो मुनिस्स्यात्तस्मिन्दिने पार्वणपूजने च ।
शिष्यादयः कुर्युरुतापरेद्युर्नो वित्तशाठ्यं न च पाकसंकरः ॥"

अस्यापवादमाह—

"परेद्युर्बाधसन्देहे पुत्रोऽप्येकदिने चरेत् ।
शाकपाकान् पृथक्कुर्यादेकस्मिन्दिवसे यदि ॥
पैतृकानन्तरं चात्र स्वगुरून्प्रति पूजयेत् ।
अन्यथा पतितः पुत्रो रौरवं नरकं व्रजेत् ॥

इति सर्वथा पूजाऽकरणपरमिति ।

"ब्रह्मीभूतस्य यच्छ्राद्धदिनञ्च हरिवासरम् ।
आराधनं प्रकुर्वीत न कुर्यात्तु परेऽहनि ॥"
इत्यादि तु पुत्रव्यतिरिक्तशिष्यादिपरम् ।
स्मृत्यन्तरविरोधात् ॥

अथ देशान्तरविषये—

"दशाहमध्ये श्रुत्वा तु प्रसङ्ख्याय मृताहतः ।
एकादशेऽहनि श्राद्धं कुर्यात्पैतृकवत्सुतः ॥
एकादशाहे श्रुत्वाऽपि स्नात्वा वपनपूर्वकम् ।
दशाहंतर्पणं कृत्वा मूलेऽश्वत्थस्य वै सुतः ॥
अथवा वेदिकायां वा पूजां तर्पणमाचरेत् ।
एकादशेऽहनि श्राद्धं कुर्यात्पैतृकवत्सुतः ॥
द्वादशाहं समारभ्य पितुर्वपनपूर्वकम् ।
अश्वत्थमूले सम्पूज्य पौरुषोक्तविधानतः ॥
क्षीरेण तर्पणं कार्यमादशाहात्तु पुत्रकः ।
एकादशे पार्वणं च द्वादशे बलिकर्म च ॥
त्रयोदशदिने पूजां कुर्यात्सिद्धिं गते यतौ ।
अथवानन्तरे मासि मृताहे पार्वणं चरेत् ॥ इति ॥

तत्रासम्भवे शिष्यादिपरम् ।

कनिष्ठेन कृतेऽप्येवं ज्येष्ठपुत्रस्समाचरेत् ।

कनीयसा कृते श्राद्धे केचिज्ज्येष्ठस्य पार्वणम् ॥
अन्विच्छन्ति परे पूजां यथाचारं चरेद्बुधः ।

(एतदग्निमदनग्निमद्विषयम् इति)

"ज्येष्ठेन तु कृते श्राद्धे कनीयान्नैव पार्वणम् ।
पूजामेव तु कुर्वीत प्रत्यब्दादि यथाविधि ॥
देशान्तरमृतिं श्रुत्वा मुनेः पुत्रो विदेशगः ।
कृत्वावगाह्य वपनं दशाहं तर्पणं चरेत् ॥
एकादशे पार्वणं च द्वादशे बलिकर्म च ।
त्रयोदशे पूजनञ्च पुत्रः कुर्यात्क्रमेण तु ॥
ज्येष्ठः कुर्यात्कनिष्ठश्चेत् पूजामात्रं समाचरेत् ।
एतत्सर्वं परमहंसपुत्रकर्तृपरम् ॥

अन्यविषये तु—

यतिसंस्कारमध्ये तु सूतकद्वयमापतेत् ।
पूजामन्येन कुर्वीत दशाहं तर्पणं तथा ॥
निवृत्ताशौचः कुर्वीत पार्वणादि यथाक्रमम् ।
मासाज्ञाने दिनाज्ञाने शुक्लायां द्वादशीतिथौ ।
मार्गशीर्षस्य मासस्य कुर्यादिति विनिर्णयः ।
आब्दिकादि च शुक्लायां द्वादश्यामेव कारयेत् ॥

द्वादश्यामेव कुर्वीत प्रतिमासं च पूजनम् ।
कृष्णायां नैव कुर्वीत श्राद्धानीति विनिर्णयः ॥ इति ।
दुर्मृतौ तु दशाहान्तं कृत्वा खननपूर्विकाम् ।
क्रियां मार्गे सितायान्तु द्वादश्यां पार्वणं चरेत् ॥
बलिं चाराधनं पश्चात् मासिकाराधनं तथा ।
वत्सरान्ते मृताहे स्यात्पार्वणादि यथाक्रमम् ॥
विदेशस्थसुतस्यापि दुर्मृतौ करणं समम् ।
मार्गशीर्षे पार्वणादेरब्दान्ते पार्वणस्य च ॥
केशादिधारणं नैव मासिकं सोदकुम्भकम् ।
भिक्षौ मृते न कर्तव्यं मासिकाराधनं विनेति ॥

एवं च नारायणबलिपूर्वकयतिसंस्कारादिः कुटीचकादित्रयविषयः माहेश्वरबलिपूर्वकयतिसंस्कारादिः परमहंसविषयः । इति व्यवस्थितः ॥

अथ निबन्धान्तरविशेषवाक्यानि यतिसंस्कारदीपिकादौ क्रोडीकृतनिर्णयविशेषाः " देशान्तरगते पुत्रे पिता सिद्धिंगतश्चेत् आदावस्य पितृव्यादयो यतिसंस्कारमारभ्य कुर्युः, तन्मध्ये नालिकेरप्रहारात्प्राक् ज्येष्ठपुत्र आगतश्चेत् स्नात्वानुज्ञाप्य, सर्वाङ्गवपनं कृत्वा, स्नातश्शुद्धवस्त्रत्रिपुण्ड्रादिधरः, यतिसंस्कारमन्त्रान्यतिसन्निधौ जपित्वा, "भूमिर्भूमिमगादि"त्यादि कर्म प्रतिपद्यते । तदूर्ध्वं मृत्प्रक्षेपणात्पूर्वमागतोऽपि एवमेव कुर्यात् । तदनन्तरमागतश्चेत स्नानानुज्ञाक्षौरादिसंकल्पप्रभृतियतिसंस्कारमन्त्रान् समाधिस्थले स्थित्वापठेत् । ततः पूजादि यथाविधि कुर्यात् । खननदिनप्रभृति दशमदिनान्तादर्वागायातोऽप्येवमेव । तदनन्तरमेकादश आगतश्चेत पूर्ववदनुज्ञावपनस्नानादिशुद्धवस्त्रपुण्ड्रादिधरः समाधिस्थले वेदिकायां स्थित्वा खननादिमन्त्रान् जपित्वा, क्षीरतर्पणपूजादि च दशाहान्तं पूर्ववत्कृत्वा, पार्वणं च कृत्वा, द्वादशे बलिं त्रयोदशे आराधनं च क्रमेण विधिवत्कुर्यात् ॥ ऊर्ध्वं चेच्छ्रुतोऽनुज्ञापूर्वकं वपनस्नानादीनि कृत्वाऽश्वत्थमूले पूर्वोक्तप्रकारेण, यतिखननादिमन्त्रान् दशमदिनपर्यन्ततर्पणबलिपूजादीनि निर्वर्त्य, एकादशदिने पार्वणं द्वादशे बलिं, त्रयोदशे पूजनं च विधिवत्कुर्यात् । समाराधनदिने सुत आगते, पितुस्सिद्धिश्रवणे वा, तदानीमारभ्य पूर्ववत्कुर्यात् । गुरोराराधनस्य नावृत्तिः ।

आगाम्याराधनादिकुर्यात । अन्यकालेऽप्यागमेऽप्येवमेव । ज्ञात्यादिना पितुस्संस्कारकरणेऽपि सुत एवमेव कुर्यात् । कनिष्ठपुत्र आगतश्चेद्वपनस्नानपूर्वक समाधिस्थले अश्वत्थमूले वा पुरुषसूक्तविधिना पूजातर्पणबलीन्दशाहं कुर्यात् । एकादशदिने गुरोराराधनं कुर्यात् । सन्निकृष्टज्येष्ठपुत्रेण सिद्धिं गतस्य पितुस्संस्करणमध्ये कनिष्ठ आगतश्चेदनुज्ञावपनादि कृत्वा तद्दिन एव यावद्गतानि तावत्पर्यन्तानि तर्पणपूजादीनि कृत्वोर्ध्वं ज्येष्ठेन सह सर्वं कुर्यात् ॥

देशान्तरगतो ज्येष्ठः पुत्रः पितुस्सिद्धिं मातुर्मरणं चैककाले श्रुत्वा स्नात्वा विप्रैरनुज्ञातो वपनस्नानादि शुद्धवस्त्रादिधृत्वाऽश्वत्थमूले

यतिसंस्कारमन्त्रान् पुरुषसूक्तेन षोडशोपचारैरश्वत्थमूले सम्पूज्य क्षीरान्नं निवेद्य क्षीरतर्पणाद्यन्तं कृत्वा पुनस्स्नात्वा मातुस्सर्वप्रायश्चित्तकृच्छ्राचरणं कृत्वा जले दक्षिणाभिमुखः स्थित्वा कर्णमन्त्राद्युद्वयमिति सूर्योपस्थानान्तमन्त्रान् पठित्वा कण्ठादुपरि वपनं कृत्वा नग्नश्राद्धं कृत्वा पुनर्दक्षिणामुखो जले स्थित्वा सञ्चयनमन्त्रान् जपित्वा जलादुत्तीर्य शिलास्थापनादि पिण्डविसर्जनान्तं कृत्वा नवश्राद्धैकोत्तरवृद्धिश्राद्धानि कुर्यात्। मातुर्ज्ञात्यादिना संस्कारकरणे तु असन्निधानप्रायश्चित्त-कृच्छ्रादि कृत्वा पलाशवृन्तैः पुरुषाकृतिं कृत्वा पलाशविधिना सर्वं कुर्यात। अनन्तरं द्वितीयदिनप्रभृति दशाहान्तं प्रतिदिनं यतेः पूजादिकं शुष्कवस्त्रेण पुण्ड्रादि धृत्वा सर्वं कृत्वा ततस्स्नात्वा आर्द्रव-स्त्रधरः मातुर्नित्यतिलोदकादीनि प्रतिदिनं कृत्वा दशमदिने पाषाणो-त्थापनसर्वाङ्गवपनपूर्वकं शान्तिहोमानन्दहोमपुण्याहवाचनादि मातुर्द-शाहकृत्यं कृत्वाऽनन्तरं स्नात्वा यतेस्सिद्धिगतस्य पूजान्तं नाशौचम्। एकादशेऽह्नि कर्ता संगवे स्नात्वा ब्राह्मणान् वृत्वा पार्वणश्राद्धं विधाय पुनस्स्नानपुण्याहवाचननवश्राद्धवृषोत्सर्गैकोद्दिष्टं च कृत्वाऽत्रैव षोडश श्राद्धान्येकोद्दिष्टविधिना कृत्वा सपिण्डीकरणं च कृत्वा पुण्याहवाचनं कुर्यात्।

द्वादशेऽहनि पितुर्बलिं त्रयोदशाहे गुरोराराधनञ्च कृत्वाऽनन्तरं ग्रहमखं च कुर्यात्। मातुर्मरणदिने मातृसंस्कारात् पूर्वं पिता सिद्धि-गतश्चेत् पितृपूर्वं संस्कारद्वयम्। दशाहान्तं कृत्वा एकादशाहे पितुः

मातुर्नवश्राद्धाद्येकोद्दिष्टान्तं निर्वर्त्य पुण्याहं पार्वणं कृत्वाऽनन्तरं मातुर्नवश्राद्धाद्येकोद्दिष्टान्तं निर्वर्त्य पुण्याहं कुर्यात्। द्वादशाहे बलिं त्रयोदशे गुरोराराधनञ्च कृत्वा चतुर्दशे मातुः मासिकानि कृत्वाऽस्मिन्नेव दिने सपिण्डीकरणं कुर्यात्। मातुर्दशाहमध्ये पिता सिद्धिगतश्चेत पूर्वोक्तप्रकारेण पितृपूर्वं पूर्व-वत्कृत्वा मातुरेकादशाहे आद्यश्राद्धं कृत्वा पितुरेकादशाहे पार्वणं द्वादशे बलिं त्रयोदशे आराधनञ्च कृत्वा क्रमेण मातुस्त्रयोविंशद्दिनादौ षोडशं सपिण्डनं च कुर्यात। सिद्धिं गतस्य पितुर्दशाहमध्ये मातुर्मरणे मातुर्दाहानन्तरं पितृपूर्वकं मातुर्दाहादिसंस्कारानन्तरं दशाहान्तं नित्य-विधिमुभयोः पृथक् पृथक् पूर्ववत्कृत्वा पितुर्दशाहादूर्ध्वं मातुराशौच-शेषमनुष्ठाय मातुरेकादशेऽहनि नवश्राद्धाद्याद्यश्राद्धान्तं कृत्वा स्नात्वा पुण्याहं कृत्वौपासनं हुत्वा तस्मिन्नेव दिने पितुः पार्वणं तदनन्तरदिने द्वादशे बलिमौपासने कृत्वा त्रयोदशे आराधनञ्च कृत्वा मातुस्त्रयो-विंशद्दिनादौ सपिण्डनं च क्रमेण कुर्यात्॥

सिद्धिगतस्य पितुर्दशाहमध्ये ज्ञात्याशौचप्राप्तौ तदघं परित्य-ज्याराधनान्तं कुर्यात्। अघशेषं शिष्टाहमनुष्ठेयम्। सिद्धिं गतस्य पितुरेकादशाहे मातृमरणे मातृसंस्कारं यथाविधि कृत्वा मातुरेकाद-शाहे आद्यश्राद्धं कृत्वाऽनन्तरं तदानीमेव पितुः पार्वणं कृत्वा परेह्नि बलिं पृथक् पाकेनाराधनञ्चानन्तरदिने मातुस्सपिण्डनमिति॥

सिद्धिगतपितुरेकादशेऽह्नि ज्येष्ठपुत्रः आगतश्चेत् अनुज्ञाव-पनस्नानवस्त्रपुण्ड्रादि धृत्वा समाधिवेदिकासन्निधौ यतिखननमन्त्रान्

पठित्वा प्रथमादिदशाहान्तपूजाक्षीरतर्पणबल्यादिकञ्च तस्मिन्नेव दिने पृथक् पृथक् कृत्वा पार्वणं च द्वादशे बलिं त्रयोदशे आराधनमिति ॥

द्वादशाह आगतश्चेत् सर्वाङ्गवपनं कृत्वा दशाहं समाधिस्थले पूर्वोक्तप्रकारेण पूजादिकं सर्वं कृत्वोपक्रमदिनादेकादशेऽह्नि पार्वणं परदिने बलिमाराधनञ्च पृथक् पाकेन कुर्यात्। परदिने वा। एतत्सर्वमपि शिष्यादिपुत्रकर्तृककुटीचकादिविषयम्। नारायणबलिविधानात् द्वादशाह एव पृथक् पाकेन नारायणबलिविधानाच्च। सिद्धिं गतस्य पितुर्दशाहमध्ये ज्येष्ठभ्रातृमरणे तस्य संस्कारादि सर्वं कनिष्ठः कृत्वा भ्रातुरेकादशाहे आद्यश्राद्धं कृत्वा पितुः पार्वणादिकं च क्रमात्पूर्ववत्कृत्वा भ्रातुस्त्रयोविंशद्दिनादिषु सपिण्डनं कुर्यात्। भ्रातुर्दशाहमध्ये पिता सिद्धिं गतश्चेत् सर्वाङ्गवपनपूर्वकं खननादिसंस्कारञ्च पितृपूर्वं क्रमाद्दशाहान्तं कृत्वा एकादशाहे भ्रातुरेकोद्दिष्टञ्च कृत्वा पितुरेकादशाहादिषु क्रमेण पार्वणं बलिमाराधनञ्च यथाविधिकुर्यात् त्रयोदशाहान्तम्। भ्रातुस्त्रिपक्षादिषु सपिण्डनमिति। इति निबन्धनान्तरेषु यतिसंस्कारदीपिकादिषु बहुषु बहुधा प्रयोगो दृश्यते ॥

तत्र व्यवस्थामाहुः प्रमाणानुसारिण्यायनश्च। तत्र निबन्धनेषु तावत पुत्रकर्तृकविषयतया एकादशाहे द्वादशाहे वा द्वयोः क्रमेण नारायणबलिपूर्वकं पार्वणाराधनकरणन्तु सर्वं कुटीचकादिवैष्णवसन्न्यासिविषयम्। तद्विषयेऽपि पुत्रशिष्यादिकर्तृपरञ्च। नतु परमहंसं विषयीकृत्य। तस्य त्रयोदशाहान्तकर्मविधानात्। तथा हि—

क्षीरेण तर्पणं कुर्यादादशाहात्तु पुत्रकः।
एकादशे पार्वणञ्च द्वादशे बलिकर्म च ॥
त्रयोदशदिने पूजां कुर्यात्सिद्धिं गते यतौ ॥

इति विशिष्य त्रयोदशाहविधानात्।

कुटीचकादिसंस्कारे द्वादशाहं भवेत् क्रिया।
त्रयोदशाहं पुत्रस्य परहंसयतौ मृते ॥

इति विशेषवचनाच्च ॥

अपिच। बलिविषये च नारायणबलिः, माहेश्वरबलिसंज्ञक भवादिबलिरिति च द्विविधः प्रतीयते स्मृतिनिबन्धनादिषु। नारायणबलिप्रयोगस्तु श्रीबोधायनेन ब्रह्मचार्यादिमृतोद्देशेन सूत्रितः। तदनुसारेण च प्रयोगः प्रायशो दृश्यते। स एव यतिविषयेऽपि सामान्यतः प्रयुज्यते कैश्चिन्निबन्धनकारैः। तत्र मूलप्रमाणं मृग्यम्। यद्यपि निबन्धनकारैः प्रयुक्तस्तथाऽपि यतिविषयेऽपि कुटीचकादित्रयविषयत्वेनैव सङ्कोचनीयो निबन्धनविनियोगः। एकादशाहद्वादशाहयोरेव नारायणबलिपूर्वकपार्वणाराधनयोश्च समापितत्वात् सन्न्यासिविषये त्रयोदशान्तकर्मविधानाच्च स्मृत्यादिषु पुत्रः दशाहान्तक्षीरतर्पणं पूजादिकञ्च कृत्वा एकादशाहे पार्वणश्राद्धं द्वादशाहे बलिं त्रयोदशाह आराधनञ्चेति क्रमेण कुर्यादित्येतत्तु पुत्रकर्तृकपरमहंससन्न्यासिविषयत्वेन व्यवस्थापनीयम्। अन्यथा वचनानां परस्परविरोधप्रसङ्गस्स्यात्। अत्र बलिरिति तु माहेश्वरबलिरेव। तस्य सन्न्यासिविषयत्वेनैव

कालीपुराणे **दूर्वाससा** प्रोक्तत्वात् । तत्रापि नारायणबलिकरणे माहेश्वरबलेर्निर्विषयत्वं स्यात् । बोधायनोक्तनारायणबलेस्तु प्रेतविषयत्वेनान्यथासिद्धत्वात् । यद्यपि निबन्धनकारैरपि स्वीकृतस्तथाऽपि वैष्णवसन्न्यासात्मककुटीचकादित्रयपरतया व्यवस्थापनीयः । तत्रस्थवचनानां तत्परत्वसूचनात् । तथाच नारायणबलिरिति कुटीचकादिपरः । माहेश्वरबलिस्तु परमहंससन्न्यासिपरः । अत्र प्रमाणवचनानि ।

तथाहि— **यमः** । "एकादशेऽह्नि कर्तव्यो माहेश्वरबलिस्ततः । पूर्वं पार्वणमेकादशेऽह्नि कर्तव्यम् । ततः द्वादशेऽह्नि माहेश्वरबलिः कर्तव्य इत्यर्थः । **बोधायनोऽपि** "माहेश्वरबलिश्चास्य कर्तव्यो द्वादशेऽहनि ।" एकादशे शिष्यादिपरः ॥ द्वादशे पुत्रपरः । **दूर्वासाश्च** —"माहेश्वरबलिं चैव शैवश्राद्धस्य विस्तरम् । इत्यारभ्य "**एकादशाहे** पुत्रस्तु पार्वणं द्वादशेऽहनि । कुर्याद्धवबलिं पश्चात् **ततस्त्वाराधनं यतेः** । इत्यादिप्रमाणवचनैः सन्न्यासिविषये एकादशाहे पूर्वं नारायणबलिः तत्रैव पश्चात्पाकान्तरेण वा द्वादशाहे पार्वणाराधने च तत्सर्वं पुत्रादिकर्तृकेऽपि कुटीचकादित्रयवैष्णवसन्न्यासिविषयम् । **एकादशाहे** पार्वणं द्वादशे माहेश्वरबलिस्त्रयोदश आराधनमिति तु **पुत्रकर्तृके**ऽपि परमहंससन्न्यासिविषयत्वेन च व्यवस्थामाहुः प्रमाणन्यायविदः ।

अपिच—"कुटीचकादित्रितयं सन्न्यासं वैष्णवं विदुः ।
शैवं परमहंसाख्यं शिवः प्राह यतीश्वराः ॥

"कुटीचकादिसन्न्यासे (संस्कारे) द्वादशाहं भवेत्क्रिया ।
त्रयोदशाहं पुत्रस्य परमहंसयतौ मृते ॥"

इत्यादिवचनाच्च । एवञ्च यतिविषयपार्वणबल्याराधनादौ स्मृतिपुराणादिनिबन्धनादिप्रमाणवचनन्यायादिपर्यालोचनायां सिद्धान्तव्यवस्था निर्णीयते ।

यथा—पार्वणश्राद्धञ्च दैवं पैतृकं चेति द्विविधम् ॥ १ ॥

बलिश्च—नारायणबलिः माहेश्वरबलिरितिः द्विविधः ॥ २ ॥

उद्देश्यसन्न्यासिनश्च, कुटीचकादिवैष्णवसन्न्यासत्रयम् ।
शैवपरमहंससन्न्यासिनश्चेति द्विविधाः ॥ ३ ॥

कर्ता च पुत्रः पुत्रेतरशिष्यादिबान्धवाश्चेति द्विविधः ॥ ४ ॥

क्रियाकालश्च द्वादशाहान्तः, त्रयोदशाहान्तश्चेति द्विविधः ॥

एवं स्मृत्यादिषु विकल्पो दृश्यते । तत्र व्यवस्थामाहुर्न्यायविदःयथायथम् । कुटीचकादित्रयवैष्णवसन्न्यासे पुत्रकर्तृके एकादशाहे नारायणबलिः, तत्रैव पाकान्तरेण पैतृकपार्वणञ्च द्वादशाहे गुर्वादिपूर्वककेशवाद्याराधनमिति द्वादशाहान्तं कर्म तत्रैव पुत्रेतर कर्तृके एकादशे नारायण बलिः द्वादशे दैवपार्वणं तत्रैव पाकान्तरेण गुर्वादिपूर्वककेशवाद्याराधनमिति द्वादशाहान्तं कर्म ॥ २ ॥ परमहंसशैवसन्न्यासे पुत्रेतरशिष्यादिबान्धवादिकर्तृके एकादशाहे भवादिमाहेश्वरबलिः । द्वादशाहे दैवपार्वणं तत्रैव पाकान्तरेण गुर्वा-

दिपूर्वक भवाद्याराधनमिति द्वादशाहान्तं कर्म ॥ ३ ॥ तत्रैव पुत्रकर्तृके एकादशाहे पैतृकपार्वणं द्वादशे भवादिमाहेश्वरबलिः त्रयोदशे गुर्वादिपूर्वकभवाद्याराधनमिति त्रयोदशाहान्तं कर्म ॥ ४ ॥ इत्येवं व्यवस्थया सिद्धान्तनिर्णयः कृतः प्राचेनैर्न्यायविद्भिर्विद्वद्भिः । प्रमाणवचनानि तु पूर्वमेव तत्तत्प्रकरण एवोदाहृत्य व्यवस्थापितानि ॥ इति यतिधर्म प्रदीपिकायां यतिपार्वणादिनिर्णयः ॥

तत्र च पुत्रः दशाहान्ततर्पणपूजादिकं कृत्वा, एकादशाहे पार्वणं द्वादशे बलिस्त्रयोदश आराधनमिति क्रमः । पुत्रकर्तृकशैवपरमहंसयतिसन्न्यासिपरः । अत्र बलिरिति तु —माहेश्वरबलिः । तस्य परमहंससन्न्यासिविषयत्वेनैव विशिष्य कालीपुराणे दूर्वाससा मुनिना पठितत्वात् । तत्रापि विकल्पेन नारायणबलिकरणे माहेश्वरबलेर्निर्विषयत्वप्रसङ्गस्स्यात् । बोधायनोक्तनारायणबलेस्तु प्रेतविषयत्वेनान्यथासिद्धत्वात् । निबन्धनवचनशैल्या च परमहंसशैवसन्न्यासिव्यतिरिक्तकुटीचकादिवैष्णवसन्न्यासिपर एवेति संकोचनीय एव । तथाहि—यमः—

एकादशेऽह्नि कर्तव्यो माहेश्वरबलिस्ततः ।

बोधायनः—माहेश्वरबलिश्चास्य कर्तव्यो द्वादशेऽहनि ॥ इति ।

एकादशे शिष्यादिपरः । द्वादशे पुत्रपरः । दूर्वासाश्च— "माहेश्वरबलिश्चैव शैवश्राद्धस्य विस्तरम्" इत्यादिनारभ्य—

"एकादशाहे पुत्रस्तु पार्वणं द्वादशेऽहनि । माहेश्वरबलिं कुर्यात् (कुर्याद्भवबलिं तत्र) इत्यादि प्रमाणवचनैः एकादशाहे नारायणबलिः, द्वादशाहे पार्वणमाराधनञ्चेति सर्वमपि पुत्रकर्तृककुटीचकादिवैष्णवसन्न्यासत्रयपरमेव । एकादशाहे पार्वणं द्वादशाहे माहेश्वरबलिः त्रयोदशाहे आराधनमिति च पुत्रकर्तृकेऽपि परमहंसशैवसन्न्यासिपरमेवेति व्यवस्थामाहुः । वस्तुतस्तु नारायणबलिः केशवाद्याराधनं च परमहंससन्न्यासिनामस्त्येवेति विश्वेश्वरस्मृति धर्मसिन्ध्वादिनिबन्धेभ्योऽवगम्यते । सर्वोऽयं कुटीचकादिविषय इति व्यवस्थापयितुं न शक्यते । परमहंसानधिकृत्यैव तत्पाठात् । आन्ध्रकर्णाटक चोळादि देशेषु परमहंसानामेकदण्डिनां नारायणबलेः केशवाद्याराधनस्य चानुष्ठानं अद्यावधि शिष्टेषूपलभ्यते । अतः परमहंसेषु नारायणबलेः माहेश्वरबलेश्च पूर्वपूर्वगुर्वाचार एव नियामकः ॥

"काली पुराणे दूर्वासः प्रोक्तवाक्यप्रमाणतः । निबन्धनान्तराद्युक्तवाक्यतश्च विशेषतः ॥" "परस्परविरुद्धानां वचनानां व्यवस्थया । सङ्ग्रह या च विद्वद्भिः प्रयुक्ता न्यायकोविदैः ॥" "वेदशास्त्रपुराणादिधर्मशास्त्रविचक्षणैः । श्रौतस्मार्ताचारपरैर्लोकानुग्रहतत्परैः ॥" "कृष्णापुराग्रहारस्थलक्ष्मीनारायणाभिधैः । लिखिता शास्त्रिवर्यैस्सा यतिधर्मप्रदीपिका ॥"

कालेयाब्दे गुरुछधावे (४९७३) केरलेऽब्दे सुभिक्षके । (१०४७) ॥ अङ्गिरो मीनचैत्राच्छद्वादश्यां तु समापिता ॥

एवं च कलि 4973 कोल्लम् 1047 आङ्गिरस वर्ष मीन चैत्रशुद्ध द्वादश्यां लिखित्वा समाप्ताऽभूत् ॥

॥ इति यतिधर्मप्रदीपिका समाप्ता ॥

शुद्धा शुद्धम्

पृष्ठः	पङ्क्तिः	अशुद्धं	शुद्धम
3	6	ज्ञानायं	ज्ञानार्थं
,,	12	कृच्छ्र	कृच्छ्रा
,,	17	मिष्टान्न	मृष्टान्न
7	3	मध्रिया	मध्रिया
8	20	प्रत्यन	प्रत्युचं
9	8	नङ्गा	नङ्ग
10	1	नङ्गा	[illegible]
,,	11	मलां	मलं
12	7	पूर्णां वा	व्याहृत्या पूर्णाहुतिं वा
,,	10	माजिघेत	माजिघ्रेत्
,,	11	समरोप्य	समारोप्य
14	11	लापयमि	लापयामि
,,	11	व्यहृतिं	व्याहृतिं
21	9	विन्यास्यां, मण्डले	विन्यस्य अग्निमण्डले
22	10	उत्त	उत्तर
37	11	पश्येत्सर्व	पश्येत्सर्वं
38	6	आनन्त	अनन्त
39	17	दिव्याति	दिव्यानि

पृष्ठः	पङ्क्तिः	अशुद्धं	शुद्धम्
,,	18	मानावर्णा	नानावर्णा
41	1	पट	पट्
,,	5	महतः	मरुतः
,,	7	ध्यानावस्थितद्गतेन	ध्यानावस्थितहृद्गतेन
43	1	शान्ताय (पाठभेदः)	धन्याय
49	9	द्वयान्यनध्ययानि	द्वयाननध्यायात
54	6	नाभिदघ्ने	नाभिदघ्ने
71	9	बिन्द्यात्	भिन्द्यात्
76	14	धमाधम	धमा धमा धम-
77	17	पर्वक	पूर्वक-
78	20	विशिय	विशिष्य-
79	5	विधानः	विधानतः
80	13	त्मति	त्मेति
82	2	सर्ये	सूर्ये
87	5	मेवास्मिन्	मेवान्यस्मिन्
90	4	मिति " इति च	मिति " च
96	20	न्यात्	न्यात्—
101	14	यजानस्य	यजमानस्य
108	1	कपार्वणं	पार्वणं-

पृष्ठः	पङ्क्तिः	अशुद्धं	शुद्धम्
108	3	प्रत्यब्द	प्रत्यब्दे
108	13	गुरूंश्रैव	गुरूंश्चैव-
109	4	प्रदिसं	प्रतिसं
109	17	आशोचं	आशौचं-
115	9	द्भिया	द्भिय
115	15	अन्विच्छि	अन्विच्छ-
127	2	गुधः	बुधः
130	7	रकरणे	राकरणे-
131	1	कृत्वाऽन्तरं	कृत्वाऽनन्तरं
135	2	परम-	पर-
135	6	द्वितिधम्	द्विविधम्
135	7	रितिः	रिति
135	8	वैश्णव	वैष्णव
136	4	प्राचेनैः	प्राचीनैः
12	6		"वैश्वानरो न ऊत्या पृष्टो दिवीति वैश्वानरयाज्यानुवाक्ये," सं वां कर्मणा, उभाजिग्यथुरिति त्रैघातवीय याज्यानुवाक्ये" इति पूरणीयम् ॥

Copies avail. le from :

SRI RANGASWAMI DEEKSHITAR

36, Venkatachala Chetty Street,

Triplicane . Madras-5.

Secretary, SANKARALAYAM

3, Chitrakulam North Street,

Mylapore : Madras-4.

ankurnagpal108@gmail.com

[illegible]

[illegible]

[illegible]

श्रीमज्जगद्गुरू शंकराचार्य परम्परा संवाहक

श्री उमाशक्ति पीठाधीश्वर

स्वामी श्री रामदेवानन्द सरस्वती जी महाराज

श्री उमाशक्ति पीठ, दुर्गापुरम्, पानीघाट,

श्रीधाम वृन्दावन (मथुरा)

सम्पर्क सूत्र : **9412662247, 9456288800**